आर.एन.आई. सं.58951/94

ISSN 0975 - 0061

# आरण्यकम्

अर्धवार्षिकी सन्दर्भिता संस्कृतशोधपत्रिका

(Bi-annual Refereed Sanskrit Research Journal)

विश्वविद्यालयानुदानायोगस्य ( UGC ) यत्नसूच्याम् ( Carelist ) अन्तर्भुक्ता

संस्कृतप्रसारपरिषद्

आरा (विहार:)

द्वात्रिंशं वर्षम् - प्रथमोऽङ्कः

मार्च 2024

# ‘आरण्यक’स्य नियमाः

1. संस्कृतप्रसारपरिषद्, आरा-पक्षत इदं षाण्मासिकी शोधपत्रिका संस्कृतेन चैत्र-आश्विनमासयोः (मार्च-सितम्बर) प्रकाश्यते। वर्षारम्भः चैत्रात् (मार्च तः)मन्यते।
2. ग्राहकत्वं पूर्णवर्षस्यैव स्वीक्रियते। मध्येवर्षं ग्राहकत्वं काङ्क्षतः पूर्णवर्षस्य शुल्क-मपेक्ष्यते। तादृशाय ग्राहकाय वर्षस्य पूर्वप्रकाशितोऽङ्क उपलब्धौ सत्यां प्रेषयिष्यते।
3. वार्षिकं शुल्कम् एकशतं (100) रूप्यकाणि। एकस्याङ्कस्य शुल्कम् पञ्चाशत् (50) रूप्यकाणि।
4. आजीवनं ग्राहकताशुल्कं द्विसहस्रं (2000) रूप्यकाणि।
5. शुल्कप्रेषणस्योपायाः-

   **(i) NEFT Banking**

   Bank - Indian Bank, Ara (Bihar)
   IFSC - IDIB000A047
   Name - Sanskrit Prasara Parishad
   Acc. No. - 552203784
   शुल्कं संप्रेष्य तस्य सन्देशसूचना (Message) अत्र देया-
   डॉ. नीलमणि पाठकः, दूरभाषः 8102327064
   Email-**nilmanipathak19@gmail.com**

   **(ii) बैंक ड्राफ्ट ‘संस्कृतप्रसारपरिषद्’** इति नाम्ना आरा (बिहार) नगरे व्यवहरणीयम्।
   **ड्राफ्ट प्रेषणस्थलम् -** डॉ. नीलमणि पाठकः, गणपति ज्वेलर्स के पीछे, महावीर स्थान, मौलाबाग, आरा (विहार)-802301
6. आरण्यकस्य बेबसाईट-**www.aranyakam.in**
7. विमर्शात्मका अनुसन्धानात्मकाश्च शास्त्रीया अप्रकाशितपूर्वा उच्चस्तरीया गम्भीराश्च मौलिका निबन्धाः प्रकाशनाय गृह्यन्ते।
8. काव्य-नाटक-चरित्रवर्णन-व्यङ्ग्य-हास्यसम्बद्धा नव्या रचना अत्र स्थानं न लभन्ते।
9. प्रकाशनाय प्रेषिताः सर्वविधा रचनाः शुद्धा एकस्मिन् पत्रपृष्ठे सुस्पष्टाक्षरैः लिखिताः टङ्किता वा स्युः। रचनाऽन्ते रचयितुः आवाससङ्केतः पदनिर्देशः ई-मेल संकेतः, दूरभाषसंख्या च उल्लिखिताः स्युः।
10. प्रकाशितसंस्कृतकाव्यनाटकाऽऽलोचनादिग्रन्थानां समीक्षार्थं सम्बद्धग्रन्थस्य प्रतिकृतिद्वयं सम्पादकं प्रति प्रेषणीयम्।
11. लेखकेभ्यः तत्प्रकाशितलेखानां पञ्च प्रतिरूपाण्यपि दीयन्ते।
12. लेखानां प्रकाशनस्य सम्पादनस्य च सर्वाधिकारः सम्पादकाधीनः।
13. ‘आरण्यक’सम्बद्धा सर्वविधा जिज्ञासा **प्रो. गोपबन्धु मिश्रः, संस्कृतविभागः, काशीहिन्दूविश्वविद्यालयः, वाराणसी (उ.प्र.)-221005 इति सङ्केतेन** (चल.) 9450870788 विधेया।
   Email-**gopabandhuh@gmail.com**
14. शोधलेखसम्प्रेषणं तत्सम्बद्धपत्रव्यवहारश्च
   Email-**aranyakam94@gmail.com** इति सङ्केतेन विधातव्यः।

# आरण्यकम्

संस्कृतप्रसारपरिषदः अर्धवार्षिकी सन्दर्भिता संस्कृतशोधपत्रिका

विश्वविद्यालयानुदानायोगस्य ( UGC ) यत्नसूच्याम् ( Carelist ) अन्तर्भुक्ता

वर्षाङ्कौ - द्वात्रिंशं वर्षम् - प्रथमोऽङ्कः

चैत्रः, वि.सं. २०८१

मार्च २०२४

प्रतिवर्षं प्रकाशनकालः

चैत्रः, आश्विनः-विक्रमाब्दः

मार्च, सितम्बर

प्रत्यङ्कम् - 50 रूप्यकाणि

संयुक्ताङ्कः - 100 रूप्यकाणि

वार्षिकं शुल्कं 100 रूप्यकाणि

**परामर्शदात्री समितिः**

डॉ. उमाशङ्कर शर्मा 'ऋषिः', पटना

डॉ. राय अश्विनी कुमारः, बोधगया

❁

संस्थापकः

**स्व. पण्डित व्रजभूषण मिश्र 'आक्रान्तः'**

❁


सम्पादकः

**प्रो.गोपबन्धु मिश्रः**

वरिष्ठ आचार्यः, संस्कृतविभागः

काशीहिन्दूविश्वविद्यालयः, वाराणसी

पूर्वकुलपतिः

श्रीसोमनाथसंस्कृतविश्वविद्यालयः, वेरावलम् (गुजरात)

gopabandhuh@gmail.com

❁

सह-सम्पादकौ

**डॉ. सञ्जय कुमार चौबे**

sanjaychaubey.lbs@gmail.com

**डॉ. सुनीलकुमार प्रधानः**

sunilkumarp435@gmail.com


❁


प्रकाशिका

**संस्कृतप्रसारपरिषद्**

रामेश्वरलीलासदनम्

महावीरस्थानम्

मौलाबाग, आरा (विहारः) 802301

❁

संस्कृतप्रसारपरिषद्, आरा पक्षतः प्रो. गोपबन्धु मिश्रेण, दी महावीर प्रेस, बी.20/44, भेलूपुर, वाराणसी इत्याख्ये मुद्रणालये मुद्रितं प्रकाशितं च।


**प्रो. गोपबन्धु मिश्रः**

सम्पादकः

# सम्पादकीयम्

महाम्भोधौ जलशायी हरिः। हिमालये स्थलवासी हरः। गगनविहारी सूर्यः। भूमौ ऊर्ध्वजलनः अग्निः। सर्वत्रगो गन्धवहो वायुः। नित्यं क्षयिष्णुतां वर्धिष्णुतां चानुभवन् उडुपतिः सततं नभश्चारी। पादपायी वृक्षः शाखाप्रशाखापर्णपुष्पफलदलैः नित्ययुक्तः अगणितद्विजाश्रयतां भजति। न केवलं तदपि तु प्राणिषु मीनाः जलजीविनः, सर्पाः वायुभक्षाः, गजाः तृणभोजिनः, खगाः शस्यकणभक्षिणः इति सहजाः तेषां प्रवृत्तयो दरीदृश्यन्ते। एते सर्वेऽपि सुतराम् अगूढस्वरूपा अपि किमपि नितरां गूढतत्त्वम् अभिव्यञ्जन्ति।

तद् गूढतत्त्वमस्ति - सापेक्षिकत्वम्। भगवान् विष्णुर्यथा शय्याधिकरणाय पयोधि-जलमपेक्षते, तथा हरोऽपि हिमालयं श्रयते। तथैव सूर्यचन्द्रमसौ गगनम्, वृक्षाः भूमिम्, खगाः वृक्षान्, मीनाः जलम्, गजाः तृणमित्यादि आश्रयमाणाः दृश्यन्ते। निरपेक्षतया एतस्मिन् संसारे कस्यापि गतिः स्थितिर्वा नास्ति। पञ्चमहाभूतैः विरचितं शरीरविशेषं तद्गतान् प्राणांश्च जीवन् प्राणी जन्मनः आरभ्य देहान्तं यावत् अपरं किमपि किमपि आश्रयमाणः भवत्येव। जन्मनः सकाशार्थं तेन सर्वादौ मातुः कुक्षिः आश्रीयते। तत्रैव मासान् स्थित्वा मातुरेव मुखेन भोज्यपेयादि तेन स्वीक्रियते। जन्मनोऽनन्तरमेव सः श्वाससञ्चालनार्थं वायुम्, ततः प्राणरक्षणार्थं जलं किं च क्रमशः संवर्धनार्थं भोज्यपदार्थमपेक्षते। किं च तस्य सम्पूर्णं जीवनं तद्रक्षणं च दूरे भवतु नाम, आदौ प्राणिरूपेण दण्डवत् अवस्थानस्य कृतेऽपि अपरेषां सहायतां भूयो भूयः सः स्वीकरोत्येव। बाल्ये अपरेषां सहायता तेन स्वीक्रियमाणाऽस्तीति तेन नानुभूयते, किं च तारुण्ये यौवने च समायाते सः तस्य जीवनं च इतरावलम्बि इति आत्यन्तिकं सत्यं च स्वीकर्तुं सः न प्रभवति, अपितु 'अहं स्वतन्त्रः, स्वातन्त्र्यं हि मम वैशिष्ट्य'मिति निराधारविजृम्भणजन्यविकारग्रस्तो भूत्वा अनर्थम् उत्पादयति, तदनर्थपूर्तये अभिनिविष्टो भूत्वा अनर्थपरम्परां सम्पादयति। स्वाभाविकतया प्रकृतेः प्राकृतिकरीत्याश्च च्युतो भूत्वा विकृतिमाश्रयते। विकृत्याश्रयात् अनेकविधा विकाराः एव समुत्पद्यन्ते। क्रमशः ते एव विकाराः सामान्यस्वीकृतिं लभमानाः नानाविधान् उत्पातान् जनयन्ति। ततः परं क्रमशः दुष्परिणामाः आयान्ति चेत् कदाचित् तेषां दुष्परिणामानां सामूहिकदृश्यताऽभावकारणेन उत व्यष्टिशः अन्वयकारणेन एष दुष्परिणामः स्वकीयप्रकृतिभ्रंशजन्यविकृतिहेतुकः इति नैव ज्ञायते न चानुभूयते नापि विमृश्यते। किन्तु ताटस्थ्येन गाम्भीर्येण सर्वं समीक्ष्यते चेत् एतत् सुतरां विज्ञातुं शक्यते तर्हि एतस्याः दुष्परिणतेः मूले मानवस्य आत्मनः इतरावलम्बनवृत्तेः बोधस्य नाशः किं

च तज्जन्यविकृतस्वातन्त्र्यचिन्तनमेव हेतुरूपेण विद्यमानमस्तीति सुतरामवगन्तुं शक्यत एव। अत एव प्राचीनकालतः विविधैरुपायैः नानाभिः स्तुतिभिः वर्णनमयैः स्तोत्रैर्वा परमेश्वरं प्रति तद्विहितविश्वरचनां प्रति कृतज्ञतानिवेदनं भूयो भूयः प्रदर्शितमस्ति, तद्यथा–

**त्वमेव माता च पिता त्वमेव**
**त्वमेव बन्धुश्च सखा त्वमेव।**
**त्वमेव विद्या द्रविणं त्वमेव**
**त्वमेव सर्वं मम देवदेव॥**

इत्यादि स्तुतिः, अथवा

**त्वमादिदेवः पुरुषः पुराणस्त्वमस्य विश्वस्य परं निधानम्।**
**वेत्तासि वेद्यं च परं च धाम त्वया ततं विश्वमनन्तरूप॥** (गीता 1.37)

इति अर्जुनद्वारा प्रस्तुता श्रीभगवत्प्रशस्तिः।

एतेन मौलिकबोधेन मानवः आत्मनः स्थितौ विकासयात्रायां च अनेकेषां भूमिकां महत्त्वं च विज्ञातुम् अर्हति। न केवलं तत्, एतेन सह अखिलब्रह्माण्डे एकस्य सतो (भवेन्नाम तस्य किंचिन्नाम परमेश्वरः ईश्वरः श्रीरामः श्रीकृष्णो बुद्धो महावीरो वा) वृत्तिरेव सर्वं किमपि स्वस्वसापेक्षिकवृत्तिमादाय चलितुं नियमयति। तेन च नियमेन सूर्यचन्द्रमसौ नियम्येते, तथैव वायुः, पर्वतः, महोदधिः वृक्षादयः तथा च तेनैव नियमेन मानवोऽपि नियम्यते। अयं च सापेक्षनियमः स्वाभाविकः प्राकृतिकः सहजो वेति वक्तुं शक्यते। सर्वेऽपि जङ्गमाः स्थावराश्च तदनुसरन्तः प्रवर्तन्ते एव। मनुष्योऽपि सहजतया नियमितस्तु भवति। किन्तु बोधवत्प्राणिरूपेण तस्य सृष्टिरस्ति इति हेतोः यदि बोध एव कृत्रिमतया तात्कालिकप्रभावकारणेन विकृतो नष्टो वा भवति तर्हि मनुष्यस्य सहजा गतिरवश्यमेव बाध्येत।

एतदर्थं सर्वदा सांसारिकवस्तूनां तद्विषयकबोधानां प्रसङ्गे हानोपादानबुद्धियुक्तः विवेकः प्रवर्तते चेत् अपगतमले दर्पणे यथा आत्मनः बिम्बः स्पष्टं प्रतिबिम्बितो भवति, तथैव विवेकद्वारा अपगतविकारे चेतसि कृत्येषु प्रवृत्तिः अकृत्येभ्यः निवृत्तिः जागरिता भविष्यति, किं च स्वात्मनः संसारे सापेक्षिकः प्रवृत्तिबोधः जागरूको भविष्यति येन स्वस्य च संसारस्य च हितं साधितं भविष्यतीति बहुधा उदीरितमेतदस्ति।

आरण्यकमिदं शोधपत्रं तादृशविवेकजागरणं नानाविधशास्त्रीयानुसन्धानाधारित-शोधलेखप्रकाशनमुखेन साधयितुं प्रभवति इत्यत्र विदुषां लेखमुखेन स्वाभिप्रायकथनं किं च शोधलेखपठनमुखेन प्रवर्तनमेव प्रमाणाम्।

विदुषां वशंवदः
गोपबन्धु मिश्र
सम्पादकः, आरण्यकम्

# सूचीपत्रम्


| | विषयः | लेखकः | पृष्ठम् |
|---|---|---|---|
| 1. | **पाणिनीयः स्वरान्वाख्यानप्रविधिः** | डॉ. विश्वबन्धुः<br>सहायकप्राध्यापकः - संस्कृतम्,<br>संस्कृतभाषा एवं साहित्य विभागः<br>साँची बौद्ध-भारतीय ज्ञान अध्ययन<br>विश्वविद्यालयः | 1-6 |
| 2. | **काशिकावृत्तौ चान्द्रव्याकरणस्य प्रभावः** | डॉ. प्रतिभा आर्या<br>असिस्टेंट प्रोफेसर, संस्कृतविभागः<br>इलाहाबाद विश्वविद्यालयः,<br>प्रयागराजः | 7-10 |
| 3. | **शुद्धाद्वैतवेदान्ते परतत्त्वसमीक्षणम्** | ड. सेविका-नाग<br>अद्वैतवेदान्तः, प्राच्यविद्याविभागः<br>संस्कृतमहाविश्वविद्यालयः,<br>कलकाता | 11-18 |
| 4. | **वेदेषु गुरुत्वाकर्षणसिद्धान्तः** | उज्ज्वलदासः<br>शोधच्छात्रः, संस्कृतविभागः,<br>पाण्डिच्चेरी विश्वविद्यालयः<br>कालापेट, पुदुच्चेरी | 19-26 |
| 5. | **त्रिदोषसाम्येषु हठयोगस्य भूमिका** | मलय-मजुमदारः<br>शोधच्छात्रः,सांख्ययोगविभागः<br>राष्ट्रियसंस्कृतविश्वविद्यालयः<br>तिरुपतिः | 27-34 |
| 6. | **लौकिकालौकिकरसानां समीक्षात्मकमालोचनम्** | कंचन बैरक<br>शोधच्छात्रः,संस्कृतविभागः<br>कोचिबैरम पंचन्र बैरम विश्वविद्यालयः<br>पश्चिमबंगाल | 35-42 |

| विषयः | लेखकः | पृष्ठम् |
| --- | --- | --- |
| 7. **क्षीरस्वामि-सायणाचार्ययोः दृष्ट्या परस्मैपदिधातूना-मर्थवैसादृश्यम्** | डॉ. अनिन्द्य चौधुरी<br>संस्कृतविभागः<br>गौडबङ्ग-विश्वविद्यालयः,<br>मालदा | 43-51 |
| 8. **किञ्चित् पारिभाषिकम्** | | 52 |
| 9. **वेदान्तेषु क्रममुक्तिविमर्शः** | अर्घ्यदीप रायः<br>संस्कृतविभागः<br>खलिसानी महाविद्यालयः<br>चन्दननगर, हुगली, पश्चिमबङ्ग | 53-63 |
| 10. **किञ्चित् पारिभाषिकम्** | | 64 |
| 11. **शङ्करवेदान्तदेशिकसिद्धान्तानुसारम् 'ईशा वास्यम्' इति मन्त्रतात्पर्य-विश्लेषणं तत्साम्यवैषम्यसमीक्षणञ्च** | चन्दन मुखर्जी<br>शोधच्छात्रः, संस्कृतविभागः<br>रामकृष्ण मिशन विवेकानन्द<br>विश्वविद्यालयः, वेलूर मठ,पश्चिमवङ्गः | 65-76 |
| 12. **शब्दाद्वैतवादः** | संकेत मोहन्ता<br>शोधच्छात्रः, संस्कृतविभागः<br>रामकृष्ण मिशन विवेकानन्द<br>विश्वविद्यालयः, वेलूर मठ,पश्चिमवङ्गः | 77-82 |


*

# पाणिनीयः स्वरान्वाख्यानप्रविधिः

**डॉ. विश्वबन्धुः**

'स्वाध्यायोऽध्येतव्यः' इत्यध्ययनविधिना अर्थज्ञानरूपदृष्टप्रयोजनायैव वेदाध्ययनं विधीयते नाऽक्षरग्रहणमात्रायेति सिद्धान्तः। इत्थं यद्यप्यध्यापकोपदेशवशादेव स्वराः विभाव्यन्ते, परञ्च न तावता विशिष्टफलसिद्धिः। महाभाष्ये पस्पशाह्निके विधीयते–

**यदधीतमविज्ञातं निगदेनैव शब्द्यते।**
**अनग्नाविव शुष्कैधो न तज्ज्वलति कर्हिचित्॥**

निगदः पाठः। अतः पाठेनैव गृहीतमिति। तच्च अविज्ञातमर्थतः स्वरूपतः स्वरसंस्कार-लक्षणात्मकतः शब्दस्य स्वरसंस्कारयोरन्वाख्यानं व्याकरणेन क्रियते। स्वरान्वाख्याने पाणिनिद्वारा अनेकानि उपादानानि आश्रीयन्ते। तेषु अर्थस्तु एकम्। शोधपत्रेऽस्मिन् पाणिनीयः स्वरान्वाख्यानप्रविधिः विचार्यते। **'अनुदात्तं पदमेकवर्जम्'** (अष्टा., 6.1.158) स्वरविधिविषयया परिभाषया पदे एकस्मिन् अचि उदात्तस्य स्वतन्त्रस्वरितस्य वा विधानद्वारा मूलस्वरः सांहितिकस्वरश्च इति स्वराणां विधानदृशा द्वैविध्यं दृश्यते। उदात्त– स्वतन्त्रस्वरितौ च मूलस्वरौ। प्रायशः पदे एकस्यैव अचः उदात्तत्वं स्वतन्त्रस्वरितत्वञ्च विधत्तं भवति, तमेकम् अचं वर्जयित्वा शेषं तत्पदमनुदात्ताच्कं भवति।[1] पदे शिष्टाः एते अनुदात्ताः 'सांहितिकस्वरः' इत्युच्यन्ते। प्रायशः पदे मूलस्वरः पदार्थनियामको न भवति। इत्युच्यते प्रकृत्यंशे प्रत्ययांशे वा सत्यपि मूलस्वरे सर्वदा पदार्थानामन्वये तस्यांशस्य प्राधान्यं न अवबोध्यं स्यात्। उदाहरणत्वेन आद्युदात्तकस्य **'दधि'** शब्दस्य तृतीयायां चतुर्थ्यां पञ्चम्याञ्च एकवचने स्वरः विभक्तिप्रत्यये भवति तत्रैव तृतीयायां चतुर्थ्यां पञ्चम्याञ्च द्विवचने बहुवचने स्वरः प्रकृत्यंशे भवति–

| | | |
|---|---|---|
| **दध्ना** | **दधिभ्याम्** | **दधिभिः** |
| **दध्ने** | **दधिभ्याम्** | **दधिभिः** |
| **दध्नः** | **दधिभ्याम्** | **दधिभिः** |

तृतीयायां चतुर्थ्यां पञ्चम्याञ्च एकवचने **'दधि'** शब्दस्य विभक्तिप्रत्यये परे सति

विकारो भवति। अस्मात् विकृतिभावात् स्वरः विपरिणमते। तत्रैव तृतीयायां चतुर्थ्यां पञ्चम्याञ्च द्विवचने बहुवचने च प्रकृतेः विपरिणामो न भवति येन स्वरविपरिणामोऽपि न भवति। इत्थं स्वरविधिः पदस्य संरचनानुसारी अपि दृश्यते। मूलस्वरस्य अन्वाख्याने पाणिनिद्वारा दश उपादानानि आश्रीयन्ते। तानि च नरसिंहसूरिविरचितायां स्वरमञ्जर्याम् इत्थं निरूप्यन्ते–

**लोपागमविकाराणां प्रकृतेः प्रत्ययस्य च।**
**प्लुतसन्धिपदानां च समासानां च भेदतः॥**
**क्वचिदर्थवशादाहुर्दशधा तानि शाब्दिकाः॥** (प्रथमः परिच्छेदः)

इमानि मूलस्वरव्युत्पत्तौ दश कारणानि विस्तरेण निरूपणीयानि सन्ति शोधपत्रेऽस्मिन्। सांहितिकस्वरस्य अन्वाख्यानं पाणिनिना '**उदात्तादनुदात्तस्य स्वरितः**' '**नोदात्त-स्वरितोदयमगार्ग्यकाश्यपगालवानाम्**' (अष्टा., 8.4.66–67) सूत्राभ्यां क्रियते।

**1. लोपवशात् पदस्य स्वरः– 'अनुदात्तस्य च यत्रोदात्तलोपः'** (अष्टा., 6.1.161) सूत्रेण पाणिनिना **देवी, पूष्णः, अर्यम्णे, अस्थ्ना** पदानाम् उदात्तस्वरलक्षणः मूलस्वरः वर्णलोपमाश्रित्य अन्वाख्यायते। विस्तरेण '**देवी**' इत्यस्य स्वरान्वाख्यानविधिः विचार्य्यते। अन्तोदात्तकात् 'देव' पदात् स्त्रियां अनुदात्तलक्षणः ('**अनुदात्तौ सुप्पितौ**' अष्टा., 3.1.4) 'ङीप्' प्रत्ययो भवति। प्रकृतिप्रत्यययोः संयोगे प्रकृतेः प्रातिपदिकलक्षणस्य अकारान्तस्य लोपवशात् ('**यस्येति च**' अष्टा., 6.4.148) अनुदात्तलक्षणः 'ङीप्' प्रत्ययः उदात्ते विपरिणमते। 'देव' पदस्य मूलस्वरः कृत्प्रत्ययस्वरोऽस्ति, तत्रैव 'देवी' पदस्य मूलस्वरः स्त्रीप्रत्ययस्वरोऽस्ति। स्त्रीप्रत्ययस्वरः स्वाभाव्येन अनुदात्तलक्षणो भवति '**अनुदात्तौ सुप्पितौ**' (अष्टा., 3.1.4) सूत्रानुरोधेन। तथाऽपि 'देवी' इत्यत्र प्रकृतेः प्रातिपदिकलक्षणस्य अकारान्तस्य लोपवशात् अनुदात्तलक्षणः स्त्रीप्रत्ययः (ङीप्) उदात्ते विपरिणमते। शब्दानां वाच्यस्य स्त्रीत्वस्य द्योतकः स्त्रीप्रत्ययो भवति यथा '**अजाद्यतष्टाप्**' (अष्टा., 4.1.4) प्रभृतिभिः सूत्रैरेव व्याख्यातमिति। तस्मात् पदार्थावबोधनदृशा मूलस्वरस्य निरर्थकत्वमेव उक्तमस्ति। अतः 'देवी' इत्यत्र लोपवशात् स्वरोऽस्ति न तु अवबुध्यमानार्थानुरोधेनेति।

**2. आगमवशात् पदस्य स्वरः– 'लुङ्लङ्लङ्क्ष्वड्डुदात्तः'** (अष्टा., 6.4.71) '**लुङ्लङ्लृङ्क्षु प्रत्ययेषु परतः अङ्गस्याडागमः स्यात् स चोदात्तः**'; '**यासुट् परस्मैपदेषूदात्तो ङिच्च**' (अष्टा., 3.4.103) 'लिङादेशानां परस्मैपदानां यासुडागमो भवति स चोदात्तो ङिच्च भवति'; '**चतुरनडुहोरामुदात्तः**' (अष्टा., 7.1.98) 'चतुर् अनडुह् इत्येतयोरामागमो भवति स चोदात्तो भवति'– इत्येतैः सूत्रैः पाणिनिना

आगमवशात् पदस्य स्वरः अन्वाख्यातः। क्रियावाचको धातुरथ च अनद्यतनभूतक्रियावृत्तेः वाचकौ लुङ्लङौ प्रत्ययौ। एषु परेषु सत्सु धात्वङ्गस्य उदात्तलक्षणः अडागमो भवति यथाहि– '**अधुक्षत्**', '**अभार्षम्**', '**अक्रमिषम्**' इत्यादीनां स्वरान्वाख्यानं विधीयते। लुङः अन्यस्मिन् भेदे सिचि विकल्पेन आगमस्य सिचः उदात्तत्वं भवति **'आदिः सिचो-ऽन्यतरस्याम्'** (अष्टा, 6.1.187) सूत्रेण। इत्वं विकल्पेन सिजन्तस्य आद्युदात्तत्वे 'कार्ष्टाम् लाविष्टाम्' इति पक्षे तु प्रत्ययस्वरेण अन्तोदातत्त्वे 'कार्ष्टम्'; **लाविष्टाम्**' इति।

एवमेव 'चत्वारः; **चत्वारि**' इति आगमस्वरेण सिद्ध्यते तत्रैव स्त्रियां '**चतस्र**' इत्यत्र प्रकृतिस्वरः अविचलितो भवति। अतः आगमस्थलेष्वपि स्वरः अवबुध्यमानार्थाश्रितो न दृश्यते।

**3. विकारवशात् स्वरः–** '**अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः**' (अष्टा, 7.1.75) सूत्रानुरोधेन एतेषां पदानां तृतीयादौ अजादौ विभक्तिप्रत्यये परे सति उदात्तधर्मा 'अन्' आदेशो भवति। इत्थं तृतीयादौ अजादौ विभक्तिप्रत्यये स्वरविपरिणामो भवति। अन्येषु विभक्तिप्रत्ययेषु परेषु सत्सु स्वरविपरिणामो न भवति। तस्मात् तृतीयादौ अजादौ विभक्तिप्रत्यये '**अल्लोपोऽनः**' (अष्टा., 6.4.134) '**अनुदात्तस्य च यत्रोदात्तलोपः**' (अष्टा., 6.1.161) सूत्रानुरोधेन विकारवशात् मूलस्वरः 'विभक्तिप्रत्यये' अनुशिष्यते तथा च अन्येषु विभक्तिप्रत्ययेषु प्रकृत्यंशस्यैव स्वरः अनुशिष्यते।

| | | |
|---|---|---|
| **दधि** | **दधिनी** | **दधीनि** |
| **दधि** | **दधिनी** | **दधीनि** |
| **दध्ना** | **दधिभ्याम्** | **दधिभिः** |
| **दध्ने** | **दधिभ्याम्** | **दधिभिः** |
| **दध्नः** | **दधिभ्याम्** | **दधिभिः** |
| **दध्नः** | **दध्नोः** | **दधीनाम्** |
| **दध्नि-दधनि** | **दध्नोः** | **दधिषु** |

**4. प्रकृतिवशात् स्वरः–** नामाख्यातविभाजनदृशा प्रकृतिर्द्विधा–धातुः प्रातिपदिकञ्च। आख्यातेषु कदाचित् धातुस्वरः शिष्यते, यथाहि 'गोपायतं नः' इत्यस्मिन् '**सन्नाद्यन्ता धातवः**' (अष्टा., 3.1.32) सूत्रानुरोधेन धातुसञ्ज्ञावशात् आतिदेशिक-धातुस्वरः शिष्यते। कदाचित् विकरणस्वरो विजयते '**कृणोति कृणोषि कृणोमि**' इत्यत्र। कदाचित् प्रत्ययस्वरो विजयते '**कृणुतः कृण्वन्ति कृणुथ कृण्वः कृण्मः**' इत्यादिषु 'सति

शिष्टस्वरबलीयस्त्वमन्यत्र विकरणेभ्यः' परिभाषाबलात्। इत्थमेव नामसु कदाचित् प्रातिपदिकस्वरः शिष्यते यथाहि– 'ह्रस्वान्तस्य स्त्रीविषयस्य' इति फिट्सूत्रानुरोधेन ह्रस्वान्तानां नित्यस्त्रीलिङ्गानां आदिरुदात्तलक्षणः प्रातिपदिकस्वरः विजयते।

'शतृ–शानच्–शानन्' प्रत्ययान्तेषु प्रातिपदिकेषु सत्सु कदाचित् धातुस्वरः शिष्यते **'भर्वन्तम् भर्वन्तौ भर्वन्तः'** इत्यादिप्रयोगेषु **'तास्यनुदात्तेन्ङिददुपदेशाल्लसार्वधातुकमनुदात्तमहिन्वङोः'** (अष्टा., 6.1.186) सूत्रानुरोधेन। तत्रैव 'शतृ–शानच्–शानन्' प्रत्ययान्तेषु प्रातिपदिकेषु सत्सु शत्रादिप्रत्ययस्वरः विजयते **'सुन्वन्तम् सुन्वन्तौ सुन्वतः'** प्रयोगेषु। 'शानच्' प्रत्ययस्य अवसरेषु अनेकाच्त्वात् प्रत्ययस्वरः कस्मिन् अचि शिष्येत् इति **'चितः'** (अष्टा., 6.1.63) इत्यादिभिः विधिसूत्रैः विधीयते। तस्मात् अत्राऽपि अर्थवशेन स्वरानुशासनं नाऽस्ति।

**5. प्रत्ययवशात् स्वरः– 'आद्युदात्तश्च'** (अष्टा., 3.1.3) उत्सर्गविधिना प्रत्ययानाम् आद्युदात्तत्वमुक्तम्। इत्युक्ते अनेकाचि प्रत्यये सति प्रत्ययस्वरः आदौ अचि शिष्यते। प्रकृतिप्रत्ययसंयोगे सति शिष्टस्वरत्वेन 'सति शिष्ट' इति परिभाषाबलात् '**अग्निः**'; 'यज्ञः'; 'सभेयः'; 'यज्ञिया?' इत्यादीनां स्वरः शिष्यते। '**चितः**' (अष्टा., 6.1.63); '**कितः**' (अष्टा., 6.1.166) इत्याद्यपवादविधिभिः प्रत्ययानाम् अन्तोदात्तत्वमुक्तम्। इत्युक्ते अनेकाचि प्रत्यये सति प्रत्ययस्वरः अन्ते अचि शिष्यते। इत्थं 'आग्नेयम्'; 'सौपर्णेयः' इत्यादीनां स्वरः शिष्यते। इत्थं प्रत्ययस्वरे सत्यपि अर्थवशेन स्वरो नाऽनुशिष्यते।

**6. प्लुतस्वरः–** प्रत्यभिवादने दूराद्धूते वा वाक्यस्यान्ते यत् सङ्कीर्तितं नाम गोत्रं वा तत्र प्लुतिः स्वरश्च इष्यते। तस्मात् प्लुतिकरणस्य या प्रयोज्यता सैव प्रयोज्यता स्वरकरणस्य। स्वरेण विशिष्टं किञ्चिदपि न साध्यते अर्थे। इत्थं प्लुतिवशात् स्वरोऽपि अर्थानुसारेण नाऽनुशिष्यते।

**7. सन्धिस्वरः–** उदात्ताच्कस्य स्वरिताच्कस्य वा अनुदात्ताच्के परे यणसन्धौ परवर्तिनः अनुदात्ताच्कस्य स्वरिते विपरिणामो भवति **'उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य'** (अष्टा., 8.2.4) सूत्रानुरोधेन। यथाहि– '**अभ्यभि** हि।' अभिशब्दः 'उपसर्गाश्चाभिवर्जम्' इत्याद्युदात्तनिषेधात् फिट्स्वरेणान्तोदात्तः। तस्य द्वित्वे सति आम्रेडितत्वात् परस्य च अनुदात्तत्वे सति यणसन्धिवशात् परवर्तिनः अनुदात्ताच्कस्य स्वरिते विपरिणामः। यणसन्धिवशात् अनुदात्ताच्कस्य यः स्वरितो भवति, सः सांहितिकस्वरितादन्यतरः। सांहितिकस्वरात् परेषाम् अनुदात्तानां निघातः एकश्रुतिर्वा विहितो भवति 'स्वरितात्संहितायामनुदात्तानाम्' (अष्टा., 1.2.39) सूत्रानुरोधेन। परञ्च यणसन्धिवशात् विपरिणतात् स्वरितात्

परेषाम् अनुदात्तानां निघातः एकश्रुतिर्वा विहिता भवति। यथाहि '**खलप्व्यांशा**' इत्यस्मिन् प्रयोगे। '**खलपू**' इति कृदुत्तरपदप्रकृतिस्वरेणान्तोदात्तः। '**ङि**' इत्यस्य सुप्त्वादनुदात्तः। '**खलपू + ङि = खलप्वि**' इत्यत्र यणसन्धिवशात् यणः परस्य अनुदात्तस्य स्वरिते विपरिणामः। पुनः '**खलप्वि**' इत्यस्य अन्तोदात्तकेन '**आशा**' इत्यनेन सन्धौ प्रकृतनियमेनैव '**खलप्व्यांशा**' इति व्युत्पद्यते। '**खलप्व्यांशा**' पदेऽस्मिन् स्वरितात् परस्य अनुदात्तस्य निघातो न भवति प्रत्युत अन्तोदात्तत्वमेव विहितम् अस्ति। तस्मात् यणसन्धिवशात् अनुदात्तस्य विपरिणामः स्वरितः मूलस्वरो न तु सांहितिकस्वरः। तथा च '**अभ्यंभि हि**' इत्यत्र '**खलप्व्यांशा**' इत्यत्र च अर्थानुरोधेन स्वरितो न अनुशिष्टोऽस्ति।

**8. पदस्वरः –** पादादौ वाक्यादौ वा स्थितस्य आख्यातपदस्य प्रकृतिस्वरोऽवशिष्यते। पाणिनीयाष्टाध्याय्याम् अष्टमे पादे विहितो निघातः पदस्वरो ग्राह्यः। '**युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयास्थयोर्वांम्नावौ**'; '**बहुवचनस्य वस्नसौ**'; '**तेमयावेकवचनस्य**'; '**त्वामौ द्वितीयायाः**' (अष्टा., 8.1.20–23) सूत्रैः युष्मदस्मदोः स्थाने विभक्तौ प्रत्यये परे सति विहिताः आदेशाः सर्वानुदात्ताः सन्ति। अतिङन्तात् परस्य तिङन्तस्य पदस्य विहितं सर्वानुदात्तत्वमपि पदस्वरनिमित्तकं ज्ञेयं भवेत्। इत्थमेव '**नित्यवीप्सयोः**' (अष्टा., 8.1.4) सूत्रानुरोधेन विहितस्य परस्य आम्रेडितसंज्ञकस्य सर्वानुदात्तत्वं पदस्वरनिमित्तकं ज्ञेयमिति।

**9. समासस्वरः –** समासस्य अन्तोदात्तत्वं '**समासस्य**' (अष्टा., 6.1.223) सूत्रेण अन्वाख्यायते। परञ्च द्वन्द्वसमासे (क) उभे पदे युगपत् प्रकृतिस्वरेऽपि भवतः[2]; (ख) पूर्वपदस्य प्रकृतिस्वरत्वमपि दृश्यते।[3] इत्थमेव प्रायशः उत्तरपदार्थप्रधाने तत्पुरुषे औत्सर्गिकं समासस्वरं अन्तोदात्तत्वं[4] प्रबाध्य '**चतुर्थी तदर्थे; अर्थे; क्ते च; अहीने द्वितीया**' (अष्टा., 6.2.43–46) प्रभृतिभिः सूत्रैः पूर्वपदस्य प्रकृतिस्वरत्वं विहितम् अस्ति। तत्राऽपि काशिकाकारेण निर्देशो विधत्तः यद्यत्र तत्पुरुषे पूर्वपदस्य प्रकृतिस्वरत्वम् अविहितम् अस्ति, स सर्वो दासीभारादिषु द्रष्टव्यः। इत्थं दासीभारादिषु पाठनेन अविहितानामपि पूर्वपदप्रकृतिस्वरत्वं '**कुरुगार्हपत–रिक्तगुरु–असूतजरती–अश्लीलदृढरूपा पारेवडवा तैतिलकद्रूः पण्यकम्भलो दासीभाराणां च**' (अष्टा., 6.2.42) सूत्रेण ज्ञातव्यं भवेत् प्रायेण पूर्वपदार्थप्रधाने अव्ययीभावसमासे, औत्सर्गिक-समासस्वरोऽन्तोदात्तत्वं भवति यथाहि– '**अनुकामम्**'; 'अधियज्ञम्'; 'यथास्थानम्'। अन्यपदार्थप्रधाने बहुव्रीहौ प्रायशः पूर्वपदस्य प्रकृतिस्वरत्वम् अन्वाख्यायते। यथाहि–**इन्द्रशत्रुः** = इन्द्रः शातयिता यस्य सः वृत्रः।

एवं समासभेदे सति स्वरभेदो दृश्यते। कदाचित् समासे समाने सत्यपि पदभेदेन स्वरभेदो दृश्यते। समुदायार्थस्य प्राधान्यमतिरिच्य अवयवार्थस्य अनुसारमपि समासे स्वरव्यवस्था अन्वाख्याता दृश्यते।

**10. अर्थभेदेन स्वरभेदः –** सिद्धान्तोऽयं विपश्चितां स्थापितो मतः। अस्य सिद्धान्तस्य प्रतिपक्षत्वेनैव संस्कारानुसारिणी स्वरव्यवस्था उपर्युक्तैः नवभिः हेतुभिः अन्वाख्याता। कदाचित् स्वरः अर्थविशेषे विहितस्य प्रत्ययस्य ज्ञापको भवति। यथाहि– 'विद् ज्ञाने' धातोः 'करणार्थे' घञ् प्रत्यये कृते निष्पन्नस्य **'वेद'** शब्दस्य अन्तोदात्तत्वम् अन्वाख्यायते। यथाहि– **'वेदोऽसि वित्तिरसि'** **वेदः असि** – पूर्वरूपसन्धौ **'स्वरितो वाऽनुदात्ते पदादौ'** सूत्रेण स्वरितो भवति। अत्र 'वेद' शब्दः दर्भमुष्टिवाचकः यागकरणार्थः। 'भावार्थे' घञि प्रत्यये कृते निष्पन्नस्य **'वेद'** शब्दस्य आद्युदात्तत्वम् अन्वाख्यायते। यथाहि– **'वेदा वा एते; अनन्ता वै वेदाः।'** वेदोऽपि यद्यपि प्रमाणत्वाद्यागकरणं तथापि वेदयतीति वेदः, आचार्यो वेदः इत्युक्तत्वात् कर्तृत्वं विवक्षितं न करणत्वमिति।

उपसंह्रियते चर्चेयम् अनेन एव यत् आचार्यपाणिनिद्वारा शब्दान्वाख्याने यानि उपकरणानि वर्णागम-वर्णविकार-वर्णनाश-अर्थातिशयादीनि प्रयुक्तानि सन्ति तान्येव उपकरणानि पदस्य मूलस्वरस्य हेतुकानि सन्ति। अतः सन्धि-समास-तद्धित-कृदादिप्रकरणेषु एव तत्तच्छब्दसंस्कारान्वाख्यानेन सहैव तत्तच्छब्दस्वरान्वाख्यानमपि अन्वेष्टव्यं भवेत् येन निरायासेन स्वर-प्रक्रिया अवबुद्धा भवेत्।

*

## सन्दर्भाः

1. अनुदात्तं पदमेकवर्जम्। अष्टा., 6.1.158
2. पाणिनिना 'देवताद्वन्द्वे च; नोत्तरपदेऽनुदात्तादावपृथिवीरुद्रपूषमन्थिषु' (अष्टा., 6.2.141–142) सूत्राभ्यां विधिरपवादश्च अन्वाख्यायेते।
3. 'संख्या; आचार्योपसर्जनश्चान्तेवासी' (अष्टा., 6.2.35–36) इत्यादीभिः सूत्रैः व्यवस्थेयं अन्वाख्याता।
4. यथाहि–इन्द्रशत्रुः = इन्द्रस्य शातयिता वृत्रः।

*

# काशिकावृत्तौ चान्द्रव्याकरणस्य प्रभावः

**डॉ. प्रतिभा आर्या**

पाणिनिव्याकरणपरम्परायां काशिकावृत्तिः प्रमुखं स्थानं लभते। काशिकावृत्तौ महाभाष्यवार्त्तिककाराभ्यामतिरिक्तोऽपि नवीनः प्रयोगः नूतनानि उद्धरणानि इष्ट्युपाख्यानानि च प्राप्यन्ते। काशिकायामेतादृशानि बहूनि उदाहरणानि स्थलानि च विद्यन्ते येषां प्रयोगः अन्यत्र नोपलभ्यते। काशिकायामेतादृशाः बहवः प्रयोगाः सन्ति येषां सिद्धये ग्रन्थकारेण नूतनानि इष्ट्युपाख्यानानि विरचितानि तानि प्रयोगबाहुल्यानि सन्ति ऐतिहासिकदृष्ट्या सुसमृद्धानि च। काशिकावृत्तेः व्याख्यानेन एतदपि स्पष्टमवगम्यते यत् पाणिनिपरम्परायाः संरक्षणं तथा एतदतिरिक्तानि विस्तृतानि प्रयोगबहुलानि साधुत्वसिद्धिरपि काशिकावृत्तेः महदुद्देश्यमासीत्। अत एव वृत्तावस्यां पाणिनीयेतरव्याकरणानां प्रभावो लक्ष्यते। सन्ति एतादृशाः प्रयोगाः येषां सिद्धये ग्रन्थकारेण पाणिनीयेतरव्याकरणानां पक्षः स्वीकृतः।

वृत्तावस्यां बहूनां पाणिनीयेतरव्याकरणानां प्रभावो दृश्यते परमत्र चान्द्रव्याकरणस्य कश्चित् प्रभावो विचार्यते।

काशिकावृत्तेः कालः विद्वद्भिः षष्ठशताब्दी स्वीक्रियते।[1] तथा च पञ्चमशतके चन्द्रगोमिनामकेन बौद्धपण्डितेन चान्द्रव्याकरणस्य रचना कृता।[2] अतः काशिकातः पूर्ववर्ति वर्तते चान्द्रव्याकरणम्। अत एव काशिकाया उपरि चान्द्रव्याकरणस्य प्रभावः भवितुमर्हति। सन्ति अत्र बहूनि स्थलानि यत्र काशिकाकारैः महाभाष्यमपि अस्वीकृत्य चान्द्रव्याकरणमेव साहाय्यरूपेण अथवा प्रमाणरूपेण स्वीकृतम्। तथा च कुत्रचित् काशिकाकारः नूतनप्रयोग-सिद्धये चान्द्रव्याकरणमेव स्वीकरोति।

काशिकायां चान्द्रव्याकरणस्यः प्रभावः बहुदृष्टिभिः द्रष्टुं शक्यते। प्रथमस्तावत् सूत्रेषु कृतः तथा यथा चन्द्राचार्येण वार्त्तिकानां वार्त्तिकांशानाञ्च समावेशः सूत्रेषु काशिकाकारेणापि कुत्रचित् सूत्रेषु एवं कृतः। सन्ति बहूनि स्थलानि यत्र पाणिनीयसूत्रेषु परिवर्तनं परिवर्धनं च द्रष्टुं शक्यन्ते काशिकावृत्तौ चान्द्रव्याकरणे च।

| क्र.सं. | पाणिनिसूत्रम् | चान्द्रव्याकरणसूत्रम् | काशिकाकारसूत्रम् |
|---|---|---|---|
| 1. | ग्रामजनबन्धुभ्यस्तल् 4.2.43 | ग्रामजनगजबन्धुसहायात्तल् 3.1.59 | ग्रामजनबन्धुसहाभ्यस्तल् गजाच्चेतिवक्तव्यम् वा. 4.2.43 |
| 2. | समो गम्यृच्छिभ्याम् 1.3.29 | समो गमृच्छिप्रच्छिस्वृश्रुवेत्यर्ति-दृशः 1.1.62 | समो गम्यृच्छिप्रच्छिस्वरत्यर्ति-श्रुविदिभ्यः 1.3.29 |
| 3. | टिड्ढाणञ्-द्वयसज्दघ्नञ्मात्रच्तयप्-क्ठञ्कञ्क्वरपः 4.1.15 | टिड्ढाणञ्ठक्ठञ्नञ्स्नञ्कञ्क्वर-ख्युनः 2.4.17 | टिड्ढाणञ् ... क्वरपः 4.1.15 |

अपरस्तावत् प्रत्याहारसूत्रेषु बहुत्र चान्द्रव्याकरणस्य शब्दशः अनुकरणं दृश्यते। यथा–

**चान्द्रवृत्तौ–** अइउण् इति प्रत्याहारसूत्रे अ इ उ इत्यनेन क्रमेण वर्णानुपदिश्यान्ते णकारमितं करोति प्रत्याहारार्थम्। तस्योच्चारणं भवत्येकेन ऋकोऽणो रलौ च (चा 1.1.15) इत्यकारेण। (चान्द्र अइउण् (प्र.सू. 1) वृत्तिः।

**काशिकावृत्तौ–** अइउण् इति प्रत्याहारसूत्रे अ इ उ इत्यनेन क्रमेण वर्णानुपदिश्यान्ते णकारमितं करोति प्रत्याहारार्थम्। तस्य ग्रहणं भवत्येकेन उरण् रपरः (पा. 1.1.51) इत्यकारेण। (अइउण् प्र. सू. 1 वृत्तिः)।

'हल्' इति प्रत्याहारसूत्रे–

**चान्द्रवृत्तौ–** 'ह' इत्येकं वर्णमुपदिश्य पूर्वाश्चान्ते लकारमितं करोति प्रत्याहारार्थम्। तस्योच्चारणं भवति षड्भिः– **शिदनेकाल् सर्वस्य** (चा. 1.1.12) इत्यकारेण- इत्यादि (हल् प्र.सू. 13)

**काशिकावृत्तौ–** 'ह' इत्येकं वर्णमुपदिश्य पूर्वाश्चान्ते लकारमितं प्रत्याहारार्थम्। तस्य ग्रहणं भवति षड्भिः– '**अलोऽन्त्यात्पूर्व उपधा**' (पा.सू. 1.1.65) इति अकारेण– इत्यादि (हल् प्र. सू. 14)

एवं प्रकारेण सर्वेषां प्रत्याहारसूत्राणां वृत्तौ सादृश्यं दृश्यते।

ञमङणनम् इति प्रत्याहारसूत्रस्य वृत्तौ 'केचित्तु सर्वाण्येतानि प्रत्याहारग्रहणानि अकारेणैव भवन्त्विति मकारमनुबन्धं प्रत्याचक्षते' इति वाक्यं काशिकावृत्तौ चान्द्रव्याकरणे च समानमेव दृश्यते। एवं द्रष्टुं शक्यते यत् काशिकाकारेण चान्द्रव्याकरणस्य शैली अपि अनुकृता तथा शब्दसाम्यमपि अनुगृहीतम्।

सूत्राणां व्याख्यानक्रमे सूत्राणां प्रयोजनप्रतिपादनावसरे वैयर्थ्यस्य च प्रतिपादने उभयत्र समाना दृष्टिः अवलोक्यते। यथा आशंसायां भूतवच्च, क्षिप्रवचने लृट्, आशंसावचने लिङ्, नानद्यतनवत् क्रिया प्रबन्धसामीप्ययोः, भविष्यति मर्यादावचनेऽवरस्मिन् (3.3.132–136) इति प्रकरणमिदं चान्द्रवृत्तौ आचार्येण परित्यक्तम्। काशिकावृत्तौ अपि चान्द्रव्याकरणस्य अनुसरणं कृत्वा काशिकाकारेण इदं प्रकरणं व्यर्थं समर्थितम् यथा वर्त्तमानसामीप्ये वर्त्तमानवद्वा (3.3.131) इति सूत्रे काशिकाकारः लिखति– 'यो मन्यते गच्छामीति पदं वर्त्तमाने काल एव वर्त्तते। कालान्तरावगतिस्तु वाक्याद्भवति। न च वाक्यगम्यः कालः पदसंस्कारवेलायामुपयुज्यत इति तादृशं वाक्यार्थप्रतिपत्तारं प्रति प्रकरणमिदं नारभ्यते।'

काशिकाकारः काशिकावृत्तौ सूत्रव्याख्यानक्रमे चान्द्रव्याकरणस्य अभिमतं स्वीकरोति इति अवलोकयामः किञ्चित् सूप्रदर्शनेन। यथा –

**काशिकावृत्तौ–** 'इन्धिभवतिभ्यां च' (1.2.6) इत्यत्र एका इष्टिः वर्तते– 'श्रन्थिग्रन्थिदम्भिस्वञ्जीनामिति वक्तव्यम्' श्रेथतुः, श्रेथुः, ग्रेथतुः, ग्रेथुः, देभतुः, देभुः, परिषस्वजे।' परिषस्वजाते इति। अस्मिन् सन्दर्भे चान्द्रव्याकरणेऽपि 'लिटीन्धिश्रन्थग्रन्थानाम्' (5.3.25) 'दम्भः स्सनि च' (5.3.26) 'स्वञ्जः' (5.3.27) इति त्रिभिः सूत्रैः सर्वाण्युदाहरणानि काशिकासदृशानि सिद्धानि। अत्र भट्टोजिदीक्षितेन सिद्धान्तकौमुद्यां 'श्रन्धिग्रन्थिदम्भिस्वञ्जीनां लिटः कित्वं वा इति व्याकरणान्तरम्, देभतुः, सस्वजे इति भाष्योदाहरणादेकदेशानुमत्या इहाप्याश्रीयते' इत्युक्तम्। अतः सूत्रेऽस्मिन् काशिकाकारेण प्रयोगसिद्धये चान्द्रव्याकरणस्यानुसरणं कृतमिति सम्भाव्यते।

काशिकायां 'एतिस्तुशास्वृदृजुषः क्यप्' (3.1.109) इत्यत्र 'शंसिदुहिगुहिभ्यो वेति वक्तव्यम्' इति वार्त्तिकं पठितम्। येन शस्यम्, शंस्यम्, दुह्यम्, दोह्यम्, गुह्यम्, गोह्यम्, इति रूपसिद्धिः दर्शिता। महाभाष्ये तु 'ईडवृन्दवृशंसदुहां ण्यतः' (6.1.124) सूत्रेण शंसेः सिद्धिः कृता। चान्द्रव्याकरणेऽत्र 'कृवृषिमृजिशंसिदुहिगुहः' (1.1.125) इति सूत्रेण प्रयोगाः सिद्ध्यन्ते। अतः तत्तत्प्रयोगाणां सिद्धये काशिकावृत्तेरुपसंख्यानं चान्द्रव्याकरणस्यानुसरणं दृश्यते।

काशिकायां 'विभाषा ग्रहः' (3.1.143) इत्यत्र 'भवतेश्चेति वक्तव्यम्' भवतीति भावः, भवः इति व्याख्यानं दृश्यते। महाभाष्ये अव्याख्यातं सूत्रमिदम्। चान्द्रे 'भुवो वा' (1.1.151) भवतेर्णो वा भवति भाव, भवः इति सूत्रव्याख्यानमुपलभ्यते। अतः अत्र चान्द्रव्याकरणस्यानुकरणं काशिकाकारस्य व्याख्यानं संभाव्यते। क्रमेऽस्मिन्

भट्टोजिदीक्षितेन सिद्धान्तकौमुद्यां भवतेश्चेति काशिका, भवो देवः संसारश्च, भावाः पदार्थाः, इत्युल्लिख्य काशिकाकारस्य व्याख्यानमेव स्वीकृतम्।

काशिकायां 'भुवश्च' (3.2.138) इत्यत्र चकारोऽनुक्तसमुच्चयार्थः– भ्राजिष्णुना, लोहितचन्दनेन इति व्याख्यानं दृश्यते। सूत्रमिदं महाभाष्ये अव्याख्यातम्। अत्र चान्द्रव्याकरणे 'प्रजनरुच्यपत्रपवृतुवृधुसहचरभ्राजः' (1.2.92) सूत्रेण भ्राजिष्णुः इति रूपसिद्धिः भवति। अत्र सिद्धान्तकौमुदीकारः 'चकारोऽनुक्तसमुच्चयार्थः' तेन 'भ्राजिष्णुः' इति काशिका इत्युल्लिख्य काशिकामतं स्वीकरोति।

काशिकावृत्तौ 'परिमुखं च' (4.4.29) इत्यत्र 'चकारोऽनुक्तसमुच्चयार्थः, पारिपार्श्विकः' इति व्याख्यानं दृश्यते। महाभाष्ये अनुपलब्धं सूत्रमिदम्। चान्द्रे 'परेर्मुखपार्श्वात्' (3.4.28) इति सूत्रेण पारिपार्श्विकः इति प्रयोगसिद्धिः भवति। अत्रापि काशिकावृत्तौ चान्द्रस्यानुसरणं दृश्यते।

काशिकावृत्तौ 'देवताद्वन्द्वे च' (7.3.21) इत्यत्र 'यो देवताद्वन्द्वः सूक्तहविःसम्बन्धी तत्रायं विधिः।' इति व्याख्यानं दृश्यते। महाभाष्ये अनुपलब्धम्। चान्द्रव्याकरणे 'देवतानां चार्थे सूक्तहविषोः' (6.1.31) इति सूत्रं वर्तते उभयत्रापि प्रायशः तुल्यमेव व्याख्यानम्।

काशिकायां 'एत्येधत्यूठ्सु' (6.1.89) इति सूत्रे एकं वार्त्तिकं वर्त्तते 'प्रादूहोढोढ्येषैष्येषु' प्रौढः, प्रौढिः, प्रेषः, प्रैष्यः इति रूपाणि सिध्यन्ति। अत्र महाभाष्ये सिद्धान्तकौमुद्यां च 'प्रादूहोढोढ्येषैष्येषु' (वा. 3605) प्रौहः, प्रौढः इति पाठः दृश्यते। चान्द्रव्याकरणे 'प्रादूढोढ्येषैष्येषु' (चा. 5.1.89) इति पाठः वर्त्तते। अत्रापि काशिकागतपाठः चान्द्रव्याकरणस्य पाठः समान एव। अत्रापि काशिकाकारेण चान्द्रव्याकरणस्यानुसरणं कृतं इति मन्ये।

एवञ्च बहूनि स्थलानि सन्ति यत्र काशिकायां चान्द्रव्याकरणस्य प्रभावः द्रष्टुं शक्यते।

*

## सन्दर्भाः


1. Systems of Sanskrit Grammar, S.K. Belalkar, p.29
2. Dictionary of Sanskrit Grammar, K.V. Abhyankar, p.140


*

# शुद्धाद्वैतवेदान्ते परतत्त्वसमीक्षणम्

**डा. सेविका नाग**

वल्लभवेदान्ते परतत्त्वं ब्रह्म वा वेदैकघोषितः सर्वभावसमर्थो भगवान् हरिः, वासुदेवो नारायणः स एव जगतः उत्पत्तिस्थितिविनाशानां कर्ता। तथा हि उच्यते अणुभाष्ये–

**उत्पत्तिस्थितिनाशानां जगतः कर्तृ वै बृहत्।**
**न हि श्रुतिविरोधोऽस्ति कल्प्योऽपि न विरुध्यते॥**
**वेदेन बोधितं तद्धि नान्यथा भवितुं क्षमम्।**
**सर्वभावसमर्थत्वादचिन्त्यैश्वर्यवद् बृहत्॥**[1]

स च सजातीयविजातीयस्वगतद्वैतवर्जितः अद्वितीयः[2] तथापि स स्वेच्छानुसारमगणितरूपधारणसमर्थः। सर्वाणि हि तानि रूपाणि भगवतो वासुदेवस्य नारायणस्यैवेति तत्र न द्वैतसम्भावना वर्तते। अतः वल्लभाचार्यानुसारं, ब्रह्मणो मायायाश्च निर्देशेन, शंकरस्याद्वैतनिर्देशो नाद्वैतनिर्देशः अपि तु अद्वैतविवेचने प्रकारान्तरेण द्वैतनिर्देश एव। अत एव मायाराहित्येन वल्लभः स्वकीयमद्वैतं शुद्धाद्वैतं कथयति–

**मायासम्बन्धरहितं शुद्धमित्युच्यते बुधैः।**
**कार्यकारणरूपं हि शुद्धं ब्रह्म न मायिकम्॥**[3]

एतेन वल्लभो ब्रह्म 1. कारणरूपेण 2. कार्यरूपेण 3. स्वरूपेण चेति रूपत्रयेण निर्दिशति। तत्र सृष्टेः प्राक् ब्रह्मणः स्थितिः कारणरूपब्रह्मणः स्थितिः। सृष्टिरूपे विविधनामरूपात्मकजगत्स्वरूपब्रह्मणः स्थितिः कार्यरूपब्रह्मणः स्थितिः। ब्रह्मणो वास्तविकस्वरूपेण सच्चिदानन्दस्वरूपेण स्थितिः स्वरूपेण स्थितिः। पुनरपि ब्रह्मणः स्वरूपं रूपत्रये वर्णितमुपलभ्यते। यथा– 1. क्रियारूपे 2. ज्ञानरूपे 3. क्रियाज्ञानरूपे च– 'ज्ञानक्रियाविशिष्ट एव तदर्थरूप इति त्रिविधः अपि प्रमाणानुरोधिप्रमेयात्मस्वरूपकोटिः।[4] स चासंख्यदिव्यगुणसम्पन्नः– 'एकं ज्योतिर्बहुधा विभाति।'[5] तथा च श्रुतिः– 'परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च।'[6]

वल्लभेन अधिकांशस्थानेषु ब्रह्म सर्वकर्म–सर्वकाम–सर्वगन्धादिगुणसम्पन्नं निर्दिष्टम्। अन्यगुणापेक्षया ऐश्वर्यं, वीर्यं, यशः, श्रीः, ज्ञानं, वैराग्यं च विशेषतया वर्णनीयम्। तस्य च अगणितगुणेषु परिगणितगुणो जीवः कतिपयानेव गुणान् ज्ञातुं शक्नोति, न सर्वान्। ब्रह्म साकारं, न निराकारम्। तच्च दिव्यरूपगुणसम्पन्नम्, आकाशवद् व्यापकम्। अज्ञानवशेन तत् सीमितं प्रतीयते। तत् हस्तपदादियुक्तं तथापि तदीयं शिरोमुखादि सर्वतो वर्तते। तथाहि–

**आकाशवद् व्यापकं हि ब्रह्म मायांशवेष्टितम्।**
**सर्वतः पाणिपादान्तं सर्वतोऽक्षिशिरोमुखम्।।**
**सर्वतः श्रुतिमल्लोके सर्वमावृत्य तिष्ठति।**
**अनन्तमूर्ति तद् ब्रह्म ह्यविभक्तं विभक्तिमत्।।**[7]

वल्लभवेदान्ते ब्रह्म सर्वविरुद्धधर्माश्रयम्– विचित्रशक्तिसम्पन्नमिति भावः। तच्च सर्वं भवितुं समर्थम् इति 'आत्मनि चैव विचित्राश्च हि' इति सूत्रे अणुभाष्यं कथयति 'विचित्रशक्तियुक्तत्वात् सर्वभवनसमर्थत्वाच्च।' तच्चासंख्यानन्त्यमूर्तितर्कबोधागम्यं चास्ति। तथाहि–

**अनन्तमूर्ति तद्ब्रह्म कूटस्थं चलमेव च।**
**विरुद्धसर्वधर्माणामाश्रयं युक्त्यगोचरम्।।**[9]

तस्य चेयं विरुद्धधर्माश्रयता, 'अपाणिपादो जवनो[10] ग्रहीता', 'अणोरणीयान् महतो महीयान्'[11] तथा 'आसीनो दूरं व्रजति शयानो याति सर्वतः'[12] इत्यादिश्रुतिषु प्रतिपादिता। 'एतेन सर्वेण एतदेवायाति यद्ब्रह्मविषये न किमपि असम्भवं वर्तते। इत्थं च श्रुतिषु यत् सविशेषब्रह्मणः, तस्य सर्वधर्माश्रयतायाः, निर्विशेषतायाश्च वर्णनमुपलभ्यते तेन नैतदायाति यत् श्रुतिवाक्यं दोषपूर्णम् अपि तु एतदेव तत्तात्पर्यं यद्ब्रह्म स्वयं प्रत्येकधर्मसम्पन्नम्। एतदेव च 'सर्वोपेता च तद्दर्शनात्'[13] तथा 'सर्वधर्मोपपत्तेश्च'[14] इत्यादिसूत्रेषु वर्णितम्। रामानुजाचार्येण 'कृत्स्नप्रसक्तिः...'[15] इत्यादिसूत्रतः 'आत्मनि चैवं विचित्राश्च हि'[16] इति सूत्रत्रये ब्रह्मणो विचित्रशक्तिसम्पन्नत्वं प्रतिपादितमिति प्रत्येकमसम्भवमपि वस्तु तत्कृते सम्भवम्। ब्रह्मणः सर्वविरुद्धधर्माश्रयत्वं च वल्लभस्य स्वकीया मौलिकविचारधारा।

ब्रह्म हि सच्चिदानन्दस्वरूपम्। जडपदार्थेषु सद्रूपेण तद्वर्तते। चेतनपदार्थेषु च सच्चिद्रूपेण। सच्चिदानन्दस्वरूपं तु ब्रह्मैव–पूर्णानन्दैश्वर्यादयः प्रधानस्य धर्मिणो ब्रह्मण एव[17] धर्माः। एतच्छ्रुतिवाक्यान्यनुपदं प्रतिपादयन्ति तथाहि–'आनन्दं ब्रह्मणो विद्वान् न बिभेति कुतश्चन।[18] 'सत्यं ज्ञानमानन्दं ब्रह्म'[19], 'विज्ञानमानन्दं ब्रह्म।[20] वल्लभानुसारं

ब्रह्मणो मुख्यं रूपत्रयम्– 1. अन्तर्यामि 2. अक्षरम् 3. कृष्णश्च–अन्तर्याम्यक्षरं कृष्णो ब्रह्मभेदाँस्तथापरे।[21] एषु कृष्णो महत्तमः। परमात्मा पुरुषोत्तमश्चेत्याद्यस्य नामान्तरम्। आदिमस्वरूपं तु कृष्ण एव–'आदिमूर्तिः कृष्ण एव'[22] स च एव सर्वश्रेष्ठः– 'एको देवो देवकीपुत्र एव।'[23]

ब्रह्मसूत्राणां 'जन्माद्यस्य यतः'[24] इति सूत्रानुसारं ब्रह्म एव अस्य जगतः सृष्टिस्थितिलयकारणम्। एतच्च ब्रह्मणः तटस्थलक्षणं[25] द्योतयति न स्वरूपलक्षणम्। तत्तु सत्यं ज्ञानमनन्तं ब्रह्म इत्यस्ति। कारणं चैतस्यैतद्वर्तते यद् बादरायणः सांख्याभिमत-प्रकृतिकारणतामत्र निराकर्तुमिच्छति। एतदभिप्रेत्य एव तेन तल्लक्षणं प्रदत्तम्– 'निर्गुणस्य निर्धर्मकस्य च ब्रह्मणो जिज्ञासैव न सम्भवति।'[26] जन्माद्यधिकरणे सद्रूपं ब्रह्म, ईक्षत्यधिकरणे[27] च चेतनं ब्रह्म तथा आनन्दमयाधिकरणे[28] आनन्दस्वरूपं ब्रह्म जगतः कारणमुक्तमिति सच्चिदानन्दस्वरूपं ब्रह्म अस्य जगतो निमित्तोपादानोभयकारणमिति[29] जगतः तत्परिणामलक्षणत्वान्न तद्भिन्नत्वं सम्भवति।[30] शंकरस्योक्त्यनुसारमेव बादरायणस्या-द्यानि दश सूत्राणि एतत्सूचयन्ति यत् ब्रह्म सर्वज्ञं विभु च वर्तते। तदेव समस्तं विश्वं सृष्ट्वा तस्य स्थितिं संहृतिं च करोति। यदेतल्लक्षणमपरब्रह्मणः अस्ति। एवंभूतस्य तु परस्यापरस्य वा ब्रह्मणो निर्देशं न किमपि बादरायणस्य सूत्रं नापि च किमपि उपनिषद्वाक्यं करोतीत्येषा शङ्कराचार्यस्य स्वीया भावना। सर्वो जागतिकगुणक्रियादिर्मायामयत्वेन ब्रह्मणो विवर्त इत्यसत्यः इति वक्तुं नोचितम्। 'इदं सर्वं यदयमात्मा'[31], 'सदेव सोम्य इदमग्र आसीत्'[32], 'तदात्मानं स्वयमकुरुत'[33] इत्याद्यौपनिषद्वाक्यानि एतद्घोषयन्ति यत् समस्तस्य नामरूपात्मकजगतः क्रियादीनां चोपादानं कारणं ब्रह्मैव। नायमत्र निर्देशो यदिमानि वाक्यानि अपरब्रह्मणः सूचकानि। शङ्करः स्वयमेवैतत्स्वीकरोति यत् श्रुतिवाक्येषु सगुणनिर्गुणोभयविध-ब्रह्मणो निर्देशः विद्यते। सगुणवाक्यानि तु स एवमुक्त्वा निराकरोति यदिमानि अपरब्रह्मणः सूचकानि अविद्याक्षेत्रोपासनामात्रोपयोग्यानि च। शङ्करस्यैतत्कथनं न कथमपि युक्तिसंगतम्। यतो हि स वारं वारमेतत्स्वीकरोति यत् ब्रह्मज्ञानं श्रुतिवाक्येभ्य एव सम्भवति तर्कश्चात्र न सहायकः। अतो न कतमदपि श्रुतिवाक्यं निरर्थकं वक्तुं शक्यते। वस्तुतो न केषु अपि श्रुतिवाक्येषु पारस्परिकविरोधः, उभयविधान्यपि श्रुतिवाक्यानि प्रामाणिकानि सत्यानि च। अचिन्त्यस्वभावयुक्तं हि ब्रह्म। अन्यार्थसम्भवं सर्वं तत्र सम्भवति। अत एव भगवता रामानुजेनापि 'परे ब्रह्मणि तत्र तत्र अदृष्टाः सहस्रशः शक्तयः सन्तीति न किंचिदनुपपन्नम्[34] इति प्रतिपादितम्। 'तस्मात् सकलविरुद्धधर्मा भगवत्येव वर्तन्ते इति न कापि श्रुतिरुपचरितार्थेति सिद्धम्।'[35] औपनिषद्वाक्यान्यपि चैतत्प्रतिपादयन्ति यत्परमात्मनि सकलविरुद्धधर्माणां सम्भवः,

'वेदोक्ता धर्माः सर्वे ब्रह्मणि उपपद्यन्ते'[36]– इत्थं च तस्य परमात्मनः 'विचित्रशक्तियुक्तत्वात्सर्वभवनसमर्थत्वाच्च निर्गुणसगुणोभयविधब्रह्मप्रतिपादकत्वे अपि श्रुतिवाक्येषु न विरोधः।[37] शंकरस्य एषा आशंका वर्तते यत् समग्रस्य विश्वस्य तदीयपरिवर्तनस्य च सत्यत्वस्वीकारे ब्रह्मण्यपि तथात्वापत्तिरिति तदपि विनश्वरं सिद्ध्येत्। एनां शंकां समाधातुं स समग्रमपि जगत् मिथ्या प्रतिपादयति।

वल्लभमते च न किमपीह असामंजस्यम्। तस्येदं कथनं यदविकृतमेव ब्रह्म जगतो रूपं साधयति–अविक्रियमाणः आत्मानं करोतीति विरुद्धसर्वधर्माश्रयत्वं तु ब्रह्मणे भूषणाय। स्वर्णेन अगणितेष्वलंकारेषु निर्मितेष्वपि न स्वर्णे किमप्यन्तरमायाति। इत्थमेव ब्रह्मापि आत्मानमविकृतं स्थापयदपि जगद्रूपे परिणमयति। तज्जगतः अन्तर्यामि परात्परं च कारणम्। अपि च 'संराधने प्रत्यक्षानुमानाभ्याम्'[38] इत्यत्र संराधने स्पष्टतया ब्रह्मसाक्षात्कारप्रसङ्गः उल्लिखितः। ब्रह्मणो निर्विशेषत्वे ध्यानावस्थायां कस्य साक्षात्कारो भवेत्? संराधनकाले साक्षात्कृतमविद्याजन्यमिति तु वक्तुमनुचितं, स्वयं शङ्करेणापि हि स 'ज्ञानप्रसाद' उच्यते। अतस्तस्य प्रामाणिकत्वे न सन्देहः। वस्तुतस्तु यज्ज्ञानप्रसादं भक्तिं वा विना ब्रह्म सर्वथा अव्यक्तम्। तयोरन्यतरोत्पत्तिसमकालमेव तद्व्यक्तं सञ्जायते। भक्ताः परमात्मानं साक्षात्कुर्वन्ति इत्यत्र बह्वीनां श्रुतिस्मृतीनां प्रामाण्यम्–'तं पश्यते निष्कलं ध्यायमानः।'[39] 'भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन/ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परंतप'[40] परापरब्रह्मभेदं निराकर्तुं 'दर्शनाच्च'[41] तथा तदग्रिमसूत्रेषु 'नान्योतोऽस्ति द्रष्टा'[42], 'अथात आदेशो नेति नेति'[43] 'तदेतद् ब्रह्म अपूर्वमनपरमन्तरमबाह्यम्'[44] इत्यादिश्रुतिवाक्यानि समुपस्थापितानि। एवं निष्कर्षोऽयं प्रकटितः यद् ब्रह्मसूत्रेषु ब्रह्मनिर्देशकसूत्राणां शङ्कराभिप्रेतार्थः नितरां काल्पनिकः। यतो हि ब्रह्मणि सर्वधर्माणां सङ्गतिः।[45] तच्च सर्वशक्तिसम्पन्नम्।[46] जीवात्मदोषैस्तत् सर्वथा मुक्तम्।[47] श्रुतिषु च तन्निखिलविराड्रूपस्य वर्णनमुपलभ्यते।[48] तच्च सर्वेभ्यो महत्[49] अङ्गुष्ठमात्रं[50] च। प्राकृतिकगुणेभ्यस्तत्परम्।[51] नामरूपात्मकस्य सर्वस्य जगतः उत्पादकं तदेव।[52] संक्षेपेणैतद् यद् दृश्यमानमदृश्यमानं च एतत्सर्वं खलु ब्रह्मैव। शुद्धाद्वैतमार्तण्डे इत्थं संक्षेपेण ब्रह्मणः स्वरूपं प्रतिपादितम्–

**साकारं सर्वशक्त्येकं सर्वज्ञं सर्वकर्तृ च।**
**सच्चिदानन्दरूपं हि ब्रह्म तस्मादिदं जगत्।।**[53]

बादरायणस्य 'आत्मकृते परिणामात्'[54], 'कम्पनात्'[55], 'श्रुतेस्तु–शब्दमूलत्वात्'[56] इत्यादिसूत्राणाम् अणुभाष्यमपि पूर्वोक्तस्यैव समर्थकम्।

इत्थं ब्रह्मणः निर्गुणतायाः खण्डनं सगुणताया मण्डनं च कृत्वा वल्लभाचार्यः

पूर्वोक्तसूत्रेषु स्वमतमभिव्यक्तीकुर्वन् शङ्करमतमालोचितवान्। मायावादजालात् जनानां मुक्तिर्भवेदिति एव हि तदेतत्कर्तव्यस्य लक्ष्यमासीत्। इह वल्लभाचार्यस्य ब्रह्मविषयकमुख्यसिद्धान्त-विवेचनानन्तरम् अपराचार्यचतुष्टयेन सह तत्तुलनात्मकसमीक्षा एवापेक्ष्यते। यथा– शङ्कराभिप्रेतं ब्रह्म निर्गुणं निर्विशेषं च। अस्य विषयस्य वल्लभाचार्येण सह तीव्रविरोधो विहितः तथा शङ्करेण सह स्वकीयसिद्धान्तस्य तुलनात्मकांशं लेशमात्रमप्यनवधानेन तेन शङ्करः प्रत्येकप्रज्ञावसादस्योद्गम उक्तः। किं बहुना, येषु सूत्रेषु शङ्करेण सह वल्लभस्य अपराचार्यापेक्षया ऐकमत्यमपि वर्तते तदर्थमपि तेन शङ्करस्य आधमर्ण्यं नाभिव्यक्तीकृतम्। तुलनात्मकस्तरे इमौ द्वौ आचार्यौ अद्वैतवादिनौ– केवलाद्वैतवादी शङ्करश्च, शुद्धाद्वैतवादी वल्लभश्च। उभयार्थमप्येकं ब्रह्म, बाह्याभ्यन्तरद्वैतरहितं च। उभावप्येतत् स्वीकुरुतः यत्सांसारिकपरिवर्तनशीलता न कथमपि शुद्धे ब्रह्मणि प्रभवति। शङ्करस्यैतत्कथनं यत्सकलमेव परिवर्तनं विवर्तस्वरूपमिति न सत्यम्। वल्लभश्च सकलपरिवर्तनानामविकृतपरिणामत्वं स्वीकरोति येषां च ब्रह्मणो वास्तविकस्वभावे न कश्चित्प्रभावः। द्वयोरपि विचारयोर्महती समानता वर्तते, तथापि वल्लभस्य विचारा अपेक्षाकृताधिकपरिवर्धिताः परिमार्जिताश्च प्रतीयन्ते। व्यूहवादः विषयस्यास्योदाहरणम्– शङ्कराचार्येण पाञ्चरात्रद्वारा उपस्थापितो व्यूहवादः, तत्र भागवता मन्यन्ते–'भगवानेको वासुदेवो निरञ्जनज्ञानस्वरूपः। परमार्थतत्त्वं, स चतुर्धा आत्मानं विभज्य प्रतिष्ठितो वासुदेवव्यूहरूपेण,[57] संकर्षणव्यूहरूपेण, प्रद्युम्नव्यूहरूपेण, अनिरुद्धव्यूहरूपेण चेत्याद्यारभ्याग्रे 'भगवानेवैको वासुदेवः परमार्थतत्त्वं'[58] इत्यादिना खण्डितः। अत्याश्चर्यजनकस्तु विषयो यत् सत्यपि भागवते वल्लभेनात्र शङ्करः अनुसृतः। रामानुजमतेनापि अत्र पाञ्चरात्रपक्ष एव पुष्टिकरणीय आसीत्, किन्तु तद्वैषम्येन तेन व्यूहवादः खण्डितः। स च इत्थं 'उत्पत्त्यसंभवात्'[59] इति सूत्रे भागवतमते कंचिदंशं निराकरोति। ते चतुर्व्यूहोत्पत्तिं वदन्ति। 'वासुदेवात्संकर्षणः'[60] इत्यादि प्रतिपाद्य अग्रे 'तल्लोके न सिद्धम्'[61] 'अनेकेश्वरत्वं च न युक्तम्'[62] इत्यादि प्रतिपादितं तथा चात्र तेन शङ्करमनुसृत्य स्पष्टतया भागवतसिद्धान्तः निरस्तीकृतः।

व्यूहसिद्धान्तो निम्बार्काचार्येण अपि अभ्युपगतस्तु उक्तसूत्राणां नितरां नूतनपद्धत्या व्याख्यां कुर्वता तेन तत्र शक्तिसिद्धान्तो निराकृतः अभ्युपेतः। एतत्सिद्धान्तानुसारं चेतनसाहाय्यमन्तरेण शक्तिः स्वातन्त्र्येण जगदेतद्रचयति। मध्वाचार्यस्यापि निम्बार्काचार्यानु-सारिणी व्याख्या दृश्यते।

शङ्करवल्लभयोर्विचारधारायां महान् भेदोऽत्यन्तमहत्त्वपूर्णोऽस्ति। शङ्कराचार्यः परमपरमिति प्रकारद्वयेन ब्रह्म आकलयति। वल्लभस्तु एतन्न स्वीकरोति, तन्मते वस्तुगत्या

एकमेव ब्रह्म। शङ्कराचार्यानुसारं ब्रह्मणश्चतूरूपम्। यथा– परब्रह्म, ईश्वरः, हिरण्यगर्भः, वैश्वानरश्चेति। तत्र सर्वप्रथमं परब्रह्म, अन्ते च त्रयं प्रतिरूपकम्। वल्लभेन एतत्सर्वं खण्डयित्वा उक्तं यद् ब्रह्म अगणितरूपाणि धारयितुं समर्थम्, सर्वाणि च तस्य रूपाणि वास्तविकानि। तथापि मुख्यरूपेण तद्रूपत्रयं धारयति। यथा– कृष्णः, अन्तर्यामी, अक्षरश्चेति। न एतेषु एकतममपि तु सर्वाणि एव रूपाणि वास्तविकानि। भेदस्य च महत्त्वपूर्ण एष विषयो यत् शङ्करानुसारं परब्रह्म निराकारं निर्गुणं निर्विशेषं चास्ते, वल्लभानुसारं तु तत्साकारं सगुणं सविशेषं च। अतः शङ्करस्य ब्रह्म केवलं ज्ञानस्वरूपमनन्तं निर्गुणं तथा वल्लभस्य ब्रह्म आनन्देन चैतन्येन च पूर्णं, लीलामयक्रियादिसम्पन्नम्, नित्यनूतनं चास्ति। तस्य प्राप्तिश्च लघीयस्तः महीयसापि कर्तुं शक्यते। शङ्करानुसारेण ज्ञानमेव मोक्षस्य साधनम्। भक्तेस्तत्राप्राधान्यम्। मोक्षे जीवात्मा परमात्मन्येकीभूय तादात्म्यमनुभवतीति तद्वैयक्तिकतापार्थक्यं विनश्यति। वल्लभस्य मते तु मोक्षस्य प्रधानं साधनं हि भक्तिः। मोक्षावस्थायामपि जीवानां वैयक्तिकतापार्थक्यं न विनश्यति। तदानीं ते कृष्णस्य अनन्तलीलायां भागं गृह्णन्ति, तेन चापरमितानन्दमनुभवन्ति। शङ्कराचार्यमते ब्रह्म उदासीनः, वल्लभस्य मते तु ब्रह्म दुःखपूर्णं हृदयमाश्वासयति, जीवने प्रगतिमुत्तेजनां चोपादयति।

एतत्तु प्रायः सर्ववेदान्तिजनविदितं यद्रामानुजवल्लभयोर्वैष्णवाचार्ययोरत्यन्तसमानता स्पष्टतया विद्यते। उभावपि भक्तिमार्गपोषकौ ज्ञानकर्मविरोधिनौ च वैष्णवौ। उभाभ्यामपि शङ्करस्य मायावादः खण्डितः। जडं चेतनं च जगदुभयोर्मते सत्यम्। उभावपि एतदाकलयतो यज्जीवात्मा यद्यपि परमात्मवदेवास्ति तथापि तेन परमात्मा पूजनीयः। उभयोरपि मते मुक्तावस्थायामपि जीवात्मनो वैयक्तिकता न विनश्यति। स परमात्मनः समीपे स्थितः अनिर्वचनीयानन्दमनुभवति। रामानुजेन सह स्वकीया इमाः समानताः स्वीकृत्य वल्लभाचार्यो न कथमपि रामानुजमालोचयति, प्रत्युत तं प्रति मौनसम्मानमभिव्यनक्ति। तथापि अनयोर्बहुष्वंशेषु महत्त्वपूर्णो भेदः दृश्यते। यथा– रामानुजाचार्यानुसारं ब्रह्म पञ्चसु रूपेषु प्रकाशितमस्ति। 1. परब्रह्म– वासुदेवो नारायणो वा उच्यते। स च लक्ष्म्या वैकुण्ठे वसति। 2. वासुदेव इत्यादयश्चत्वारो व्यूहाः। 3. विभवः 4. अन्तर्यामी 5. अर्चावतारश्च।[63] अपि च वल्लभानुसारं ब्रह्म मुख्यतः रूपत्रयेणाविर्भवति। यथा– 1. कृष्णः, पुरुषोत्तमोऽयमप्युच्यते। स च व्यापी वैकुण्ठे निवसति, स च साधारणवैकुण्ठादुपरि वर्तते। तत्र परमात्मा दिव्यवृन्दावने स्वभक्तैः सह स्वकीयानन्तलीलायां संलग्नस्तिष्ठति। 2. अन्तर्यामी 3. अक्षरश्चेति। अनयोः ब्रह्मणः वर्गीकरणे मुख्यभेदोऽयं यद्रामानुजस्य परब्रह्म नारायणः। स चाधिकशान्तः गौरवपूर्णश्च। वल्लभस्य च परब्रह्म कृष्णः, स

चतिकोमलहृदयः लीलामयः, यो निजभक्तैः सह विहरति क्रीडति। स स्वकीयमहत्त्वमेतदर्थं गोपायति यत्संसारिणो जीवाः तदलौकिकतेजसा अभिभूता न भवेयुः।

निम्बार्काचार्यवल्लभाचार्ययोराधिक्येन साम्यं विद्यते। उभावपि ज्ञानमार्ग–कर्ममार्गविरोधिनौ, भक्तिमार्गोपदेशकौ, मायावादखण्डकौ, वैष्णवौ, जीवात्मानं ब्रह्मणः पृथक् जगतः सत्यत्वं च प्रतिपादयतः। मुक्तावस्थायामपि जीवात्मनो वैयक्तिकता पृथगेव तिष्ठति, श्रीकृष्णेन सह अलौकिकानन्दं चानुभवति। शुद्धाद्वैतमार्तण्डावलोकनेन एवं ज्ञायते यन्निम्बार्कसिद्धान्तः अधिकांशतो वल्लभसिद्धान्तेन साम्यमुपैति। एतच्च वल्लभपुरुषोत्तमाभ्यामित्थं स्वीकृतम्–

**भेदाभेदप्रतीतिस्तु मध्यमानां प्रकीर्तिता।**
**अतो हि मध्यमः पक्षः शुद्धाद्वैतानुरोधतः॥**
**बोधाय बहुसन्दर्भे गोस्वामिपुरुषोत्तमैः।**
**श्रीमदाचार्यचरणैर्यत्र कुत्रापि दर्शितः॥**[64]

अतः शुद्धाद्वैतवेदान्ते परतत्त्वं परमानन्दः पूर्णपुरुषोत्तमः श्रीकृष्ण एव। अतः निखिलनिगमागमाधिगम्यमानस्वरूपः परब्रह्मश्रीकृष्ण एव प्रापणीयोऽयमेव परमपुरुषार्थः शुद्धाद्वैतब्रह्मवाद इति। तत्प्राप्तिः भक्त्या विना न सम्भवतीति 'नायमात्मा बलहीनेन लभ्यः' इति श्रुतेः। अत्र बलं भक्तिरिति। अतः शुद्धपुष्टिभक्तौ स्नेह एव नियामकः। निरुपधिकस्नेहात्मिका भक्तिरेव सर्वात्मभावस्तत्र।

*

## सन्दर्भाः


1. ब्रह्मसूत्रम्, 1.1.2–3, अणुभाष्यम् द्रष्टव्यम्।
2. तत्त्वार्थदीपनिबन्धः, 1.66
3. शुद्धाद्वैतमार्तण्डः, 28
4. प्रस्थानरत्नाकरः, पृ. 134
5. अथर्ववेदः, 3.3.17
6. श्वेताश्वतर–उपनिषद्, 3.8
7. तत्त्वार्थदीपनिबन्धः, 1.25–26
8. ब्रह्मसूत्रम्, 2.1.28
9. तत्त्वार्थदीपनिबन्धः, 1.71

10. श्वेताश्वतर–उपनिषद्, 3.19
11. तदेव, 3.20
12. कठ–उपनिषद्, 2.20
13. ब्रह्मसूत्रम्, 2.1.30
14. तदेव, 2.1.37
15. तदेव, 2.1.26
16. तदेव, 2.1.28
17. तदेव, 3.3.11, अणुभाष्यं द्रष्टव्यम्।
18. तैत्तिरीय–उपनिषद्, 2.4.1
19. तदेव, 2.1.1
20. बृहदारण्यक-उपनिषद्, 3.9.28
21. तत्त्वार्थदीपनिबन्धः, 2.121
22. तदेव, 1.13
23. तदेव, 1.4
24. ब्रह्मसूत्रम्, 1.1.2
25. कार्यलक्षणम्।
26. ब्रह्मसूत्रम्, 1.1.2, अणुभाष्यं द्रष्टव्यम्।
27. तदेव, 1.1.4–10
28. तदेव, 1.1.11–18
29. न जडप्रकृतिर्नापि चेतनो जीव इति तात्पर्यम्।
30. तस्माद्ब्रह्मपरिणामलक्षणं कार्यम्– ब्रह्मसूत्रम्, 1.4.26, अणुभाष्यम्।
31. बृहदारण्यक-उपनिषद्, 2.4.6
32. छान्दोग्य-उपनिषद्, 6.2.1
33. तैत्तिरीय–उपनिषद्, 2.7
34. ब्रह्मसूत्रम्, 2.1.28, श्रीभाष्यं द्रष्टव्यम्।
35. तदेव, 2.1.27, अणुभाष्यं द्रष्टव्यम्।
36. तदेव, 2.1.37, तत्रैव।
37. तदेव, 2.1.28, तत्रैव।
38. ब्रह्मसूत्रम्, 3.2.24
39. मुण्डक–उपनिषद्, 3.1.8
40. श्रीमद्भगवद्गीता, 11.54
41. ब्रह्मसूत्रम्, 3.2.21
42. बृहदारण्यक-उपनिषद्, 3.7.23
43. तदेव, 2.3.6
44. तदेव, 2.5.19
45 'सर्वधर्मोपपत्तेश्च'–ब्रह्मसूत्रम्, 2.1.37
46. 'सर्वोपेता च'–ब्रह्मसूत्रम्, 2.1.30
47. 'अदृश्यत्वादिगुणको..' ब्रह्मसूत्रम्, 1.2.21
48. 'रूपोपन्यासाच्च'–ब्रह्मसूत्रम्, 1.2.23
49. 'भूमासम्प्रसादाद्'–ब्रह्मसूत्रम्, 1.3.8
50. 'शब्दादेव प्रमितः' ब्रह्मसूत्रम्, 1.3.24
51. 'प्रकृतैतावत्त्वं हि' ब्रह्मसूत्रम्, 3.2.22
52. 'संज्ञामूर्तिक्लृप्तिस्तु'-ब्रह्मसूत्रम्, 2.4.20
53. शुद्धाद्वैतमार्तण्डः, 8
54. ब्रह्मसूत्रम्, 1.4.23
55. तदेव, 1.3.36
56. तदेव, 2.1.27
57. तदेव,2.2.42, शाङ्करभाष्यं द्रष्टव्यम्।
58. तदेव,2.2.44, शाङ्करभाष्यं द्रष्टव्यम्।
59. तदेव, 2.4.42
60. तदेव, अणुभाष्यं द्रष्टव्यम्।
61. तदेव, 2.2.43
62. तदेव, 2.2.44
63. 'एवं प्रकार ईश्वरः पर–व्यूह–विभवान्तर्याम्यर्चावताररूपेण पञ्चप्रकारः'–यतीन्द्रमतदीपिका द्रष्टव्या।
64. शुद्धाद्वैतमार्तण्डः, 34–36

*

# वेदेषु गुरुत्वाकर्षणसिद्धान्तः

**उज्ज्वलदासः**

विज्ञानस्य सर्वासु शाखासु एका मौलिकी शाखा अस्ति भौतिकविज्ञानम्। भौतिकविज्ञाने सर्वेषु चर्चितेषु विषयेषु गुरुत्वाकर्षणबलम् (Gravitational Force) इति सिद्धान्तोऽतिशेते। अस्य सृष्टजगतः सर्वाणि वस्तूनि तेषां द्रव्यमाणम् (Weight)इत्यनेन कारणेन परस्परमाकर्षन्ति, तदेव गुरुत्वाकर्षणबलमिति। द्रव्यमाणयुक्तेन केनचिद् वस्तुना अन्यद्वस्तु गुरुत्वाकर्षणबलेन आकृष्यते। अस्य गुरुत्वाकर्षणबलस्य कारणेनैव छायापथस्य अन्तो नक्षत्राणि भ्रमन्ति, पृथिवी सूर्यं परितो भ्रमति, पृथिवीं परितः चन्द्रो भ्रमति। पृथिव्या गुरुत्वाकर्षणबलं यदा अस्माकमुपरि कार्यं करोति तदेव अस्माभिः माध्याकर्षणबलम् (Gravity) इति उच्यते। एतद् माध्याकर्षणबलमस्मान् पृथिव्याः केन्द्रं प्रति उत अध आकर्षति। पृथिव्या आकर्षणेन वस्तूनि भूम्यां पतन्ति। किन्तु चन्द्रो भूम्यां किमर्थं न पतति? सौरजगतो ग्रहाः कथं न कक्षच्युताः? इति विविधाः प्रश्नाः श्रूयन्ते। एतेषां प्रश्नानामुत्तरमस्ति गुरुत्वाकर्षणबलमिति। गुरुत्वाकर्षणबलं भौतिकविज्ञानस्य विषयः तथापि वेदेषु गुरुत्वाकर्षणबलविषयेऽपि च तस्य प्रयोगविषये प्रत्यक्षरूपेण परोक्षरूपेण च वर्णना दृश्यते। प्रकृतेः रहस्यमतीव विस्मयकरम्। अस्माद् विस्मयादेव प्राचीनकाले ऋषि–मुनयः दार्शनिकाः तीक्ष्णमेधया प्रकृतेः रहस्योद्घाटनाय अपि च मानवजीवनस्योपरि प्रकृतेः महत्त्वं ज्ञातुं सर्वदा तत्परा आसन्। ते विद्वांसो बौद्धिकबलेन तार्किकबलेन च प्रकृतेः सर्वाणि तथ्यानि सूक्ष्मरूपेण विश्लिष्य सिद्धान्तं प्रति गच्छन्ति स्म। प्रकृतिः एव विज्ञानस्य प्रयोगक्षेत्रमिति मन्यते स्म। यद्यपि वेदेषु विज्ञानस्य विविधा विषया वर्णिताः सन्ति तथापि शोधलेखेऽस्मिन् भौतिकविज्ञानस्य गुरुत्वाकर्षणबलविषयेऽपि च तस्य प्रयोगविषये वर्णना क्रियते।

**कूटशब्दाः—**गुरुत्वाकर्षणबलम्, वेदः, पृथिवी, सूर्यः, जलम्, अग्निः, ऋतुपरिवर्तनम्, अहोरात्रः, भौतिकविज्ञानम्।

**प्रस्तावना—** संस्कृतसाहित्यस्य प्राचीनतमं निदर्शनं तथा सनातनधर्मस्य प्राचीनतमः

पवित्रो धर्मग्रन्थो वेदोऽस्ति। विद्–ज्ञाने इति धातोः करणकारके किञ्च अधिकरणकारके घञ्-प्रत्ययेन वेदशब्दो निष्पद्यते। भारतवर्षस्य चिरन्तनी मर्मवाणी अस्ति वेदः। अस्य देशस्य सर्वेषां धर्माणामुत्स एतेषु वेदेषु एव निहितोऽस्ति, एतेषु वेदेषु एव भारतीयानां सर्वेषां कर्मणां मीमांसा तथा सर्वेषां ज्ञानानां परिणतिः अवलोक्यते। भगवता मनुनोच्यते– **सर्वज्ञानमयो हि सः** इति। वैदिकाः पृथिव्यां प्रथमसामाजिका आसन् ये च तत्तत्कालानुसारं प्रयोगानुकुलं पदार्थमाविष्कृतवन्तः। यद्यपि ते आध्यात्मिकवादिनः सन्तः स्वदिव्यदृष्टिबलेन विश्वसर्जनतत्त्वं प्रत्यक्षीकृतवन्तः। वेदशास्त्रन्तु सर्वेषां ज्ञानविज्ञानानां बीजरूपं सूक्ष्म-रूपेणादधाति। बीजात्मकज्ञानस्य अङ्कुरोद्गम उत्तरोत्तरकाले भारतीयदार्शनिकैः भाष्य-व्याख्याकर्तृभिः बहुधा विश्लेषितः। यथा वेदेषु राजनीतिशास्त्रम्, आयुर्वेदः, अर्थशास्त्रम्, नीतिशास्त्रम्, समाजव्यवस्था, वर्णव्यवस्था, धर्मः चेत्यादीनां विषये वर्णना प्राप्यते तथैव विज्ञानस्य विविधाः शाखा यथा गणितशास्त्रम्, पदार्थविज्ञानम्, ज्योतिषशास्त्रम्, रसायनविज्ञानम्, शिल्पविज्ञानम्, पर्यावरणविज्ञानं चेत्यादिभिः शाखाभिः सह सम्बद्धानां विभिन्नानां विषयाणामपि वर्णना दृश्यते।

Isaac Newton, Galileo Galilei, Johannes Kepler इति सुप्रसिद्धा वैज्ञानिका गुरुत्वाकर्षणबलविषये विभिन्नं तत्त्वं सप्रमाणं प्रायोगिकञ्च तथ्यमुपस्थापितवन्तः Isaac Newtonइति 1687 ईशवीयाब्दे प्रकाशिते तस्य 'Philosophia Naturalis Principia Mathematica'इति ग्रन्थे गुरुत्वाकर्षणबलविषये स्वमतमुपस्थापितवान्। तस्य सूत्रमस्ति– Every particle of matter in the Universe attracts every other particle with a force which is directly proportional to the product of their masses and inversely proportional to the square of the distance between them.' अर्थाद् अस्मिन् ब्रह्माण्डे प्रत्येकं द्रव्यकणः अन्यं प्रत्येकं कणमेकेन बलेन आकर्षति यत् तेषां द्रव्यमाणस्य गुणफलस्य साक्षात् समानुपातिकं भवति तथा च तेषां दूरत्वस्य वर्गस्य विपरीतानुपातिकं भवति इति। गुरुत्वाकर्षणबलस्याविष्कारेण Isaac Newtonइति महोदयस्य अवदानमेव किं प्रधानमस्ति? तस्मात् पूर्वं किं केनापि अस्मिन् विषये न प्रत्यक्षीकृतम्? वैज्ञानिकः Isaac Newton इति सर्वप्रथमं गुरुत्वाकर्षणबलस्य गाणीतिकीं व्याख्यां प्रदत्तवान्। परन्तु तस्माद् बहुवत्सरात् पूर्वमेव वेदेषु गुरुत्वाकर्षणबलविषयेऽपि च गुरुत्वाकर्षणबलस्य प्रभावविषये प्रत्यक्षरूपेण किञ्च परोक्षरूपेण वर्णना प्राप्यते। वैदिककाले गुरुत्वाकर्षणबलम् (Gravitational Force) इति नाम नासीत्, तथापि गुरुत्वाकर्षणबलस्य प्रभावविषये मनुष्येषु पर्याप्तं ज्ञानमासीत्। वेदानां बहुषु मन्त्रेषु गुरुत्वाकर्षणबलविषये वर्णना प्राप्यते।

**नभोमण्डलीयवस्तुषु गुरुत्वाकर्षणबलम्–**

अस्मिन् महाविश्वे ग्रह-नक्षत्राणामिव कोटिः नभोमण्डलीयवस्तूनि सन्ति यानि परस्परस्य गुरुत्वाकर्षणबलस्य प्रभावेन शून्यमण्डले तिष्ठन्ति। अनेकेषां ग्रहाणाम् उपग्रह इति नभोमण्डलीयवस्तूनि सन्ति यानि निर्दिष्टे कक्षपथे ग्रहान् परित आवर्तयन्ति। अस्माकं सौरजगति बृहस्पतिः (Jupitar), शुक्रः (Venus), शनिः (Saturn), बुधः (Mercury),मङ्गलः (Mars), पृथिवी (Earth), प्लुटः (Pluto), इउरेनासः (Urenus), नेपचुनः (Neptune) च प्रभृतयो नव ग्रहा भिन्नेषु कक्षपथेषु सूर्यमावर्तयन्ति। सूर्यो गुरुत्वाकर्षणबलेन पृथिव्यादीन् ग्रहान् आकर्षयन् अस्ति। अतः पृथिव्यादयो ग्रहाः तेषां कक्षपथाद् विच्युता न भवन्ति। वेदानां बहुषु मन्त्रेषु अस्मिन् विषये वर्णना प्राप्यते। ऋग्वेद उच्यते– सर्वेषामाकर्षणस्य केन्द्रमस्ति सूर्यः।[3] एकस्मिन् मन्त्रे सूर्यस्य आकर्षणेन तं परितः पृथिव्याः परिक्रमणगतेः वर्णना प्राप्यते–

**अयं गौः पृश्निरक्रमीदसदन् मातरं पुरः।**
**पितरं च प्रयन्त्स्वः॥**[4]

अर्थाद् अयं गौः अर्थाद् भूगोलम् अन्तरिक्षे सूर्यस्याकर्षणेन तमभितो भ्रमति। अथर्ववेद उच्यते, पृथिवी कम्पमाना परिभ्रमति।[5] अनेन बोध्यते यत् पृथिवी स्वकक्षे 'लट्टु'वत् परिभ्रमन्ती सूर्यं परितः परिभ्रमति। सूर्यः आकर्षणबलेन द्युलोकं पृथिवीलोकं च स्व–स्व–स्थाने बध्नन्नस्ति अर्थात् परस्परेण सह संयोक्तुं न ददाति। तथाहि ऋग्वेदे– **सविता यन्त्रैः पृथिवीमरम्णादस्कम्भने सविता द्यामदृंहत्।**[6] अर्थात् सविता विभिन्नैः यन्त्रैः अर्थाद् गुरुत्वाकर्षणबलैः पृथिवीं सुस्थिरां कृतवान् किञ्च द्युलोकमुत द्युलोके स्थितान् ग्रह–नक्षत्रादीन् दृढरूपेण बध्नन्नस्ति। येन ग्रह–नक्षत्राणि स्व-स्व-स्थानाद् विच्युता न भवन्ति। अनेन ज्ञायते यद् वैदिकऋषीणां नभोमण्डलीयवस्तूनां गुरुत्वाकर्षणबलविषये पूर्णं ज्ञानमासीत्। वराहमिहिरस्य पञ्चसिद्धान्तिकायामपि पृथिव्याः स्थितिविषये वर्णना प्राप्यते–

**पञ्चमहाभूतमयस्तारागणपञ्जरे महीगोलः।**
**खेऽयस्कान्तान्तःस्थो लोह इवावस्थितो वृत्तः॥**[7]

अर्थाद् अन्तरिक्षे नक्षत्राणां पञ्जरे पञ्चमहाभूतयुक्ता पृथिवी चुम्बकमध्ये स्थितो लोहवत् स्थिता वर्तते। अनेन ज्ञायते यत् चुम्बकवद् नक्षत्राणामपि आकर्षणशक्तिः वर्तते। तया आकर्षणशक्त्या पृथिवी अन्तरिक्षे स्थिता वर्तते। अनेन ज्ञायते यद् वराहमिहिरोऽपि गुरुत्वाकर्षणबलविषये अवगत आसीत्।

**पृथिव्या गुरुत्वाकर्षणबलम्–**

द्रव्यमाणसम्पन्नवस्तुवत् पृथिव्यपि स्वस्या उपरि उत स्वां निकषा सर्वाणि वस्तूनि आकर्षति। पृथिव्या इदं गुरुत्वाकर्षणबलं माध्याकर्षणबलम् (Gravity) इति उच्यते। अतः पृथिवीपृष्ठे उत तां निकषा अवस्थितानां वस्तूनामुपरि स्वस्य केन्द्रं प्रति पृथिव्या आकर्षणबलमिदं माध्याकर्षणबलमिति। किमपि वस्तु उपरिष्टात् त्यजनेन अस्य बलस्य क्रियया ऋजुरूपेण अधः पृथिवीपृष्ठे पतति। पृथिव्या गुरुत्वाकर्षणशक्तेः तथा गतेः वर्णना अथर्ववेदे प्राप्यते–

**मल्वं बिभ्रती गुरुभृद्भद्रपापस्य निधनं तितिक्षुः।**
**वराहेण पृथिवी संविदाना सूकराय वि जिहीते मृगाय।।**[8]

अर्थाद् गुरुत्वाकर्षणबलस्य धारणक्षमतायुक्ता इयं पृथिवी उत्तमजलदातृभिः मेघैः सह युक्तस्य सूर्यस्य किरणैः स्वस्याः मलीनतां निवार्य सूर्यं परितो विशेषरूपेण गमनं करोति। अनेन ज्ञायते यद् वैदिका गुरुत्वाकर्षणशक्तिविषये ज्ञातवन्त आसन्। सिद्धान्तशिरोमणेः गोलाध्याये पृथिव्या गुरुत्वाकर्षणशक्तेः वर्णना प्राप्यते– पृथिव्या आकर्षणशक्तिः अस्ति। तया शक्त्या आकर्षितत्वाद् उपरिस्थं गुरुवस्तु पृथिव्यां पतति।[9] पृथिव्या आकर्षणशक्तिविषये पतञ्जलेः महाभाष्येऽपि वर्णना प्राप्यते– **लोष्टः क्षिप्तो बाहुवेगं गत्वा नैव तिर्यग्गच्छति नोर्ध्वमारोहति पृथिवीविकारः पृथिवीमेव गच्छति।**[10] अर्थात् क्षिप्तो मृत्तिकाखण्डो बाहुवेगं पूरयित्वा न तिर्यग्गच्छति, न चोर्ध्वं गच्छति, अपितु पृथिव्या विकारत्वादेव पृथिवीमेव आगच्छति। वेदेषु पृथिव्या माध्याकर्षणबलस्य प्रयोगविषये वर्णना प्राप्यते। जलमुच्चस्थानाद् निम्नस्थानं प्रति प्रवहति।[11] जलं सर्वदा अधः प्रवहति।[12] पर्वतस्य पृष्ठाद् जलधारा अधः प्रवहति।[13] वृष्टिः एकविधो द्रवपदार्थः, या माध्याकर्षणबलस्य आकर्षणेन भूपृष्ठे पतति। ऋग्वेद उच्यते– सुन्दरो गतिविशिष्टो जलहारिसूर्यरश्मिः सर्वं कृष्णवर्णं नियमितगतिञ्च मेघं जलेन पूरयित्वा आकाशे गमनं करोति। अनन्तरं वृष्टिः मेघात् पतित्वा पृथिवीं सिञ्चति।[14] अनेन ज्ञायते यद् वैदिकऋषयः पृथिव्या गुरुत्वाकर्षणबलविषयेऽपि च तस्य प्रभावविषये सम्यगवहिता आसन्।

**सूर्यस्य गतिशीलता–**

पुरा वैज्ञानिका वदन्ति स्म पृथिवी सूर्यं परितो भ्रमति। सूर्यः स्थिर इति ते वर्णनां कुर्वन्ति स्म। परन्तु आधुनिकैः विज्ञानिभिः वयं ज्ञातवन्तो यत् सूर्यो गतिशील इति।

सूर्यस्यापि एकः कक्षपथोऽस्ति। सूर्यो यस्मिन् छायापथे विचरति, तस्य छायापथस्य नाम 'मिल्की वे' इति। सौरजगतो ग्रहा यथा सूर्यं परितो भ्रमन्ति तथैव सूर्यः स्वात्मानं परितो भ्रमणेन सह अस्माकं 'मिल्की वे' इति छायापथस्य अन्तःस्थानात् स्वकीयेन कक्षपथेन 'ग्यालाक्टिक् सेण्टार' इत्येतत् परितः प्रदक्षिणं करोति। सूर्यस्य ग्रहाणां नक्षत्राणाञ्च भ्रमणाय प्रधानं कारणमस्ति गुरुत्वाकर्षणबलमिति। सृष्टेः अनन्तरमेव वैदिकऋषयः 'सूर्यो गतिशीलः' इति जानन्ति स्म। वेदानां बहुषु मन्त्रेषु सूर्यो गतिशील इति उच्यते। अथर्ववेद उच्यते– गतिशीलः सूर्यदेव अन्तरीक्षम्, पृथिवीं द्युलोकं च प्रकाशयति– **चित्रश्चिकित्वान् महिषः सुपर्ण आरोचयन् रोदसी अन्तरिक्षम्।**[15] अन्तरिक्षे चन्द्रमाः तथा च द्युलोके सूर्यो धावति।[16] गुरुत्वाकर्षणबलस्य कारणेनैव सूर्यः स्वीये कक्षपथे विचरति। तथाहि यजुर्वेदः–**सूर्यस्यावृतमन्वावर्ते।**[17] सूर्यः स्वीये कक्षपथे एकाकी एव सञ्चरति। तथा च यजुर्वेद– **सूर्य एकाकी चरति।**[18] पृथिवी सम्यगावर्तयति, उषा किञ्च सूर्योऽपि सम्यगावर्तयतः। इदं सम्पूर्णं जगदपि समावर्तनशीलम्। तथा च यजुर्वेदे–**समाववर्ति पृथिवी समुषाः समु सूर्यः। समु विश्वमिदं जगत्।**[18] इति। अनेन ज्ञायते यत् सूर्यस्य गतिविषयेऽपि वैदिकऋषीणां पूर्णं ज्ञानमासीदिति।

**अग्नेः ऊर्ध्वगमनम्–**

अग्नेः ऊर्ध्वगमनाय माध्याकर्षणशक्तेः भूमिका अस्ति। अग्निः मूलत उष्णो बाष्प इति। अनेन कारणेन अयमुष्णो बाष्पः तं परितो विद्यमानात् शीतलबाष्पाद् भारहीनः। वयं जानीमो वायौ उष्णे सति आयतनं वर्धते किञ्च घनत्वस्य ह्रासो भवति। घनत्वस्य ह्रासेनैव बाष्पो भारहीनो भवति, अपि च उपरिस्थः शीतलः समीरणो भारवत्त्वात् पृथिव्या माध्याकर्षणशक्तेः आकर्षणेन अध आगच्छति अपि च उष्णं बाष्पमुपरि प्रेषयति। अत उच्यते माध्याकर्षणबलाय किञ्च प्लवतायै अग्नेः शिखा सदैव उपरि गच्छति। वेदानां बहुषु मन्त्रेषु अग्नेः ऊर्ध्वगमनविषये वर्णना प्राप्यते। यजुर्वेद उच्यते– **ऊर्ध्वो भव प्रति विध्याध्यस्मदाविष्कृणुध्व दैव्यान्यग्ने।**[20] अर्थाद् अग्ने! ऊर्ध्वगामी भव। अग्निः प्रज्वल्य वायुमनुकरोति किञ्च अग्निः वायुना अधिकं प्रज्वलति। तथाहि यजुर्वेदः – **प्रोथदश्वो न यवसेऽविष्यन्यदा महः संवरणाद्व्यस्थात्। आदस्य वातो अनुवाति शोचिरध स्म ते व्रजनं कृष्णमस्ति।**[21] अग्निः वायुना अधिकं प्रसरति। ऊर्ध्वगमनाय अग्निः वारंवारं प्रयत्नं करोति। तथा च यजुर्वेदे– **हरयो धूमकेतवो वातजूताउप द्यवि। यतन्ते वृथगग्नयः।**[22] अग्निशिखा सदैव उपरि गच्छति। अनेन ज्ञायते यद् अग्नेः ऊर्ध्वगमनविषयेऽपि वैदिका अवगता आसन्।

**जलोच्छ्वासो जलह्रासश्च**

गुरुत्वाकर्षणबलस्य प्रभावेन पृथिव्यां जलोच्छ्वासो (TIDE) जलह्रासः (EBB) चेति भवतः। चन्द्रस्य स्वस्य कोऽपि आलोको नास्ति। यजुर्वेद उच्यते– सूर्यस्य किरणैः चन्द्रः प्रकाशते।[23] पृथिव्या उपरि सूर्यस्य किञ्च चन्द्रस्य आकर्षणेन मूलतः चन्द्रस्य आकर्षणेन यदा समुद्रस्य जलस्तरः सामान्यस्तराद् उपरि गच्छति तदा जलोच्छ्वासः (TIDE) इति भवति, अपि च यदा अधो गच्छति तदा जलह्रासः (EBB) इति भवति। अथर्ववेद उच्यते– चन्द्रस्य किरणानामाकर्षणेन समुद्रस्य जलवृद्धिर्भवति–**सिन्धोरुच्छ्वासे पतयन्तमुक्षणं हिरण्यपावाः।**[25] अनेन ज्ञायते यद् जलोच्छ्वासस्य कारणविषयेऽपि वैदिकऋषय अवगता आसन्।

**अहोरात्रः–**

पृथिव्या आवर्तनगतये भूपृष्ठे अहोरात्रो भवति। सूर्यस्य आलोकेनैव पृथिवी आलोकिता उत्तप्ता च भवति। अथर्ववेद उच्यते– सूर्यदेवः स्वस्य किरणैः पृथिवीं प्रकाशयति।[26] पृथिवी सूर्यं परितो लट्टुवद् आवर्तयति।[27] आवर्तनसमये पृथिव्या यद् अर्धांशः सूर्याभिमुखं तिष्ठति तत्र सूर्यस्य आलोकः पतति, अतः तत्र भवति दिनम्। विपरीतदिशः अर्धांशे सूर्यस्य आलोको न पतति, अतः तत्र भवति रात्रिः। अथर्ववेद उच्यते– सूर्यो दिवारात्र्योः निर्माता। सूर्यः पृथिव्या भागमेकमालोकयति अपि च भागमन्यमेकमन्धकारेण आच्छादयति– **अभ्यन्यदेति पर्यन्यदस्यतेऽहोरात्राभ्यां महिषः कल्पमानः।**[28] अन्यस्मिन् एकस्मिन् मन्त्र उच्यते–सूर्यो दिवारात्र्योः निर्माता–**अहोरात्रे परि सूर्यं वसाने प्रास्य विश्वा तिरतो वीर्याणि।**[29] अनेन ज्ञायते यद् अहोरात्रस्य कारणविषयेऽपि वैदिका अवगता आसन्।

**ऋतुपरिवर्तनम्–**

पृथिवी स्वस्याः कक्षपथे आवर्तयन्ती सूर्यस्य गुरुत्वाकर्षणशक्तेः आकर्षणेन एकस्मिन् निर्दिष्टे कक्षपथे निर्दिष्टे समये सूर्यं परित आवर्तयति। वेदेषु उच्यते–पृथिवी सूर्यं परितो भ्रमति।[30] पृथिव्या एदादृशी गतिः वार्षिकगतिः उत परिक्रमणगतिः इत्युच्यते। पृथिव्या वार्षिकगतये ऋतुपरिवर्तनं भवति। अथर्ववेदे विषयेऽस्मिन्नपि वर्णना प्राप्यते। अथर्ववेद उच्यते– ग्रीष्मः, वर्षा, शरत्, हेमन्तः, शिशिरः, वसन्त इति षड् ऋतवः क्रमानुसारं पृथिव्यां प्रतिष्ठापिताः-

**ग्रीष्मस्ते भूमे वर्षाणि शरद्धेमन्तः शिशिरो वसन्तः।**
**ऋतवस्ते विहिता हायनीरहोरात्रे पृथिवि नो दुहाताम्।।**[31]

अनेन बोध्यते यद् ऋतुपरिवर्तनविषयेऽपि ऋषीणां सम्यग्बोध आसीत्।

**निष्कर्षः–**

गुरुत्वाकर्षणबलं यदि न अस्थास्यत् तर्हि इयं सुन्दरी पृथिवी अस्माकं वासयोग्या न अभविष्यत्, वयं निश्चितरूपेण अमृष्महि, पृथिवी असंख्येन खण्डेन विभक्ता अभविष्यत् किञ्च महाशून्ये भासमाना अभविष्यत्, सूर्यः तस्य केन्द्रे स्थातुं न अशक्ष्यत्, एकेन महाविस्फुलिङ्गेन भग्नोऽभविष्यत्, महाविश्वस्य अन्यानि ग्रहनक्षत्राणि किञ्च तान्येव कानिचिद् वस्तूनि एव अस्माकं महाविश्वे इतःपरं न अद्रक्ष्यन्, सर्वत्र परमाणवः अभ्रमिष्यन्। फलतः पृथिवीं सक्रियकरणाय गुरुत्वाकर्षणबलस्य अपरिहार्यमवदानमस्ति। गुरुत्वाकर्षणबलं पदार्थविज्ञानस्य विषयः तथापि वेदेषु गुरुत्वाकर्षणबलस्य प्रयोगविषये वर्णना दृश्यते। पृथिव्या भ्रमणक्रिया, द्युलोके स्थितानां ग्रहनक्षत्राणां भ्रमणक्रिया, समुद्रस्य जलस्फीतिः, मेघाद् जलबिन्दुपतनम्, सूर्यस्य गुरुत्वाकर्षणबलम्, पृथिव्या गुरुत्वाकर्षणबलम्, ऋतुपरिवर्तनम्, अहोरात्रः प्रभृतिविषये वर्णना दृश्यते। अस्माकं देशो भारतवर्षं प्राचीनकालादेव सनातनधर्मपूरकम् आध्यात्मिकवादमनुसरति। सर्वेषां जनानां मङ्गलाय आध्यात्मिक–आधिभौतिक–आधिदैविकशक्तिविकासाय च सर्वे प्राक्तनाचार्याः, ऋषयः समाजसंस्कारकाश्च स्वात्मानं नियोजितवन्तः। यद्यपि ते न भौतिकविज्ञानस्य वैज्ञानिका आसन् परन्तु तेषाम् आविष्कृतविषयेषु गुरुत्वाकर्षणबलस्योल्लेखो दृश्यते। वैदिकऋषयो मन्त्रद्रष्टार आसन्। पारमार्थिकध्यानबलेनैव ते सर्वाणि भौतिकजातानि वस्तूनि प्रत्यक्षरूपेण ददृशुः। वेदमन्त्रा रहस्यात्मिका गूढा इति मत्वा विषयोऽयं दृष्टिपथं नागतः। पुनश्च विज्ञानविषयः पाश्चात्त्यवैज्ञानिकप्रवाह इति मत्वा अस्माकं शास्त्रेषु विद्यमानं विज्ञानविषयं चर्चयितुं क्लिष्टमनुभवन्ति आधुनिकाः।

*

## सन्दर्भाः

1. मनुस्मृतिः, 2.7
2. Physics. p.150
3. कृष्णं नियानं हरयः सुपर्णा अपो वसाना दिवमुत्पतन्ति। ऋग्वेदः, 1.164.47
4. तदेव, 10.189, यजुर्वेदः 3.6, अथर्ववेदः 6.31. सामवेदः 6.5.4
5. याप सर्व विजमानां विमृग्वरी। अथर्ववेदः, 12.1.37

6. तदेव 10.149.1
7. पञ्चसिद्धान्तिका, 13.1
8. अथर्ववेदः, 12.1.48
9. आकृष्टिशक्तिश्च मही तया यत्  खस्थं गुरु स्वाभिमुखं स्वशक्त्या।
आकृष्यते तत् पततीव भाति समे समन्तात् क्व पतत्वियं खे।। सिद्धान्त.गोलोध्यायः,6
10.
11. अपामिव प्रवणे...। ऋग्वेदः, 1.57.1
12. (क) एदु निम्नं न रीयते। तदेव, 1.130.2
(ख) वयं घ त्वा सुतावन्त आपो न वृक्तवर्हिषः। अथर्ववेदः, 20.57.14
13. प्र पर्वतस्य वृषभस्य पृष्ठान्नावश्चरन्ति स्वसिच इयानाः।
ता आववृत्रन्नधरागुदक्ता अर्हिबुध्यमनुरीयमाणः। यजुर्वेदः, 10.19
14. कृष्णं नियानं हरयः सुपर्णा अपो वसाना दिवमुत्पतन्ति।
ते आववृत्रन्त्सदनादृतस्यादिद्धृतेन पृथिवी व्युद्यते।। ऋग्वेदः, 1.164.47
15. अथर्ववेदः, 13.2.32
16. चन्द्रमा अप्स्वन्तरा सुपर्णो धावते दिवि। तदेव, 18.4.81
17. यजुर्वेदः, 2.26
18. तदेव, 23.10.46
19. तदेव, 20.23
20. तदेव, 13.13
21. तदेव, 15.62
22. तदेव, 33.2
23. ऊर्ध्वा अस्य समिधो भवन्त्यूर्ध्वा शुक्रा शोचींष्यग्नेः। अथर्ववेदः,5.27.1, यजुर्वेदः,27.11
24. सुषुम्नः सूर्यरश्मिश्चन्द्रमा। तदेव, 18.40
25. अथर्ववेदः, 18.3.18
26. भुवो विवस्वानन्वाततान। अथर्ववेदः, 18.2.32
27. याप सर्पं विजमाना विमृग्वरी। तदेव, 12.1.37
28. तदेव, 13.2.43
29. तदेव, 13.2.32
30. आयं गौः पृश्निरक्रमीदसदन् मातरं पुरः। पितरं च प्रयन्त्स्वः।।
ऋग्वेदः, 10.189.1, यजुर्वेदः, 3.61, अथर्ववेदः, 6.31.1, सामवेदः, 6.5.4
31. अथर्ववेदः, 12.1.36

*

# त्रिदोषसाम्येषु हठयोगस्य भूमिका

**मलय-मजुमदारः**

**शोधसारः**

प्रपञ्चेऽस्मिन् दुःखत्रयात् विनिवृत्त्यर्थं प्रेक्षावन्तस्सदैव धावमानाः दरीदृश्यन्ते। किं च तद्दुःखम्? किं तत्कारणम्? कथं वा तन्निवारयितुं शक्यत इति जिज्ञासा नितरां मनसि समुत्पद्यते। अस्याम् अवस्थायां मानवानां सामग्रिकसमस्यामवलोक्य भारतस्य पवित्रभूमिषु आयुर्वेदादिग्रन्थाः रचिता आसन्। तत्र शारीरिकरोगोत्पत्तेः कारणत्वेन त्रिदोषाणां वैषम्यम् एवं संसूचितम्। **'वायुः पित्तं कफश्चोक्तः शरीरे दोषसंग्रहः।'**[1] आधुनिकचिकित्साविज्ञाने होमियप्याथि-एलोपाथिचिकित्सा वा रोगनिवारणे दृष्टिपथे उपैति। अतः यौगिकक्रियाणामुपयोगः क्रमशः क्षीयते इति तत्र, एताश्चिकित्साः रोगाणां समूलं नाशे कदाचित् असमर्था इति प्रतीयते। परन्तु यौगिकक्रिया साक्षादेव आरोग्यं प्रददाति। अतः काभिः यौगिकक्रियाभिरेते दोषास्समतायां सन्तिष्ठन्तीत्येतद्विषयमाधारीकृत्य पत्रेऽस्मिन् यथामति आलोच्यते।

**कूटशब्दाः–** दोषाः, धातुः, मलाः, हठः, आसनम्, प्राणायामः, मुद्रा, बन्धश्चेति।

**आमुखम्–** **'धर्मार्थकाममोक्षाणामारोग्यं मूलमुत्तमम्'**[2] चतुर्विधपुरुषार्थानां साधनत्वेन स्वस्थतायाः प्रयोजनत्वं नूनमेव काम्यते। ननु प्रश्नस्समुदेति किं च स्वस्थस्य लक्षणम्? आयुर्वेदाचारैस्तत्स्वरूपं कथ्यते–

**समदोषः समाग्निश्च समधातुमलक्रियः।**
**प्रसन्नात्मेन्द्रियमनाः स्वस्थ इत्यभिधीयते।।**[3]

श्लोकस्य प्रथमे पादे 'समधातुः' इति पदेन वातपित्तकफानां समता एव स्वस्थतायाः लक्षणे निर्दिश्यते। भगवता श्रीकृष्णेनापि महाभारते स्वस्थलक्षणं कथितम् –

**शीतोष्णे चैव वायुश्च गुणा राजञ्शरीरजाः।**
**तेषां गुणानां साम्यं यत्तदाहुः स्वस्थलक्षणम्।।**[4]

अत्रापि शीतोष्णशब्दाभ्यां क्रमात् वातपित्ते लक्ष्येते। अतः लक्षणं परिशील्य ज्ञायते

ये च वातपित्तकफाः त्रिदोषा अस्मदीये शरीरे विद्यन्ते तेषां समता स्वास्थ्यम् इति कथ्यते। त्रिदोषाणामेतेषां वैषम्येण कश्चित् अस्वस्थ इति प्रतीयते। आयुर्वेदशास्त्रं त्रिदोषसिद्धान्तस्योपरि प्रतिष्ठितम्। तत्रोक्तं वर्तते शरीरस्य मूलकारणत्वेन दोष-धातु-मलास्सन्ति। एत एव दोषाश्शरीरस्य रोगानुत्पादयन्ति। एते यदा दूषयन्ति तदा एतेषां दोषसंज्ञा, यदा शरीरं स्वस्थं संस्थापयन्ति तदा धातुः इति संज्ञा, पुनश्च शरीरस्य मलिनीकरणार्थं मलाः इत्यपि कथ्यन्ते। दोषाणामेतेषां प्रकृत्यवस्थायाम् आनयनाय भूरिश उपाया आयुर्वेदशास्त्रे वर्णिताः। तत्र त्रिदोषसमतानयने योगाभ्यासस्य महत्त्वमपि महता कण्ठेन समुद्घोषितम्। तदनु व्यायामस्वरूपं महत्त्वञ्च प्रदर्शितमस्ति–

**शरीरचेष्टा या चेष्टा स्थैर्यार्था बलवर्धिनी।**
**देहव्यायामसंख्याताः मात्रया तां समाचरेत्॥**
**लाघवं कर्मसामर्थ्यं स्थैर्यं दुःखसहिष्णुता।**
**दोषक्षयोऽग्निवृद्धिश्च व्यायामादुपजायते॥**[5]

अधस्त्रिदोषस्वरूपं निरूप्यते किञ्च काभिः यौगिकक्रियाभिरेतस्य दोषत्रयस्य समता सन्तिष्ठतीत्येतद्विषयेऽपि आलोच्यते।

**वातः–**

महत्त्वाधिक्याद्वातस्यालोचनैव सर्वादौ विधीयते। '**वा**' इति धातोरुत्पन्नस्य वायुशब्दस्यार्थोऽस्ति **गतिः।** येन तत्त्वेन शरीरे गतिरुत्साहो वा उत्पद्यते, तदस्ति वातः। अन्ये ये धातवस्सन्ति ते तु पङ्गवः, गमनागमनेऽसमर्था इत्यर्थः। परन्तु गमनशीलवायुरधिशरीरं धावति, अतोऽस्य प्रकोपोऽपि सुदृढोऽस्ति। चरकस्तत्कृतचरक-संहितायां बहुविधवायुविकारदोषान् वर्णयामास। वायोर्गुणविषये कथितं वर्तते–'**वातस्तु रुक्ष-लघु-चल-बहु-शीघ्र-शीत-परुष-विशदः**[6] इति। इतरैः आयुर्वेदविशारदैः कथितम्– 'वायुः रजोमयः, अचिन्त्यवीर्यवान्, दोषाणां नेता, गतिमान् गुणसंयुक्तः' इति। असौ वायुः प्राण-अपान-व्यान-उदान-सामानभेदेन पञ्चधा। एतेषां स्वरूपमाह –

**हृदि प्राणो गुदेऽपानः समानो नाभिमण्डले।**
**उदानः कण्ठदेशे स्यात्, व्यानः सर्वशरीरगः॥**[7]

इमे पञ्च वायवः प्रकृतावस्थायां स्थित्वा शरीरं संरक्षन्ति। एतेषु प्रकुपितेषु शरीरहानिरिति। वायुदोषाद् मधुमेहः (Diabetes), पादसुप्तता (Anaesthesia), घ्राणनाशः (Olfactory),नेत्ररोगः (Eyedisease), कुब्जता (Kyphosis),चर्मरोगः (Lupus),

उरूस्तम्भः (Parapl egia), दन्तभेदः (Dental caries), कर्णरोगः (Ear disease), उदरपीडा (Rheumatic), साइटिका, पेरालाइसिस, इनसोमिनिया, पृष्टग्रहश्चेत्यादयः रोगास्समुत्पद्यन्ते। तदुक्तम् –

**क्रुद्धः सः कुरुते रोगान् प्रायशः सर्वदेहगान्।**
**युगपत् कुपिता एते देहं भिन्द्युरसंशयम्।।**[8]

समगुणवतां भोज्यद्रव्याणां सेवनेन वायुर्वृद्धिं प्राप्नोति, विपरीतगुणवतां द्रव्याणां सेवनेन तथा च समुचितयौगिकक्रियाणामनुशीलनेन वायोर्वृद्धिः ह्रसते।

**पित्तम्–**

'**तप सन्तापे**' इत्यनेन कृद्विहितप्रत्ययेन पित्तमिति रूपं सिद्ध्यति। चुरादि-गणीयतपधातोः निष्पन्नस्य पित्तशब्दस्यार्थः तपनमिति। भूताग्निरेव प्राणिषु पित्तमित्युच्यते। अष्टाङ्गहृदयसूत्रे पित्तलक्षणं विवृण्वता उक्तं यत् –

**पित्तं सस्नेहतोष्णं लघुविस्त्रं सरं द्रव्यम्।**[9] पित्तं पाचक-राजक-साधक-आलोचक-भ्राजकभेदेन पञ्चविधम्। पित्तमिदं पञ्चधा प्रविभज्य अग्निकर्मणोऽनुग्रहं करोति। पित्तं समवस्थायां सत्यां शरीरे उष्णताम् (Oxidation) उत्पाद्य पाचनक्रियां (Digestion) सम्पादयति, दृष्टिशक्तिं प्रददाति, अल्पनिद्रां परिहरति, मानसिकचिन्ताशक्तिं नितरां संवर्धयति। तदुक्तम् –

**दर्शनं पक्तिरूष्मा च क्षुत्तृष्णा देहमार्दवम्।**
**प्रभा प्रसादो मेधा च पित्तकर्माविकारजम्।।**[10]

पित्तकोपादुत्पन्नेषु रोगेषु गात्ररोगः, पाण्डुरोगः (Jaundice), अत्यधिकस्वेदनम् (Excessive sweating), अम्लता (Acidity), वमनम् (Vomiting), पीतमूत्रम्, चर्मरोगश्चेत्यादीनि सन्ति। समुचितयोगाभ्यासेन विपरीतगुणयुक्तद्रव्याणां सेवनेन च पित्तदोषात् निवृत्तिर्जायते।

**कफः –**

आलिङ्गनार्थे 'श्लिष्' धातुना कृद्विहितेन प्रत्ययेन श्लेष्मा इति पदस्योत्पत्तिः। 'केन जलेन फलति' इति व्युत्पत्त्या तस्य शैत्यप्राधान्यमेव द्योत्यते। कफगुणविषयेऽष्टाङ्गहृदये प्रोक्तम्– **'स्निग्धः शीतो गुरुर्मन् श्लेक्ष्मो मृत्स्नः स्थिरः कफः।'**[11] सुश्रुतसंहितायाम् **'श्लेष्मा-श्वेत-गुरु-स्निग्ध-पिच्छिल-शीतगुणवान्'**[12] भवति। कफोऽयं समावस्थायां मधुरं भवति, परन्तु वैषम्ये सति लवणगुणवत्त्वं भवति। क्लेदन-स्नेदन-रसन-अवलम्भन-

श्लेष्मनभेदेन कफस्य पञ्चविधत्वं वर्तते। प्रकृत्यवस्थायां कफोऽयं देहे बन्धतां (Adhesion), स्थिरतां (Stability), गुरुतां (Weight), धृतिं (Control), वृषतां (Reproduction), बलं (Resistance) च समुत्पादयति। ननु कैः कारणैः कफः प्रकुपितो भवति तज्जिज्ञासायामतिमधुराहारभोजन-लवण-शीतलम्-अतिनिद्रा-दिवानिद्रा-अत्याहारश्चेत्यादयः कफप्रकुपितकारणत्वेन गृह्यन्ते। तन्द्रा-जिह्वारोग-वमन-हृद्रोग-आलस्य-अतिनिद्रा-गलगण्डाश्चेत्यादयः कफ-श्लेष्मजरोगाः।

अतस्साम्यावस्थायां स्थित्वा एते दोषाश्शरीरं परिपुष्टिं प्रददति तथा वैषम्यावस्थायां एते एव शरीरं रुजाक्रान्तं कुर्वन्ति। अत एतेषां साम्य–वैषम्ययोरुपरि शरीरस्यारोग्यानारोग्यते निर्भरे भवतः।

**हठयोगः –**

पतञ्जलिप्रणीतयोगदर्शनमतिप्राचीनकालादेवास्मदीये जनमानसे राराजते। भगवता पतञ्जलिना राजयोग–वर्त्मनाऽऽध्यात्मिकप्रगतिलाभाय ग्रन्थोऽयं संरच्यते। परवर्तिकाले मन्त्र-लय-क्रिया-हठयोगाख्यादयः योगानुष्ठानस्य बहवस्सम्प्रदायाः अधिविश्वं विकसितास्सन्ति। एतेषु सम्प्रदायेषु हठयोगस्य प्राधान्यं महता कण्ठेनाभिव्यज्यते। 'हठ' शब्दात् अच् इति प्रत्ययसंयोगेन हठशब्दस्य समुद्भवः। **वलात्कारार्थे**[13] शब्दस्यास्य प्रयोगस्सञ्जातः। साधकैः मनः शरीरञ्च स्ववशीभूतं कर्त्तुं या प्रक्रिया अवलम्ब्यते, तदस्ति हठयोगः। पक्षान्तरे 'ह' 'ठ' चेत्यक्षरद्वयं मिलित्वा हठ इति पदस्योत्पत्तिः। 'ह' 'ठ' इत्यनेन क्रमात्सूर्यचन्द्रौ बोध्येते। तथा प्रोक्तम् –

**हकारः कीर्त्तितः सूर्यष्ठकारश्चन्द्र उच्यते।**
**सूर्याचन्द्रमसोर्योगात् हठयोगो निगद्यते॥**[14]

पातञ्जलयोगदर्शने राजयोगस्याभ्यासो निर्दिश्यते, यत्तु साक्षात् चित्रवृत्तिनिरोधरूपात्मकः। परन्तु सम्प्रति मनुष्याणां तन्न रोचते। इति हेतोः हठयोगप्रदीपिकाकारेणोक्तम् –

**भ्रान्त्या बहुमाराध्वान्ते राजयोगमजानताम्।**
**हठप्रदीपिकां धत्ते स्वात्मरामः कृपाकरः॥**[15]

हठयोगस्य ये केचन ग्रन्था अधुना दृष्टिपथे आयान्ति, तेषु गोरक्षसंहिता, शिवसंहिता, हठयोगप्रदीपिका, घेरण्डसंहिता, सिद्धसिद्धान्तपद्धतिः, हठरत्नावली चेत्यादयास्सुप्रसिद्धाः। त्रिदोषसाम्यावस्थायामानेतुं काश्चित् हठयौगिकक्रिया अधस्समुपस्थाप्यन्ते।

**षट्कर्म –**

हठयोगादिग्रन्थेषु शरीरशोधनार्थं षट्कर्मणां महत्स्थानमस्ति। षट्कर्मणामभ्यासेन

शरीरस्थमला अचिरादेव दूरीभवन्ति। तानि षट्कर्माणि यथा– धौति-वस्ति-नेति-त्राटक-नौलि-कपालभातिश्चेत्यादीनि।

षट्कर्मसु धौतिकर्मणः परिगणनं हठप्रदीपिकायां घेरण्डसंहितायाञ्च सर्वादौ क्रियते। अन्तर्धौति-दन्तधौति-हृद्धौति-मूलशोधनमित्येनन धौतिश्चतुर्विधा प्रोक्ता घेरण्डमहामुनिना। विंशतिप्रकारकाणां कफरोगाणां नाशिका[16] एषा धौतिः। द्वितीया तु वस्तीति तदनुशीलनेन वातादयस्सर्वे त्रिदोषजाः[17] मलाः अपक्षीयन्ते। घेरण्डसंहितायामपि उक्तं वर्तते यद्धौतिः वायुदोषादुत्पन्नानामामवातरोगनाशं करोति। षट्कर्मान्तर्गततृतीयक्रिया नेतिः जलसूत्रभेदाभ्यां द्विविधा। तदनुशीलनेन कफजदोषाः विमुच्यन्ते। किञ्च कपालभातिः इति कर्मणाऽपि नूनमेव कफदोषाः[19] प्रणश्यन्ते।

**आसनम् –**

हठयोगस्य प्रथमाङ्गत्वेन आसनानां वर्णनं सर्वाग्रे करणीयम्। सम्प्रति विश्वेऽस्मिन् सर्वेष्वपि देशेषु योगासनस्याभ्यासो बहुलतया दरीदृश्यते। यतो हि शारीरिक-मानसिक-स्वास्थ्यदृष्ट्वा योगासनं महदुपकारकम्। **स्थिरसुखमासनम्**[20] इति पतञ्जलिकृतलक्षणे परिष्फुटं भवति यत्– स्थिरतया सुखपूर्वकं कस्मिंश्चित् स्थाने उपवेशनं नाम आसनम्। **आसनेन रुजो हन्ति**[21] इत्यनेन गम्यते रोगाणां नाशे आसनस्य महत्युपयोगिता। श्रीमद्भगवद्गीतायां भगवता श्रीकृष्णेनापि कथितम् –

**तत्रैकाग्रं मनः कृत्वा यतचिन्तेन्द्रियक्रियः।**
**उपविश्यासने युञ्ज्याद्योगमात्मविशुद्धये।।**[22]

पतञ्जलिना स्वकीये योगसूत्रे आसनस्य नामानि नोल्लिखितानि। परन्तु शरीरशुद्ध्यर्थं हठयोगादिषु ग्रन्थेषु आसनस्य बहुप्रभेदाः परिलक्ष्यन्ते। वातरोगादुत्पन्नदोषाणां निवारणे येषामासनानामभ्यसनीयता हठयोगादिषु ग्रन्थेषु दर्शिता तानि पद्मासनम्, भद्रासनम्, वीरासनम्, पश्चिमोत्तानासनम्, धनुरासनम्, सुप्तवीरासनम् चेत्यादीनि। पुनश्च पित्तगतदोषाणां दूरीकरणेऽभ्यसनीयान्यासनानि यथा– पद्मासन-त्रिगुणासन-भुजङ्गासन-धनुरासनादीनि। कफः श्लेष्मः वा दोषः यैः आसनैस्समत्वं यान्ति तानि पद्मासनम्, उष्ट्रासनम्, बन्धासनम्, अधोमुखासनमित्यादीनि सन्ति।

**प्राणायामः–**

**'स्वस्थस्य स्वास्थ्यरक्षणम् आतुरस्य विकारप्रशमनम्'**[23] इत्यायुर्वेदोक्तिः योगेष्वपि वरीवृत्यते। मानवानां कृते प्राणायामः योगिप्रदत्तमहावर इवास्ति। मनुष्याः

योगसारभूतप्राणायामं स्वजीवने कुर्वन्तः आरोग्यं संलभन्ते। तदनुशीलनेनैव त्रिदोषाः (वात-पित्त-कफाः) साम्यावस्थायां स्थित्वा सप्तधातूनां (रस-रक्त-मांस-मेदस्-अस्थि-मज्जा-शुक्रादयः) परिपुष्टिं विधाय आरोग्यं प्रददति। पतञ्जलिना सूत्रयामास– **'तस्मिन् सति श्वासप्रश्वासगतिविच्छेदः प्राणायामः'**[24] इति। आसने सिद्धे सति श्वास–प्रश्वासयोः गतेः निजवशीभूतकरणं नाम प्राणायामः। इयं प्राणगतिः अनवरतं प्रचलन्ती अस्ति, गत्यवरोधे सति मृत्युरपि भवितुमर्हति। च पूरक-कुम्भक-रेचकभेदेन प्राणायामस्त्रिविधः। **'प्राणो वा इदं सर्वं भूतं यदिदं किञ्चित्'**[25] इत्युपनिषद्मन्त्रेण प्राणमहत्त्वमुच्चैस्स-मुद्घोषितम्। प्राणायाममहत्त्वं निगदितं प्रदीपिकाकारेण –

**चले वाते चलं चित्तं निश्चले निश्चलं भवेत्।**
**योगी स्थाणुत्वमाप्नोति ततो वायुं निरोधयेत्॥**
**यावद् वायुः स्थितो देहे तावज्जीवनमुच्यते।**
**मरणं तस्य निष्क्रान्तिस्ततो वायुं निरोधयेत्॥**[26]

योगादिग्रन्थेषु बहुविधप्राणायामानां नामानि सम्प्राप्यन्ते। तेषु कुम्भकप्राणायामेषु सूर्यभेदनप्राणायामः प्रमुखोऽस्ति। हठयोगप्रदीपिकायामुल्लिखितमस्ति यत् प्राणायामोऽयं वायुगतदोषान्[27] विनाशयति। उज्जायीनामकस्य प्राणायामस्याभ्यासेन कफश्श्लेष्मः[28] वा दूरीभवतीत्यपि विहितमस्ति। रोगनिवारणे शीतलीप्राणायामस्य महत्त्वमन्यतमम्। प्राणायामस्यास्यानुशीलनात्पित्तदोषादुत्पन्नरोगाः[29] समूलं विमुच्यन्ते। किञ्च कफदोषमपि[30] परिहरति प्राणायामोऽयमित्युच्यते। भस्त्रिकाऽपि[31] कुम्भकप्राणायामेषु प्रभूताऽस्ति। प्राणायामोऽयं समेषां त्रिदोषोत्पन्नानां व्याधीनां नाशकः।

**मुद्रा –**

**'मोदन्ते हृष्यन्ति यया सा मुद्रा यन्त्रिता सुवर्णादिधातुमया वेति'** एवंरूपेण उणादिकोषे मुद्रालक्षणं स्पष्टीक्रियते। मुद्धातोत्तरं रकेति प्रत्ययनिष्पन्नमुद्राशब्दस्यार्थः प्रसन्नतादायिनी स्थितिः अस्ति। अतः यौगिकसन्दर्भे मुद्रेत्यनेन रहस्यम् अङ्गानां विशेषस्थितिर्वा मन्तव्यम्। वस्तुतः कुण्डलीनिशक्तिं जागरयितुं यस्य विधेः प्रयोगः क्रियते तदस्ति मुद्रा। आसन–प्राणायामाभ्यां साकं बन्धानां प्रयोगपुरस्सरं मुद्रानाम् अभ्यासो विधेयः। पञ्चविंशति-संख्यकाः मुद्राः योगशास्त्रे सुप्रसिद्धाः। यासु मुद्रादशकं जरामृत्युविनाशकमिति ज्ञापयति–

**महामुद्रा, महाबन्धो, महावेधश्च, खेचरी।**
**उड्डयीनं, मूलबन्धश्च, बन्धो जालन्धराभिधः॥**

**करणी विपरीताख्या, वज्रोली, शक्तिचालनम्।**
**इदं हि मुद्रादशकं जरामरणनाशनम्।।**[32]

अतः वक्तुं शक्यते दोषत्रयं प्रकृत्यवस्थायामानेतुं योगशास्त्रोक्तमुद्राणां महत्त्वमनस्वीकार्यम्। एतासु मुद्रासु क्रमात् वातरोगनिवारणे महावेध–महामुद्रयोः, पित्तरोगदूरीकरणाय खेचरी–महावेधयोः, किञ्च कफरोगनाशाय विपरीतकरणीजालन्धरमुद्रयोरभ्यासः करणीयः।

**बन्धः –**

नियन्त्रितकरणार्थे 'बन्ध्' इति धातुना सह घञ् प्रत्ययसंयोगेन बन्धशब्दस्योत्पत्तिर्जायते। याभिः प्रक्रियाभिश्शरीरस्यान्तरिकाङ्गं प्रबाध्य साधनायां प्रवृत्तिर्जायते तदस्ति बन्धः। योगसाधनायां बन्धस्य महत्ता समुल्लेखनीया। बन्धं विना प्राणायामः नैव फलप्रदो भवति। बन्धः कुण्डलिनीशक्तिं जागरयितुं तथा प्राणं नियन्त्रयितुं गुरुत्वपूर्णां भूमिकां निर्वहति। त्रिदोषसाम्यतां संस्थापयितुं उड्डीयानो मूलबन्धो, जालन्धरश्चेत्यादि बन्धानामनुशीलनं नूनमेव अपेक्ष्यते।

**मिताहारः –**

अस्मदीये जीवनेऽऽहारस्य महती भूमिका वर्तते। समुचिताहारेण रोगाः कदापि न आयान्ति, परन्तु विपरीतगुणवदाहारश्शरीरं व्यापादयति। आधुनिकचिकित्साविज्ञानेऽपि रोगानुगुणं वैद्यैः कानिचन भोज्यद्रव्याणि निषिध्यन्ते कानिचित् वोपदिश्यन्ते। योगशास्त्रमपि मिताहारस्य प्रयोजनम् अङ्गीकरोति। कीदृशः आहारः मनुजैः भोक्तव्यस्तद्विषये उक्तं वर्तते–

**सुस्निग्धमधुराहारः चतुर्थांशविवर्जितः।**
**भुज्यते शिवसम्प्रीत्यै मिताहारः स उच्यते।।**[33]

त्रिदोषाणां धातूनाञ्च समतानयने अधोलिखितानां भोज्यद्रव्याणाम् आहारं कुर्यात्।

1. **शाकाः ( Vegetables )–** सर्वहरितपत्रम्, मृज्जनकम्, निष्पावः, रक्तफलम्, उर्वारूकम्, पालङ्कश्चेत्यादयः।

2. **अङ्कुरः ( Sprouts )–** अन्नम्, पिष्टम्, यवागुः, भृष्टश्चेत्यादयः।

3. **फलम् ( Fruits )–** सेव-नारङ्ग-कदलि-आम्र-द्राक्षा-दाडिम-मधुकर्कटी-आनानसादीनि।

4. **शुष्कफलम् ( Dry fruits )–** काजव–किशमिश–वाताद–अक्षोट–दिनाङ्कादीनि।

**5. Micronutrients & Antioxidants –** Calcium, Iron, Copper, Iodine, potassium Vitamins – ABDCEK etc.

**निष्कर्षः –**

शरीरस्य प्रत्येकं कोषाः त्रिदोषसमन्वये निर्मितास्सन्ति। शरीरे स्थित्वा एते देहस्थसामूहिकतत्त्वं नियन्त्रयति। एते त्रिदोषा आयुर्वेदस्य भित्तिस्वरूपा इति। यद्यपि त्रिदोषाः पञ्चभौतिकतत्त्वसमन्वये समुत्पद्यन्ते तथापि वातेषु वायु–आकाशयोः, पित्तेषु अग्नेः, कफेषु जल–पृथिव्योः प्राधान्यम् अभिव्यज्यते। न केवलं मनुष्याणामपि तु चराचराणां सर्वेषामपि जीवानां शरीरवृत्तीयैकका इमे त्रिदोषाः। यौगिकक्रियया त्रिदोषान् प्रकृत्यवस्थायामानीय रोगात् आरोग्यं प्राप्नुम इति भगवन्तं सम्प्रार्थये।

*

## सन्दर्भाः


1. चरकसंहिता, 1.57
2. तदेव
3. सुश्रुतसंहिता, 15.4
4. महा. आश्व., 14.12.3
5. चरकसंहिता, 7.31.32
6. च.सं.वि., 8
7. अ.को., 1.1.64
8. च.सू., 19
9. अष्टाङ्गहृदयसूत्रम्, 1.12
10. च.स.सू., 8
11. अष्टाङ्गहृदयसूत्रम्, 1.11
12. सुश्रुतसंहिता, 21.15
13. अमरकोषे, 2.8.108
14. हठयोग, 1.69
15. तदेव, 1.3
16. कासश्वासप्लीहकुष्ठं कफरोगाश्च विंशतिः।
    धौतिकर्मप्रभावेन प्रयान्त्येव न संशयः।।
    ह.प्र., 2.25
17. तत्रैव, 2.28
18. घेरण्डसंहिता, 39
19. कपालभातिर्विख्याता कफदोषविशोषणी।
    ह.प्र., 2.26
20. योगसूत्रम्, 2.46
21. घेरण्डसंहिता
22. श्री मद्भगवद् गीता, 6.12
23. चरकसंहिता, 1.12
24. योगसूत्रम्, 2.49
25. छान्दोग्योपनिषत्, 3.15.4
26. हठयोगप्रवेशिका, 2.2-3
27. कपालशोधनं वातदोषघ्नं कृमिदोषहृत्।
    तत्रैव, 2.50
28. पूर्ववत् कुम्भयेत् प्राणं रेचयेदिडया ततः।
    श्लेष्मदोषहरं कण्ठे देहानलविवर्धनम्।।
    तत्रैव, 2.52
29. गुल्मप्लीहादिकान् रोगान् ज्वरं पित्तं क्षुधां तृषाम्। तत्रैव, 2.58
30. अजीर्णं कफपित्तं च नैव तस्य प्रजायते।
    घे.स.पू. 321
31. त्रिदोषनाशकं चैव शरीराग्निविवर्धनम्।
    ह.यो.प्र. 2.66
32. हठयोगप्र. 3.6-7
33. तत्रैव, 2-48

# लौकिकालौकिकरसानां समीक्षात्मकमालोचनम्

**कंचन बारीक**

**सारसंक्षेपः**

चरकसंहितायाः सूत्रस्थानस्य षड्विंशतितमाध्याये षण्णां रसानां सविस्तृतं विवरणमुपलभ्यते। लोके रसानां षड्विधता सर्वजनविदिता, किन्तु आयुर्वेदे रसानां संख्याविषये मतान्तराणि दरीदृश्यन्ते। द्रव्य-देश-कालभेदेन रसानां त्रिषष्टिः भेदाः स्मृताः। पञ्चमहाभूतानां न्यूनाधिक्यवशात् जङ्गमप्राणिनां बहुविधा वर्णाः प्रकृतयश्च जायन्ते। इत्थं पञ्च महाभूतानां न्यूनातिरेकेण ऋतुवैचित्र्याच्च षड्रसेषु वैचित्र्यं परिलक्ष्यते। रसः समेषां प्रकृतिभूतः मूलो वा। अनुरसेऽपि समरूपेण अव्यक्तभावः तिष्ठति। रसानामेतेषामाधारोऽसंख्येयः, ततः रसोऽप्यगण्यः। शरीरेन्द्रियाणां तृप्तिसाधनं जलीयद्रव्याणां कार्यम्। षड्विधरसानां व्यस्ततायां संहतौ वा व्यवहारेण अत्यन्तं हितकारिणो भवन्ति। एवञ्च यथार्थप्रयोगाभावात् अनिष्टमपि न ह्यसम्भवम्। यथा बहुविधव्यञ्जनस्थसंस्कृतमधुरादिरसास्वादनेन हर्ष-पुष्ट-तृप्ति-जीवन-बल- आरोग्यप्रभृतयः प्राप्यन्ते तथैव काव्येषु नाट्येषु च निर्मलचित्ताधिकारी रसिकः प्रेक्षकश्च विभावानुभावव्यभिचारिभावैः अभिव्यक्तं वाचिक-आङ्गिक-सात्त्विकाहार्याभिनयप्रसूतं स्थायिभावरूपरसमास्वादयति, तेन ते लोकोत्तरहर्षं धर्मादौ वैदग्ध्यादि च प्राप्नुवन्ति।

**सूचकशब्दाः-** आयुर्वेदः, पञ्चमहाभूतः, षड्रसः, शरीरेन्द्रियः।

**मूलप्रबन्धः—** चरकसंहितायाः सूत्रस्थानस्य षड्विंशतितमाध्यायः आत्रेयभद्रकाप्यनाम्ना प्रसिद्धः अध्यायेऽस्मिन् लौकिकानां षड्रसानां विस्तृतं विवरणं प्राप्यते। षड्विधः लौकिकः रसः इति सर्वजनविदिते सत्यपि आयुर्वेदस्य विशिष्टग्रन्थेऽमुष्मिन् प्रमुखा आचार्याः रससंख्याविषये मतान्तरं प्रकटितवन्तः। आचार्यभद्रकाप्यानुसारेण रसः एकविध एव, सः च पञ्चेन्द्रियेषु अन्यतमेन जिह्वेन्द्रियेण ग्राह्यः। रसोऽसौ जलादभिन्नः पदार्थः। ब्राह्मणशाकुन्तेयमतेन तु रसो द्विविधः, छेदनीय उपशमनीयश्चेति। पूर्णाक्षमौद्गल्यर्षिमतेन तु त्रिविधो रसः, छेदनीयः उपशमनीयः साधारणश्चेति। हिरणाक्षकौशिकानुसारं रसः चतुर्विधः, हितः स्वादुरसः, अहितस्वादुरसः, अहितः अस्वादुरसः हितः अस्वादुरसः च। कुमारशिरसो मतेन रसः पञ्चविधः–भौमः औदकः आग्नेयः वायव्यः अन्तरीक्षश्चेति। राजर्षेः वार्योविदः मतेन

षड्विधः रसः, गुरुः लघुः शीतः उष्णः स्निग्धः रुक्षः चेति। नैमवैदहानुसारं रसः सप्तविधः मधुराम्ललवणकटुकषायतिक्तक्षारभेदात्। धामागवर्षिमतेन अष्टविधः रसः मधुराम्ललवणकटुकषायतिक्तक्षाराव्यक्तभेदात्। वैद्यकङ्कायनानुसारं रसोऽसंख्येयः, रसस्याश्रयभूताः गुणकर्मसंस्कारा अपि असंख्याः, अतः रसोऽप्यगण्यः। अन्तिमे भगवान् आत्रेयोऽवादीत्[1]– षड्विधः रसः, मधुराम्ललवणकटुकषायतिक्तभेदात्। जलमेवैतेषां षड्मकारकरसानामुत्पत्तिस्थानम्। रसस्याश्रयः क्षित्यप्तेज आदयः पञ्च महाभूताः। रसः समेषां प्रकृतिः मूलो वा। अनुरसेऽपि इत्थम् अव्यक्तभावस्तिष्ठति। अनुरस-समन्वितद्रव्येऽपि रसस्याव्यक्तभावः वर्तते। रसस्यैते सर्वे आश्रयाः असंख्याः, अतः रसोऽपि असंख्येयः। वास्तविकदृष्ट्या मतमिदमनुचितम्। यतो हि रसाः परस्परम् आधिक्येन संसृष्टाः, तेन तेषां गुणः प्रकृतिश्च असंख्येया इति वक्तुं न शक्यते। आयुर्वेदे शास्त्रस्य प्रयोजनीयपदार्थः पाञ्चभौतिक एव। न हि किञ्चिद्विद्यते जगत्यस्मिन् यदौषधरूपेण व्यवहर्तुं न शक्यते। केवलं गुणप्रभावात् समुदयद्रव्यम् औषधरूपेण कार्यकरं न भवति।[2] द्रव्य-देश-कालप्रभावेण रसस्य षट्त्रिंशद्भेदाः परिकल्पिताः। अधुना समासेन तेषां विषये आलोचयामः - अम्ललवणकटुकषायतिक्तानां पञ्चविधरसानां संयोगेन पञ्चविधः स्वादुरसः जायते। अम्लरसः लवण-कटु-कषाय-तिक्तैः चतुर्विधरसैः सह मिलितः सन् चतुष्प्रकारकः भवति। लवणरसः कटु-तिक्त-कषायैः त्रिविधरसैः सह मिलितः सन् कटुलवण-तिक्तलवण-कषायलवणभेदात् त्रिविधो जायते। कटुरसः तिक्त-कषायाभ्यां सह मिलितः सन् कटुतिक्त-कटुकषायभेदाद् द्विविधो भवति। तिक्तरसः कषायरसेन सह मिलितः सन् तिक्तकषायभेदात् एकविध एव तिष्ठति। अत एव द्विप्रकारकः रसः परस्परं मिलितः सन् पञ्चदशविधान् विभिन्नरसान् उत्पादयति। एवञ्च त्रिविधरसानां संयोगेन मधुररसः दशप्रकारको भवति। यथा मधुराम्ललवणः, मधुराम्लकटुः, मधुराम्लतिक्तः, मधुराम्लकषायः, मधुरलवणकटुः, मधुरलवणतिक्तः, मधुरलवणकषायः, मधुरकटुतिक्तः, मधुरकटुकषायः मधुरतिक्तकषायश्चेति। इत्थं त्रिविधरसानां सम्मेलनेन अम्लरसोऽपि षड्विधो भवति – अम्ललवणतिक्तः, अम्ल-लवणकटुः, अम्ललवणकषायः, अम्लतिक्तकटुः, अम्लतिक्तकषायः अम्लकटुकषायश्चेति। त्रिविधरसानां संयोगेन लवणरसोऽपि त्रिविधः– लवणतिक्तकटुः, लवणतिक्तकषायः लवणकटुकषायश्चेति। तिक्तरस एकप्रकारकः। यथा तिक्तकटुकषायः। एवञ्च त्रिविधरसानां संयोगेन विंशतिविधरसा जायन्ते। चतुर्विधरससंयोगेन दशविधमधुररसाः उत्पद्यन्ते- मधुराम्ललवणतिक्तः, मधुराम्ललवणकषायः मधुराम्ललवणतिक्तकटुः मधुराम्ललवण-कटुकषायः मधुरतिक्त-कटुकषायश्चेति। चतुर्विधरससंयोगेन अम्लरसोऽपि चतुष्प्रकारको भवति– अम्ललवणतिक्तकटुः,

अम्ललवणतिक्तकषायः, अम्ललवणकटुकषायः अम्लतिक्त-कटुकषायश्चेति। चतुर्विधरससंयोगेन लवणरसोऽपि एकविधः–लवणतिक्तकटुकषायः। अत एव चतुर्विधरसानां संयोगेन पञ्चदशविधरसा जायन्ते। पञ्चपञ्चरसानां सम्मेलनेन पृथक् षड्रसा उत्पद्यन्ते। तेषु मधुररसस्य सम्मेलनेन मधुररसः पञ्चप्रकारकः अम्लरसस्य सम्मेलनेन च एकप्रकारकः रस उत्पद्यते। पञ्चपञ्च-रसानां संयोगेन मधुररसः पञ्चप्रकारको भवति– मधुरलवणतिक्तकटुकषायः, मधुराम्लतिक्त-कटुकषायः, मधुराम्ललवणकटुकषायः, मधुराम्ललवणतिक्तकषायः मधुराम्ललवणतिक्त-कटुश्चेति। पञ्चरसानां सम्मेलनेन अम्लरसः एकप्रकारको भवति– अम्ललवणकटुकषायतिक्तः। षड्विधरसानां संयोगेन एकप्रकारकोरसः जायते– मधुराम्ललवणकटुतिक्तकषायः। द्विविधरससंयोगेन पञ्चदशप्रकारको रसः। त्रिविधरसानां सम्मेलनेन विंशतिप्रकारको रसः, चतुष्प्रकारकरसानां सम्मेलनेन पञ्चदशप्रकारको रसः च। पञ्चप्रकारकरसानां सम्मेलनेन षड्विधः रसः। षड्विधरससंयुक्तद्रव्यानां सम्मेलनेन एकप्रकारकरसः, पृथग्योगेन च षड्विधो रसः। इत्थमाहत्य रसस्य त्रिषष्टिप्रकारकभेदाः चरकसंहितायां प्रदर्शिताः।[3]

षड्रसेषु सोमरसस्याधिक्यात् मधुररसः उत्पद्यते। पार्थिव-तेजोगुणयोराधिक्यात् अम्लरसो जायते। जल-अग्निगुणयोराधिक्यात् लवणरसस्योद्भवो भवति। वायु-आकाशगुणयोराधिक्यात् तिक्तरस उत्पद्यते। वायु-पृथिवीगुणयोराधिक्यात् कषायरसो जायते। इत्थं हि षड्रसानामुत्पत्तिः।[4] पञ्चमहाभूतानां न्यूनाधिक्यवशात् जङ्गमप्राणिनां बहुविधा वर्णाः प्रकृतयश्च जायन्ते। इत्थं पञ्चमहाभूतानां न्यूनातिरेकेण ऋतुवैचित्र्याच्च षड्रसेषु वैचित्र्यं परिलक्ष्यते।[5] अग्नि-वायुप्रधानरससमूहवायुः लघुत्वात् प्लवकत्वात् अग्नेरूर्ध्वजलनत्वाच्च प्रायशः ऊर्ध्वगामी भवति। जल-पृथिव्यात्मकरससमूहः जलस्य निम्नगामित्वात् पृथिव्याः गुरुत्वहेतोः च प्रायशः अधोगामी भवति। मिश्रात्मकरससमूहः ऊर्ध्वाधोदेशगामी भवति। एतेषां षण्णां रसानां गुणः कर्म च समासेन उल्लिख्यते।

षड्रसेषु मधुररसः देहेन एकात्मतामधिरोहति, अतः रस-शोणित-मांस-मेदस्-अस्थि-मज्जा-ओजस्-शुक्राणां वर्द्धनकरः आयुष्करश्च, चक्षुः-कर्ण-नासिका-जिह्वा-त्वग्-मनसां षण्णामिन्द्रियाणां प्रसन्नकारकः, बलवर्णसाधकः, पित्त-विष-वातनाशकः, तृष्णाप्रशमिता, त्वक्केशकण्ठानां हितजनकः, आह्लादजनकः, जीवनीयः, तर्पणीयः, स्नेहनीयः, देहस्य स्थैर्यसम्पादकः, क्षीण-क्षतस्थानसन्धाता, नासिका-मुख-कण्ठ-जिह्वानाम् आह्लादजनकः, दाहमूर्च्छाप्रशमिता, भ्रमरपिपीलिकानाम् इष्टतमः, स्निग्धः, शीतलः गुरुश्चेति। मधुररसस्यैतादृशहितजनकत्वात् गुणशालित्वाच्च अपि केवलं मधुरद्रव्यस्यातिरिक्तसेवनेन देहे स्थूलता, आलस्यम्, अतिनिद्रा जायते, देहस्य गुरुत्वं, खाद्यद्रव्ये अरुचिः, अग्निमान्द्यं,

मुख-कण्ठयोर्मांसवृद्धिः, काशः, प्रतिश्यायः, अलसकः, विसूचिका, शीतज्वरः, अनाहः, मुखे मुधरता, वमनं, संज्ञा-स्वरयोः नाशः, गलगण्डः, गण्डमाला, श्लीपदः, गलशोथः, धमनी-मलद्वारयोरुपलेपः, नेत्ररोगः, अभिष्यन्दः इत्येतेषां नानाविधकफजातपीडाः समुत्पद्यन्ते। अम्लरसेन अन्नं रोचते, अग्निरुद्दीप्यते, शरीरे पुष्टिः साध्यते, शरीरं तेजस्वि भवति, चित्ते चैतन्यमायाति, इन्द्रियसमूहः दृढः बलवान् च भवति। असौ रसः वायोरनुलोमकः, हृदयस्य तृप्तिजनकः, मुखलालानिःश्रावकः, वमन-विरेचनैः भुक्तद्रव्याणामपकर्षणकारी, क्लेदजनकः, जीर्णताकारकः, देहस्य तृप्तिविधायकश्चेति। अयं लघुः, उष्णः स्निग्धश्च। एकधा अम्लरसस्य मङ्गलजनकत्वे बहुगुणयुक्तत्वे चापि अन्यत्र एतस्याधिकसेवनेन दन्तहर्षं, तृप्तिं, चक्षुषोर्निमीलततां, लोमहर्षं, कफे तरलतां, पित्तवृद्धिं, रक्ते दूषितभावं, मांसदाहं, देहस्य शिथिलतां क्षीणतां च, क्षतस्य दुर्बलव्यक्तेः च शोथं च उत्पादयति। अम्लरसस्याग्नेयस्वभावयुक्तत्वात् क्षत-अभिहत- सर्पादिदंष्ट्र-दग्ध-भग्न-शूलयुक्त-च्युत-अवमूत्रित-विषाक्तजन्तुनिःसृतमूत्रपरिसर्पित-मर्दित-च्छिन्न-विद्ध- उत्पिष्टप्रभृतिप्रदानानां पक्वतां साधयति। कण्ठ-वक्षस्-हृदयेषु ज्वालानुभूयते। लवणरसस्य गुणः तावत् अयं पाचकः, क्लेदकारकः, अग्न्युद्दीपकः, छेदकारकः, भेदकारकः, तीक्ष्णसारकः, विकाशजनकः, अधः स्रंसकरः, छिद्रोत्पादकः, वातहरः, शरीरे स्तम्भता-बद्धता-काठिन्यविनाशकः, सर्वरसप्रत्यनीकभूतश्चेति। तन्नाम लवणरसस्याधिक्यात् रसान्तराणां प्रतीतिर्न परिलक्ष्यते। रसोऽसौ मुखस्य स्रावककारी, कफस्य निःष्यन्दकारी, धमन्यादिपथसमूहानां शोधकः, समुदयदेहावयवानां मृदुताकारी, आहारे रुच्युत्पादकः सर्वोपरि आहारोपयोगी चेति। अयं गुरुः, स्निग्धः उष्णश्चेति। लवणरसस्य एतादृशोपकारि-गुणत्वे मङ्गलजनकत्वे च सत्यपि अतिरिक्तसेवनेन पित्तकोपः वर्द्धते, शोणितो वर्द्धते, पिपासा जायते, मूर्च्छा आगच्छति, देहे ताप एधते, गात्रदाहो जायते च। मांसे कण्डुता उत्पाद्यते, विषं वर्द्धते, शोथस्थाने स्फोटो जायते, दन्तसमूहः श्यामवर्णतामाप्नोति, खल्वाटो जायते। अत्यधिकलवणव्यवहारेण रक्तपित्त-अम्लपित्त-वातरक्त-विचर्चिकेत्यादिरोगाः संजायन्ते। कटुरसः मुखशोधनकारी, अग्न्युद्दीपकः, भुक्तद्रव्यशोषणकारी, नासिकायाः कफनिःसरणकारी, चक्षुर्विरेचकः, इन्द्रियसमूहस्य प्रकाशकः अलसकश्च, शोथदेहयोः उपचय- अभिष्यन्द-स्नेह-स्वेद-क्लेद-मलनाशकश्चेति। अन्नरुचिकरः, कण्डु-व्रणविनाशकः, कृमिनाशकः, मांसविलेथनकारी, शोणितसंघाते भेदसम्पादकः, शिरःप्रभृतिषु पथिविस्तारकारकः, श्लेष्माप्रशमनकारी च। अयं लघुः उष्णः रुक्षश्चेति। कटुरसस्य एतादृशोत्कृष्टगुणत्वे हितजनकत्वे च सत्यपि अत्यधिकसेवनेन अस्य विपाकप्रभावेण च पुरुषत्वहानिर्भवति, रस-वीर्यप्रभावे मोहं च उत्पादयति। ग्लानिर्जायते, देहे अवसन्नताम् उत्पादयति, शरीरं कृशं जायते, मूर्च्छा-अन्धकार-भ्रमाः उपस्थिता भवन्ति, कण्ठप्रदेशे

ज्वलनं देहे तापं च उत्पादयति, बलं ह्रासयति, पिपासां जनयति च। कटुरसस्य वायु-अग्निबहुलत्वे सति अतिमात्रव्यवहारेण भ्रमः मदः वेदना भेदश्च जायते। हस्त-पाद-पार्श्व-पृष्ठ-त्रिकप्रभृतिस्थानेषु वायुजनितरोगं जनयति। तिक्तरसः अरुचिनाशकः। अयं विष-कृमिनाशकः, मूर्च्छा-दाह-कण्डु-कुष्ठा-तृष्णाप्रशमनकारी, त्वङ्मांससम्पादकः, ज्वरनाशकः, जठराग्न्युत्पादकः, पाचकः, वमनकारकः, क्लेद-मेदस्-मज्जा-स्वेद-मूत्र-विष्ठा-पित्त-श्लेष्माणाम् उपशोषणकारकः च। रसोऽयं रुक्षः शीतलः लघुः च। तिक्तरसस्य एतादृशगुणयुक्तत्वे सत्यपि अतिरिक्तसेवनेन अतिशयरुक्षगुणविशिष्टात् खरगुणत्वात् रस-रक्त-मांस-मेदस्-अस्थि-मज्जा-शुक्रसमुदयधातून् शुष्कयति, स्रोतस्सु खरतां सम्पादयति, दैहिकबलं ह्रासयति, देहं कृशयति, ग्लानि-मोह-भ्रमांश्च उत्पादयति, मुखं शुष्कं करोति, नानाप्रकारकवायुरोगं जनयति च। कषायरसः त्रिदोषशान्तिकारकः, संग्राही, मलमूत्ररोधकः, धातुपोषकः, उत्पीडकः, शोथाधिसंकोचकः, व्रणादिरोपणकारी, क्लेदे शुष्कतासम्पादकः, स्तम्भनकारकः, शुष्कतासम्पादकः, स्तम्भनकारकः, श्लेष्मा-रक्तपित्तप्रशमनकारकः, दैहिकक्लेदोत्पादकः च। रसोऽयं रुक्षः शीतलः गुरुश्चेति। कषायरसस्यैतादृशगुणयुक्तत्वे सत्यपि अत्यधिकव्यवहारेण मुखे शुष्कता जायते, हृदयपीडा, उदराष्मान्, वाग्रोधः, स्रोतस्सु बद्धता जायते, पुरुषत्वहानिः, वायु-मूत्र-रेतो-विष्ठाबद्धता-कृष्ण-ग्लानि-पिपासाः जायन्ते। रसस्यास्य विशदगुणात् रुक्षगुणाच्च अतिरिक्तसेवनेन पक्षवध-पक्षग्रह-अर्दितादिविविधरोगाः समुत्पद्यन्ते। एतेषां षड्विधरसानां पृथग्रूपेण मात्रानुरूपसमप्रकारकप्रयोगेण वा व्यवहारेण अध्यात्मलोकस्य अत्यन्तं हितं भवति। किन्तु अयथाप्रयोगेण तद्विपरीतानिष्टमपि न ह्यसम्भवम्। तस्मात् विचक्षणेन चिकित्सकेन रोगोपशमाय एते रसाः सुमात्रया व्यवहार्याः। शीतवीर्यद्रव्यसमूहे पाके रसे च मधुरः। उष्णवीर्यद्रव्यसमूहे पाके रसे च कटुः। यानि द्रव्याणि वीर्ये विपाके च रसस्याविरोधिनः, केवलं रसोपदेशे एव तेषां गुणो निर्दिश्यते। किन्तु वीर्ये विपाके च रसस्य विरोधिनः, केवलं रसस्योल्लेखे गुणस्योपदेशो न भवति। मधुर-कषाय-तिक्तरसाः शीतवीर्या भवन्ति इति न। कानिचन द्रव्याणि मधुर-कषाय-तिक्तरसत्वेऽपि उष्णवीर्याणि भवन्ति। यथा बृहत्पञ्चमूलस्य कषायरससत्त्वेऽपि उष्णः, आनुपपशोः मांसस्य मधुररससत्त्वेऽपि उष्णः। सैन्धवलवणरसः उष्णो न भवति, आमलकस्याम्लरससत्त्वेऽपि उष्णो न भवति। पुनश्च आकन्द-अगुरु-गुलञ्चप्रभृतयः तिक्तरसत्वादपि उष्णवीर्याः। कानिचन अम्लद्रव्याणि मूलसंग्राहकाणि, कानिचनि अम्लद्रव्याणि विरेचकाणि च। प्रसङ्गेऽस्मिन् आयुर्वेदे उक्तम्– कयेद्बिल्वफलम् अम्लरसत्वादपि संग्राहि, आमलकं अम्लरसत्वादपि मृदुभेदकं च भवति। पिप्पलिः कटुरसत्वादपि पुष्टिकारकः, किन्तु कटुरसः अवृष्यत्वेन ज्ञातः। कषायरसः स्तम्भनकारकः शीतलश्च, किन्तु हरितकिः

कषायरसत्वादपि स्तम्भनशैत्यगुणविरोधी। रुक्षगुणयुक्तेषु रसेषु कषायरसः सर्वापेक्षया रुक्षः, कटुरसः मध्यमपरिमाणः तिक्तरसः तदपेक्षया न्यूनः रुक्षः। उष्णवीर्यरससमूहेषु लवणं सर्वापेक्षया अधिकम् उष्णवीर्यम्, अम्लरसः मध्यमः, कटुरसः न्यूनः च उष्णवीर्यः। स्निग्धकारकद्रव्येषु मधुररसः सर्वापेक्षया अधिकः स्निग्धकारकः, अम्लरसः मध्यमरूपः स्निग्धकारकः, लवणरसः अल्पः स्निग्धकारकश्चेति। कषायरसः तिक्तरसात् शीततरः, मधुररसः तिक्तरसात् शीततमश्च। मधुररसः सर्वेषु रसेषु अधिकः गुरुः, कषायरसः मध्यमः गुरुः, लवणः न्यूनः गुरुः। कटुरसः अम्लरसात् लघुः, तिक्तरसः सर्वापेक्षया लघुः। केचन तु लवणमेव सर्वापेक्षया लघुत्वेन प्रस्तुवन्ति। उभयमते तु गुरुत्व-लघुत्वविषययोः लवणरसोऽधमः। मधुर-लवण-अम्लरसाः त्रिविधाः स्निग्धकरत्वात् वायु-मूत्रसम्बन्धे सुखकराः। कटुतिक्तकषायाणां त्रिविधरसानां रुक्षस्वभावात् एतैः अतिकष्टेन वायु-विष्ठा-मूत्राणि उत्सर्जितानि भवन्ति। स्निग्धता-प्रीति-आह्लाद-मृदुताभिः मधुररसोऽनुभूयते। मधुररसः मुखे स्थाप्यते चेत् मुखमयः तिष्ठति। दन्तहर्षेण, मुखाज्जलनिःसरणेन, मुखकण्ठयोर्ज्वलनेन च अम्लरसो ज्ञायते। यः रसः मुखे स्थाप्यते चेत् आशु लयं प्राप्नोति, मुखात् क्लेदो निःसृतो भवति, मुखं ज्वल्यते, मुखं लघुतामाप्नोति स एव लवणरसः। यः रसः जिह्वायामुद्वेगमुत्पादयति, रसनायां मिलितायां सत्यां यन्त्रणां बोधयति, मुख-नासिका-चक्षुर्ज्वलनं जायते, तादृशस्थानात् जलं स्रावयति च स एव कटुरसः। यः रसः रसनायां लिप्तायां सत्यां शक्तिं नाशयति, क्वापि रुचिर्न तिष्ठति, मुखे विषण्णता-शुष्कता-प्रह्लादकारकश्च स एव तिक्तरसः। येन रसेन रसनाया विषमता, स्तम्भता जडता च जायते, कण्ठस्थाने बद्धता उत्पद्यते, स एव कषायरसः।

एते षड्विधरसाः प्रथमम् आकाशात् निपतिता भवन्ति, ततः पञ्चमहाभूतानां गुणं स्वीकृत्य स्थावरजङ्गमपदार्थसमूहानां देहं परितोषयन्ति, अनेन समुदायेन मूर्तौ मधुरादिभिः क्रमशः प्रकाश्यते।

काव्यसाहित्ये रसस्वरूपप्रसङ्गे उच्यते यत् रत्यादीनां लौकिकाभ्यां कारणकार्याभ्यां, सहकारिगुणैः स्वगतरतिः परगतरतिः भृशम् अनुमीयते चेत्, सहृदयमनसि रतिसंस्कारो जायते। क्रमशः विभावानुभावव्यभिचारिभावैः व्यपदिष्टः साधारणीकृतो भवति। अत एव व्यक्तिविशेषसम्बन्धरहितरूपात् सहृदयहृदये यदा संस्काररूपेण विराजमानसामाजिक-रत्यादीनामभिव्यक्तिर्भवति, तदा रत्यादिस्थायिभावः सामाजिकप्रत्यक्षादिप्रमाणेन अपरिपक्व-योगिज्ञानात् आत्ममात्रपर्यवसितपरिपक्वयोगिज्ञानाद्वा भिन्नरसनारूपानुभूत्या च आस्वाद्यमानं भवति चेत्, स रस उच्यते। अधुना प्रश्नो जायते यत् मधुरादिरस-पारद-शब्दादिविषय-

सारतत्त्व-जलसंस्कार-अभिनिवेश- क्वाथेत्यादिभिः रसपदवाच्यः प्रसिद्ध :। तर्हि आचार्येण भरतेन कस्मिन् प्रवृत्तिनिमित्ते रसशब्दस्य साहित्यिकप्रयोगः कृतः? एवञ्च 'रसः इति कोऽर्थः?' प्रश्नवाक्येऽस्मिन् अर्थशब्दः प्रवृत्तिनिमित्तबोधकः। अयं भावः- साहित्ये शृङ्गारादिरसे रसशब्दस्य प्रवृत्तौ किं कारणम्? प्रश्नस्योत्तरे भरतमुनिः शृङ्गारादिरसे रसशब्दस्य प्रवृत्तौ आस्वाद्यतामवोचत्। अर्थात् यथा मधुरादिलौकिकरसाः आस्वाद्यन्ते, तथैव साहित्ये शृङ्गारादिरसा अपि सामाजिकैः आस्वाद्यन्ते। अत एव आस्वाद्यत्वरूपसादृश्यात् शृङ्गारादौ रसशब्दः प्रयुज्यते। लौकिकमधुरादिरसैः सह अलौकिकशृङ्गारादिरसानां साम्यं प्रदर्शयितुं भरतः लौकिकदृष्टान्तमाश्रितवान्। स जगाद यथा लोके बहुविधव्यञ्जनस्थ-संस्कृतमधुरादिरसास्वादनेन हर्ष-पुष्ट-तृप्ति-जीवन-बल-आरोग्यप्रभृतयः प्राप्यन्ते, तथैव काव्येषु नाट्येषु च निर्मलचित्ताधिकारी रसिकः प्रेक्षकश्च विभावानुभावव्यभिचारिभावैः अभिव्यक्तं वाचिक-आङ्गिक-सात्त्विक-आहार्याभिनयप्रसूतं स्थायिभावरूपरसमास्वादयति, तेन ते लोकोत्तरहर्षं धर्मादौ वैदग्ध्यादि च प्राप्नुवन्ति। उदाहरणेनानेन लौकिकमधुरादिरसैः सह काव्य-नाट्योक्तशृङ्गारादिरसानां भोग्य-भोक्तृ-फलसाम्यं च प्रदर्शितम्। यथा लोके व्यञ्जनसंस्कृतमन्नं भोग्यम्। एकाग्रचित्ताधिकारी भोक्ता आस्वादयिता, प्रहर्ष-पुष्टि-जीवन-बल-आरोग्यादीनां प्राप्तिरेव आस्वादनफलम्। इत्थं हि काव्य-नाट्ययोर्विभावादिभिः अभिव्यक्तः स्थायिभाव आस्वाद्यः। वर्णनीयस्थायिभावे तन्मयीभावकारी निर्मलहृदयः सामाजिकः आस्वादयिता, तथैव हर्षधर्मादौ वैदग्ध्यादिप्राप्तिरेव आस्वादनफलमिति।

सम्प्रति जिज्ञासा जायते लौकिकमधुरादिरसस्य रसनेन्द्रियजन्यास्वाद्यत्वात् तत्र रसशब्दप्रयोग उचित एव, किन्तु काव्यनाट्यरसशृङ्गारादौ रसनेन्द्रियजन्यताया अभावः दृश्यते। अत एव तत्र रसशब्दप्रयोगे आस्वाद्यत्वं कथं हेतुत्वेन स्वीक्रियते? समाधानत्वेन उक्तं यत् काव्यगते नाट्यगते च रसे मानससाक्षात्काररूपरसनाव्यापारे भोग्य-भोक्तृ-फलानां साम्यात् लौकिकरसनाव्यापारस्यारोपेण स रसत्वेन गृह्यते। वस्तुतः लौकिकमधुरादिरसेऽपि रसज्ञानं मनसा एव भवति, न हि रसनेन्द्रियेण। तस्मादेव भरतेन 'रसानास्वादयन्ति सुमनसः पुरुषाः' इत्याद्युक्त्या एकाग्रचित्ताधिकारी पुरुषः मधुरादिरसास्वादने अधिकारी उक्तः, नान्यः। अत एव रसनेन्द्रियव्यापारेण मधुरादिरसज्ञानं तु प्रत्येकं पुरुषेण सम्भवमुचितं च। तस्मादेव अभिनवगुप्तपादेन भणितम् -

**एकाग्रमनसि च भोक्तार्यास्वादयितृता।**
**अन्यचिन्तस्य भुञ्जानस्याप्यास्वादाभिमानाभावात्॥**[6]

एतेन ज्ञायते यत् रसास्वादनं हि मानसप्रतीतिः, न हि रसनेन्द्रियजन्यप्रतीतिः।

'सुमनसः' इत्यस्मिन् शब्दे सु-उपसर्गप्रयोगः एतदेव साधयति यत् यस्य मनः रागद्वेषादिविकारयुक्तः, स एव व्यक्तिः मधुरादिरसमास्वादयति, न हि अपरः। स एव रसास्वादनजन्यहर्ष-बल-जीवनादिफलं वास्तविकरूपेण प्राप्नोति। 'अन्नं भुञ्जाना रसानास्वादयन्ति' इत्याद्युक्त्या रसास्वादनकारी व्यापारः अन्नभोजनव्यापारात् भिन्नः कृतः। कारणं हि रसनेन्द्रियव्यापारः अन्नेन सम्बन्धितः, मानससाक्षात्कारः मानसप्रतीतिरूपव्यापारश्च मधुरादिरसेन सम्बन्धयुक्तः। तस्माद्भोजनमास्वादनं च उभयथा प्रतिपादितम्, उभयत्र अन्नात् रसरूपस्य परस्परं भिन्नविषयत्वं निर्दिष्टम्। अत एव आस्वादनं रसनेन्द्रिय-जन्यत्वाभावात् भोजनानन्तरं मानसप्रतीतिरूपं भवति। मधुरादिरसे आस्वादनं रसनेन्द्रिय-व्यापाररहितं, किन्तु मानसप्रतीतिरूपमेव। मानसप्रतीति-रूपव्यापारस्यास्य सत्ता लौकिकमधुरादिरसे काव्यगत-नाट्यगतालौकिकशृङ्गारादिरसे च समानतया विद्यते। लोके तु अयं व्यापारः रसनाव्यापारानन्तरं भवति। किन्तु काव्ये नाट्ये च शृङ्गारादिरसेषु अयं व्यापारः रसनाव्यापारात् परं न भवति। सन्दर्भेऽस्मिन् अभिनवगुप्त उवाच– '**रसनाव्यापाराद्भोजनाधिको यो मानसो व्यापारः स एवास्वादनम्। एतदुक्तं भवति न रसनाव्यापार आस्वादनम्। अपि तु मानस एव। स चात्राविकलेऽस्ति। केवलं लोके रसनाव्यापारानन्तरभावी स प्रसिद्ध इत्युपचार इह दर्शित इति।**'[7]

आयुर्वेदे रसस्वरूपम् आधुनिकचिकित्सायां वैज्ञानिकभाषायां ग्लुकोज् इतिवत्। रसस्येत्थमर्थाभिव्यक्तिः भौतिकस्वरूपपरिचायिका अस्ति, मानसिकधरायां पर्याप्तानन्ददायिनी न भवति च। जिह्वास्तरेऽयमानन्दः सहजलभ्यः। किन्तु पाचनक्रियया निर्मिते उक्तरसे आनन्दानुभूतिः कथञ्चिदपि न जायते। एवञ्च आयुर्वेदे निर्देशितरसे आनन्दः प्रायः न गण्यः। अत्र भौतिकस्तरे तरलद्रव्यरूपेण व्याख्यातः। जीवनस्य पोषकतत्त्वरूपेण अस्यास्तित्वं विद्यते। काव्यसाहित्ये वर्णितेनानन्दरूपेण सह अस्य बिन्दुमात्रसम्पर्को नास्तीति शम्।

*

## सन्दर्भाः

1. चरकसंहिता, सूत्रस्थानम्, षड्विंशतितमाध्यायः, पृ.234
2 चरकसंहिता, सूत्रस्थानम्, अध्यायः-26, पृ.236
3. चरकसंहिता, अध्यायः-26, पृ.237
4. चरकसंहिता, अध्यायः-26, पृ.240
5. चरकसंहिता, अध्यायः-26, पृ.245
6. अभिनवभारती, पृ.286
7 अभिनवभारती, पृ.260

*

# क्षीरस्वामि-सायणाचार्ययोः दृष्ट्या परस्मैपदिधातूनामर्थवैसादृश्यम्

डॉ. अनिन्द्य चौधुरी

भगवता पाणिनिना प्रणीतव्याकरणसम्प्रदायः पञ्चाङ्गसमन्वितो वर्तते। तानि पञ्चाङ्गानि हि धातुसूत्रगणोणादिवाक्यलिङ्गानुशासनानि। व्याकरणस्य पञ्चस्वङ्गेषु प्रधानं सूत्रपाठः। धातुपाठादीनि इतराणि अङ्गानि सूत्रपाठस्य उपकारकत्वात् एतदपेक्षया तानि गौणत्वेन अङ्गीकृतानि। धातुपाठस्य प्रवचने विधिद्वयमुपलभ्यते लघुपाठः वृद्धपाठश्च। धात्वर्थनिर्देशरहितधातुपाठस्य लघुपाठ इत्यभिधानम्। पक्षान्तरे, धात्वर्थसमन्वितधातुपाठः वैयाकरणनिकाये वृद्धपाठ इति प्रसिद्धम्। सार्थनिर्दिष्टधातुपाठस्य तथा वृद्धपाठस्य पूर्वदेश-पश्चिमोत्तरदेश-दाक्षिणात्यदेशभेदात् पाठत्रयं दृश्यते। धातुपाठस्य प्राच्यव्याख्यातृषु मैत्रेयाचार्यादीनां पाठः पूर्वदेशीयः, क्षीरस्वाम्यादीनां पाठः पश्चिमोत्तरदेशीयः, पाल्यकीर्तेः पाठः दाक्षिणात्यपाठः इति सर्वविदितम्। एतत्त्रिभागेभ्यः व्यतिरिच्य पाणिनीयधातुपाठम् आश्रित्य सायणाचार्येण परिष्कृतः 'माधवीया धातुवृत्तिः' इति ग्रन्थो विरचितः। अयमेव ग्रन्थः साम्प्रतिकपाठत्वेन उपलभ्यते।

भट्टेश्वरस्वामिनः सुपुत्रेण शब्दशास्त्रनिष्णातेन क्षीरस्वामिना रचितः धातुपाठसम्बन्धिनी क्षीरतरङ्गिणी इति ग्रन्थः प्रथितः। सम्प्रत्युपलभ्यमानासु सर्वासु धातुवृत्तिषु क्षीरतरङ्गिणी इत्याख्या धातुवृत्तिः प्राचीनतमा, अतिमहत्तां च भजते। 'यज् देवपूजासङ्गतिकरणदानेषु'[1] इति धातुसूत्रस्य व्याख्यायां यजुः काठकम् इति क्षीरस्वामिना भणितम्। अस्मादनुमीयते यत् महाभागः क्षीरस्वामी कश्मीरदेशीयः कठशाखाध्यायी आसीदिति। कठशाखाध्यायि-ब्राह्मणाः कश्मीरदेशे एव उपलभ्यन्ते। तद्विरचिते क्षीरतरङ्गिणीति ग्रन्थे अन्तिमश्लोकात् प्रतीयते यत् कश्मीरदेशवास्तव्योऽयमासीदिति। शतोत्तरसहस्रविक्रमाब्दात् पञ्चनवत्यधिक-शतोत्तरसहस्र- विक्रमाब्दं यावत् क्षीरस्वामिनः कालः। व्याघ्रभूति-मैत्रेयरक्षित-क्षीरस्वामि-प्रभृतिविद्वद्भिः वैयाकरणैः प्रणीतानां प्राचीनानामर्वाचीनानां च विविधानां धातुव्याख्या-

मूलकग्रन्थानां सायणाचार्यविरचितस्य माधवीया धातुवृत्तिः इत्याख्यः ग्रन्थः उत्कृष्टतमः इति मन्यन्ते मनीषिणः। माधवाभिधं ज्येष्ठभ्रातरं संस्मृत्य वेदभाष्यकारः सायणाचार्यः धातुव्याख्यामूलकस्य प्रकृतग्रन्थस्य अभिधानं विहितम्। विजयनगरनिवासी आचार्यः सायणः द्विसप्तत्युत्तरत्रिशताधिकैकसहस्रविक्रमाब्दे लब्धजन्मा चतुश्चत्वारिशदधिकचतुःशतोत्तरैक-सहस्रविक्रमाब्दे लोकं तत्याज।

'भूवादयो धातवः'[2] इति सूत्रानुसारं क्रियावाचकानां भू-वा-प्रभृतीनां धातूनां धातुसंज्ञा विधीयते। आचार्येण पाणिनिना धातोः संज्ञाविषयि न किमपि सूत्रं प्रणीतम्। धातुपाठ-ग्रन्थेऽपि धातोः लक्षणं न किमपि भणितं भगवता, साक्षात्तत्र 'भू सत्तायाम्'[3] इति धातोरेव उल्लेखः पाठो वा दृश्यते। अधुना को नाम धातुः इति संशये उच्यते यत्– 'दधाति धारयति क्रियारूपमर्थम्, भ्वादिगणपाठमर्यादाञ्च दधाति = सर्वं नाम धातुजमाह इति सिद्धान्तात् निष्पादनद्वारा प्रातिपदिकानि पुष्णाति इति वा धातुः। धाधातोरौणादिकस्तुन् प्रत्ययः।'[4] कातन्त्र-व्याकरणे आख्यातप्रकरणे धातुलक्षणं ख्यापयता उक्तम्– 'क्रियाभावो धातुः।'[5] सूत्रस्यास्य व्याख्यानवेलायाम् उक्तं यत्- यः शब्दः क्रियां भावयति प्रतिपादयति च स धातुसंज्ञो भवति इति। सारस्वतव्याकरणम् इति ग्रन्थस्य– 'भू सत्तायामित्यादिगणो धातुसंज्ञा भवति।' उक्तांशस्य व्याख्यानवेलायां धातुलक्षणप्रसङ्गे चन्द्रकीर्तिटीकायामुक्तम्– 'दधात्यर्थमिति धातुः।'[6]

धात्वर्थविषये क्षीरस्वामिनोक्तम्– 'धात्वर्थः केवलः शुद्धो भाव इत्यभिधीयते।'[7] ये तावत् वैयाकरणाः धातुपाठम् आचार्यपाणिनिप्रणीतत्वेन मन्यन्ते, तेऽपि धात्वर्थविषये विरुद्धं मतमुपस्थापयन्ति। वैयाकरणेषु भट्टोजिदीक्षितादयः धात्वर्थनिर्देशा पाणिनिना अकृता इति मन्यन्ते। उद्द्योतटीकायां नागेशाचार्येण उक्तम्– 'भीमसेनेनेत्यैतिह्यम्' इति। एवं रूपेण इतिहासपर्यालोचनया ज्ञायते यत् भीमसेनेन धातूनाम् अर्थनिर्देशः कृतः। पतञ्जलिप्रभृतयः वैयाकरणाः धात्वर्थनिर्देशः पाणिनिकृत इति मन्यन्ते।

### परस्मैपदिधातूनां धात्वर्थवैसादृश्यम्–

भ्वादिगणीयस्य परस्मैपदिनः 'लुट' (लुट्) इति धातोः धात्वर्थप्रसङ्गे आचार्यक्षीर-स्वामिनः सायणाचार्यस्य च मतानैक्यं दृश्यते। क्षीरस्वामिना 'लुट विलोटने' इति धातुसूत्रस्य पाठः कृतः। तेन लुट्-धात्वर्थः विलोटन इति। पक्षे पाणिनीयधातुपाठे 'लुट विलोडने'[10] धातुसूत्रम् अनुसरन् सायणाचार्येण भ्वादिगणीयस्य परस्मैपदिनः लुट्-धातोः विलोडन[11] रूपार्थः अङ्गीकृतः। विलोडनम् इत्यस्य आलोडन[12]मित्यर्थः। अत एव लुट्-धातुविषये आचार्ययोः सायणक्षीरस्वामिनोः मतानैक्यं दृश्यते। धात्वर्थविषये

सायणपक्षम् आचार्यः हेमेन्द्र[13] तथा आचार्यः मैत्रेयरक्षितः[14] च अवललम्बाते। भट्टोजिदीक्षितेन कातन्त्रधातुपाठकर्त्रा च विलोडनार्थे एव परस्मैपदी लुट्-धातुः पठितः दृश्यते। लुट् इति धातोः लोटति इत्यादिरूपाणि भवन्ति। 'लुट विलोडने' इति धातुसूत्रस्य व्याख्यायाम् आचार्यसायणेन निगदितं यत् भू सूत्रे सुधाकरव्याकरणे 'लुल विलोडने' इत्याकारकः लान्तः धातुः पठित उपलभ्यते। 'लुल्'–धातोः प्रयोगः शिशुपालवधमहाकाव्ये प्राप्यते यथा–

**आश्लिष्टभूमिं रसितारमुच्चैः लोलद्भुजाकारबृहत्तरङ्गम्।**
**फेनायमानं पतिमापगानामसावपस्मारिणमाशशङ्के॥**[15]

भ्वादिगणीयस्य परस्मैपदिनः 'घुषिर्' इति धातोः पाठः 'घुषिर् अविशब्दने'[16] इत्याकारकः दृश्यते। सदृशः पाठः सायणाचार्येणापि कृतोऽस्ति। तेनानयोः अत्र सादृश्यं स्पष्टम् एव। सायणाचार्येण केवलम् अस्य धातोः अविशब्द[17] इत्याकारकः अर्थः निर्दिष्टः धात्वर्थप्रकाशिकाटीकायाम् अविशब्दपदार्थवर्णनवेलायाम् उक्तम्– अविशब्दनम्– अप्रतिज्ञानम्[18] इति। क्षीरस्वामिनः मते तु 'घुषिर्' (घुष्) इति धातोः अर्थः शब्दार्थः इति– 'घुषिर् शब्दार्थे'[19] इति। अत एव धात्वर्थविषये क्षीरस्वामिनः सायणाचार्यस्य च मतवैसादृश्यं परिलक्ष्यते। क्षीरस्वामिना सह मैत्रेयाचार्यस्य धात्वर्थे सादृश्यं परिदृश्यते। उभयाभ्यामपि 'घुषि शब्दार्थे'[20] इति पाठः कृतः। सायणपक्षमवलम्ब्य भट्टोजिदीक्षितेन 'घुषिर् अविशब्दने'[21] इति धातुपाठः पठितः। पाणिनीयधातुपाठे तावत् 'घुषिर् अविशब्दने' इत्यनन्तरं 'शब्द इति अन्ये पेठुः' इत्याकारकः पाठ उपलभ्यते। उक्तविषये भट्टोजिदीक्षितेनापि अनुरूपाभिमतः पोषितः। आचार्येण हेमचन्द्रेण 'घुषृ शब्दे'[22] इति पठितः। कातन्त्रधातुपाठग्रन्थे 'घुषिर् शब्दे'[23] इत्येवंरूपेण पाठः पठितः। गोपनीयतया कृतेषु कार्यकलापेषु अपि धातुरयं प्रयुज्यते। यथा घोषति, अघुषत् इत्यादिरूपाणि 'घुषिर्' इति धातोरेव भवन्ति। 'घुषिर्' इति धातोः प्रयोगः अभिज्ञानशाकुन्तलनाटके परिदृश्यते। यथा–

**येन येन वियुज्यन्ते प्रजाः स्निग्धेन बन्धुना।**
**स स पापादृते तासां दुष्यन्त इति घुष्यताम्॥**[24]

महामतिना पाणिनिना अदादिगणीयः 'वच' (वच्) इति धातुः परिभाषणार्थे पठितः अस्ति। तद्यथा– 'वच परिभाषणे'[25] इति। सायणाचार्येणापि पाणिनिसदृशः 'वच परिभाषणे'[26] इत्येवंरूपेण एव धातुसूत्रं पठितम्। परन्तु पण्डितेन युधिष्ठिरमीमांसकेन सम्पादिते मुद्रिते च क्षीरतरङ्गिणी इत्याख्ये ग्रन्थे 'वच भाषणे'[27] इति धातुः पठितः।

अत एव अत्रापि धात्वर्थविषये उभयोः आचार्ययोः यत्किञ्चित् धात्वर्थवैसादृश्यं परिलक्ष्यते। वच् इति धातोः परिभाषणार्थरूपधात्वर्थप्रसङ्गे धात्वर्थप्रकाशिकाटीकायाम् उक्तं यत्– परिभाषणम्– सर्वतः कथनम्[28] इति। भट्टोजिदीक्षितेन[29] अनुभूतिस्वरूपाचार्येण[30] तथा श्रीजीवगोस्वामिना[31] च सायणपक्ष एव समर्थितः। धातुरूपनन्दिनी इत्याख्ये ग्रन्थे जनार्दनहेगडेमहोदयेन परिभाषणार्थे एव अयं धातुः पठितः।[32]

भाषणार्थे वच्-धातुं पठित्वा अर्थात् क्षीरस्वामिपक्षं समर्थयन् आचार्येण हेमचन्द्रेण 'वच भाषणे'[33] इति धातुः पठितः। मैत्रेयाचार्येण 'वच भाषणे'[34] इतिस्वरूपेण धातुः धातुप्रदीपाख्ये ग्रन्थे पठितः। कातन्त्रधातुपाठः इति ग्रन्थेऽपि भाषणार्थे एव वच्-धातुः लभ्यते। वच्-धातोः वक्ति, वक्ता, उवाच इत्यादिरूपाणि सम्भवन्ति।

अनुपूर्वकस्य वच् इति धातुः अनुवादः आवृत्तिः चेत्यर्थयोः प्रयुज्यते। विपूर्वकस्य वच्-धातोः व्याख्या इत्यर्थः। सम्पूर्वकस्य वच्-धातोः सम्यक्कथनमर्थः। प्रतिपूर्वकवच्-धातोः उत्तरम्, अनुवदनम् इत्यादयः अर्थास्सम्भवन्ति। प्रतिपूर्वकवच्-धातुः कालिदासकृते कुमारसम्भवे पञ्चमसर्गे उदाहरणरूपेण प्रस्तूयते–

**अतोऽत्र किञ्चिद्भवतीं बहुक्षमां द्विजातिभावादुपपन्नचापलः।**
**अयं जनः प्रष्टुमनास्तपोधने! न चेद्रहस्यं प्रतिवक्तुमर्हसि।।**[35]

'तृप' (तृप) इति धातुः तुदादि-स्वादि-चुरादि-दिवादिगणेषु पठ्यते। दिवादिगणीयः तृप्-धातुः परस्मैपदी। दिवादिगणीयस्य तृप्-धातोः कृते महर्षिणा पाणिनिना 'तृप् प्रीणने'[36] इति पाठः पठितः। सायणाचार्यः पाणिनिः इव 'तृप प्रीणने'[37] इति धातुसूत्रं पठितम्। अस्य व्याख्यायां सायणाचार्येणोक्तम्– इह प्रीणनं तृप्तिस्तर्पणं च इति। माधवीयधातुवृत्तिकारस्य इममभिप्रायं संस्मृत्य जनार्दनहेगडेमहोदयेन भणितम्– प्रणीनम् = तृप्तिः, तर्पणं च[38] इति। तृप्त्यर्थकस्य तृपः अकर्मकत्वेऽपि तर्पणार्थकः तृप् सकर्मकत्वेन प्रयुज्यते। तृपः प्रीणनार्थकताप्रसङ्गे सायणाचार्येण पोषितस्य मतस्य समर्थनं भट्टोजिदीक्षितेनापि कृतम्। तृप्-धातुः प्रीणनार्थे हरिनामामृतव्याकरणम्,[39] सारस्वतव्याकरणम्,[40] कातन्त्रधातुपाठः[41] इत्यादिषु ग्रन्थेषु पठितः। बौद्धविदुषा मैत्रेयाचार्येण 'तृप् प्रीणने' इति पाठः कृतः।

क्षीरतरङ्गिणी इति ग्रन्थे आचार्यः क्षीरस्वामी दिवादिगणे 'तृप प्रीतौ'[42] इति सूत्रं पपाठ। आचार्यस्य मतेन परस्मैपदी तृप्-धातुः प्रीत्यर्थकः। प्रीतिरूपधात्वर्थविषये क्षीर-स्वामिनोक्तम्– प्रीतिः सौहित्यम्। अत एव तृप्-धातोः अर्थविषये क्षीरस्वामि-सायणाचार्ययोः मतपार्थक्यं विद्यते। क्षीरस्वामी इव आचार्यः हेमचन्द्रोऽपि प्रीत्यर्थे तृप्-धातुमुवाच–'तृपौच्

प्रीतौ।'[43] क्षीरस्वामिना इव आचार्येण हेमचन्द्रेणाप्युक्तम्– 'प्रीतिः सौहित्यम्।'

प्रीणन-तृप्ति-तर्पण-प्रीत्यर्थं व्यतिरिच्यापि तृप्तार्थे प्रसन्नार्थे चापि प्रयुज्यते। अस्य धातोः तृप्यति, तर्पिता, तृप्तः, अतृपत् इत्यादीनि रूपाणि भवन्ति। गणभेदात् तृप्-धातोः विविधानि रूपाणि भवन्ति। दशवलकारिकायामुक्तम् –

**चौरादिकोऽसौ तृपिराधृषीयः ष्वादौ दिवादौ पठितः स एव।**
**तृप्नोति सन्तृप्यति तर्पयन्ति रूपाणि चामूनि भवन्ति तस्य॥**[44]

**सोऽध्यैष्ट वेदांस्त्रिदशानयष्ट**
**पितॄनपारीत् सममंस्त बन्धून् ...**[45]

भट्टिकाव्यस्थोक्तश्लोकांशस्य जयमङ्गलाटीकायामुक्तं यत् अत्र पितॄनपारीत् इत्यस्य स्थले पितॄनताप्र्सीत् इत्याकारकोऽपि पाठ उपलभ्यते इति। पितॄनताप्र्सीत् इत्याकारकः पाठः सायणाचार्येण 'तृप प्रीणने' इति धातोः व्याख्यायाम् अगादि। अत्र पितृनताप्र्सीत् इति पदे तृप्-धातोः प्रयोगो विद्यते। हितोपदेशग्रन्थस्य सुहृद्भेदे तृप्-धातोः प्रयोग उपलभ्यते–

**बन्धुः को नाम दुष्टानां कुप्यते को न याचितः।**
**को न तृप्यति वित्तेन कुकृत्ये को न पण्डितः॥**[46]

अनेन धातुना णिच्प्रत्ययस्य योगात् तर्पयति इति रूपं सिद्ध्यति। सन्-प्रत्यययोगात् तितर्पिषति / तितृप्सति, यङन्तं च तरीतृप्यते इति च रूपाणि भवन्ति।

तुदादिगणे परस्मैपदिनः 'खिद' (खिद्) इति धातोः कृते पाणिन्याचार्यकृतं 'खिद परिघाते'[47] इति धातुपाठमनुसृत्य सायणाचार्येण खिद-धातोः परिघात[48] इत्येवार्थः स्वीकृतः। आचार्येण मैत्रेयेण धातुप्रदीपग्रन्थस्य तुदादिगणे 'खिद परीघाते'[49] इति पाठः पठितः। आचार्येण हेमेन्द्रेण 'खिदंत् परिघाते'[50] इति पाठः पठितः। एवंरीत्या भट्टोजिदीक्षितः[51], अनुभूतिस्वरूपाचार्यः,[52] कातन्त्रधातुपाठकार[53]श्च वैयाकरणाः परिघातार्थे एव खिद-धातुम् ऊचुः। क्षीरस्वामिनोऽत्र मतपार्थक्यं विद्यते। तेन तु 'खिद परितापे'[54] इति धातुः पठितः। अत एव सायणाचार्येण खिद-धातोः परिघातरूपार्थस्वीकारात् तथा क्षीरस्वामिना परितापार्थस्वीकारात् उभयोः मते खिद्-धातोः अर्थे भिन्नता स्पष्टा एव। क्षीरतरङ्गिनी इति ग्रन्थस्य सम्पादकीयमतेन– 'परितापे परितापनक्रियायामिति क्षीरस्वामी' इति पुरुषकारोद्धृतः पाठः। इह तु तथा नोपलभ्यते[55] इति। खिद्-धातोः खिन्दति, चिखेद, खेत्ता, अखिन्दत् खिद्यात्, खिन्देत् इत्यादि रूपाणि भवन्ति। तुदादिगणीयः खिद् इति धातुः यद्यपि परस्मैपदी किन्तु दिवादिगणीयः दैन्यार्थकः खिद् इति धातुः आत्मनेपदी। धातुरूपनन्दिनीग्रन्थे

जनार्दनहेगडेमहोदयः धातुपाठव्याख्यातुः आचार्यदेवस्य खिद्-धातुविषये कञ्चन श्लोकांशम् उदहरत् –

**दैन्येऽर्थे खिद्यते खिन्ते, परितापे ( घाते ) तु खिन्दति।**[56]

आचार्यपाणिनेः धातुपाठ-ग्रन्थस्य चुरादिगणे 'पीड अवगाहने'[57] इति धातुः पठितः। तं धातुं पाठञ्चानुस्मरता सायणाचार्येण चुरादिगणे पीड-धातुः अवगाहनार्थे[58] एव पठितः। अवगाहनपदस्य अर्थः क इति सुस्पष्टतया यद्यपि सायणेन व्याख्यायां न प्रदत्तः न वा धात्वर्थप्रकाशिकायामुक्तः। परन्तु कोशग्रन्थादिषु नपुंसकलिङ्गक-अवगाहनपदस्यार्थः स्नानम् अन्तःप्रवेश इत्यादयोऽर्था उक्ताः। सारस्वतव्याकरणस्य चुरादिगणे– 'पीड अवगाहने' धातुसूत्रस्य चन्द्रकीर्तिटीकायाम् अवगाहनार्थवर्णनवेलायामुक्तम्– अवगाहनं प्रवेशः[59] इति। बौद्धविदुषा मैत्रेयाचार्येण,[60] भट्टोजिदीक्षितेन,[61] कातन्त्रधातुपाठकृता[62] च अवगाहनार्थे एव पीडधातुः प्रयुक्तः।

आचार्येण सायणेन यद्यपि पीड इति धातुः अवगाहनार्थे पठितः तथापि आचार्येण क्षीरस्वामिना 'पीड गहने'[63] इति धातुसूत्रं पठितम्। क्षीरस्वामिमतेन– गहनं बाधा इति। अत एव सायणक्षीरस्वामिनोः मते पीड-धातोरर्थविषये मतानैक्यं विद्यते। क्षीरस्वामी इव आचार्यः हेमचन्द्रोऽपि 'पीडन् गहने'[64] इति धातुसूत्रस्य व्याख्यायामुक्तम्– गहनं बाधा इति। अवगाहनार्थं गहनार्थं च विहाय पीड-धातुः प्रतिकूलीभवनं, दुःखप्रदानम्, आच्छादनम्, उपेक्षणम् इत्याद्यर्थानां द्योतकः। अवपूर्वकस्य पीड इति धातोरर्थः बन्धनं, भारवत्त्वम् इत्यादयः। आपूर्वकः पीडधातुः बाधितार्थस्य वाचकः। उत्पूर्वकः पीडधातुः आहननं, वेगप्रवाहः, संघर्षः, चलायमानादिषु अर्थेषु प्रयुज्यन्ते। निस्पूर्वकः पीडधातुः निर्गमनं, बलपूर्वकं रोधनार्थे व्यवह्रियते। सम्पूर्वकः पीडधातुः एकत्रीकरणार्थे, सम्बन्धीकरणार्थे, संयुक्तकरणार्थे च प्रयुज्यते। चुरादिगणीयस्य परस्मैपदिनः[65] पीड-धातोः प्रयोगः नीतिशतकशीर्षके ग्रन्थे प्राप्यते। यथा–

**लभते सिकतासु तैलमपि यत्नतः पीडयन्।**
**पिबेच्च मृगतृष्णिकासु सलिलं पिपासार्दितः॥**[66]

क्षीरस्वामि-सायणाचार्ययोः मध्ये धात्वर्थभिन्नताकारणरूपेण अनुमीयते यत्– पश्चिमोत्तरप्रदेशे धातूनां यादृशोऽर्थो व्यवह्रियते स्म, तादृशधात्वर्थानामेवोल्लेखः क्षीरस्वामिना स्वकृते ग्रन्थे कृतः। पक्षान्तरे दक्षिणभारतस्थे विजयनगरजनपदे तथा तत्समीपवर्तिप्रदेशेषु धातूनां यथा अर्थः व्यवहारे आसीत्, धातूनां तथा अर्थः सायणाचार्येण माधवीया धातुवृत्तिः इत्याख्ये ग्रन्थे निरूपितः। आचार्यसौनागमतस्य उद्धृतिपुरःसरं क्षीरस्वामिनोक्तं -

**क्रियावाचित्वमाख्यातुमेकोऽत्रार्थः प्रदर्शितः।**
**प्रयोगतोऽनुमन्तव्या अनेकार्था हि धातवः॥**[67]

क्षीरस्वामि-सायणाचार्ययोः परस्मैपदिधातुषु धात्वर्थविषये वैसादृश्येऽपि 'अनेकार्था हि धातवः' इति नियमात् आचार्यद्वयोक्तभिन्नधात्वर्थाः व्याकरणशास्त्रे परिग्रहणीयाः।

*

## सन्दर्भाः


1. क्षीरतरङ्गिणी, (सं. युधिष्ठिर मीमांसक) भ्वादि 729, पृ.158
2 अष्टाध्यायी, 1.3.1
3. धातुपाठः, भ्वादि-1, पृ.1
4. माधवीया धातुवृत्तिः, भूमिका, पृ.35
5. कातन्त्रम्, 3.1.9, पृ.155
6. सारस्वतव्याकरणम्, पृ.2
7. क्षीरतरङ्गिणी, पृ.3
8. व्याकरणमहाभाष्यम्, उद्योतटीका, 1.3.1
9. क्षीरतरङ्गिणी, भ्वादि-213, पृ.54
10. धातुपाठः, भ्वादि-314, पृ.9
11. 'लुट विलोडने' - माधवीया धातुवृत्तिः, भ्वादि -211, पृ.111
12. A New Trilingual Dictionary, p.356
13. 'लुट विलोडने' - हैमधातुपारायणम् भ्वादि-190, पृ.27
14. 'लुट विलोडने' - धातुप्रदीपः, भ्वादि-312, पृ.29
15. शिशुपालवधम्, 3.72
16. धातुपाठः, भ्वादि-653, पृ.18
17. 'घुषिर् अविशब्दने' - माधवीया धातुवृत्तिः, भ्वादि-424, पृ.169
18. धातुपाठः, पृ.18
19. क्षीरतरङ्गिणी, भ्वादि-434, पृ.92
20. धातुप्रदीपः, भ्वादि-654, पृ.48

21. वैयाकरणसिद्धान्तकौमुदी, भ्वादिप्रकरणम् - 653, पृ.162
22. हैमधातुपारायणम्, भ्वादि - 497, पृ.61
23. गणार्थकल्पद्रुमः, गणप्रदीपः, कातन्त्रधातुपाठः, भ्वादि, पृ.5
24. अभिज्ञानशकुन्तलम्, 6.23
25. धातुपाठः, अदादिः - 1.63, पृ.30
26. माधवीया धातुवृत्तिः, अदादि - 66, पृ.368
27. क्षीरतरङ्गिणी, अदादि - 57, पृ.181
28. धातुपाठः, पृ.30
29. 'वच परिभाषणे' - वैयाकरणसिद्धान्तकौमुदी, अदादिप्रकरणम् - 1063, पृ.288
30. 'वच परिभाषणे' - सारस्वतव्याकरणम् , अदादि, पृ.95
31. 'वच परिभाषणे' - हरिनामामृतव्याकरणम्, अदादि, पृ.275
32. धातुरूपनन्दिनी, पृ.219
33. हैमधातुपारायणम्, अदादि - 38, पृ.150
34. धातुदीपः, अदादि - 54, पृ.82
35. कुमारसम्भवम्, 5.40
36. धातुपाठः, दिवादि - 1195, पृ.34
37. माधवीया धातुवृत्तिः, दिवादि -92, पृ.432
38. धातुरूपनन्दिनी, दिवादि - 260
39. 'तृप् प्रीणने' - हरिनाममृतव्याकरणम्, दिवादि, पृ.295
40. 'तृप् प्रीणने' - सारस्वतव्याकरणम्, दिवादि, पृ.129
41. 'तृप् प्रीणने' - गणार्थकल्पद्रुमः, गणप्रदीपः, कातन्त्रधातुपाठः, दिवादि, पृ.15
42. क्षीरतरङ्गिणी, दिवादि -86, पृ.214
43. हैमधातुपारायणम्, दिवादि - 46, पृ.177
44. दशवलकारिका, 30
45. भट्टिकाव्यम् - 1.2, पृ.3
46. हितोपदेशः, 2.174, पृ.150
47. धातुपाठः, तुदादि - 236
48. 'खिद परिघाते' - माधवीया धातुवृत्तिः,तुदादि - 146, पृ.493
49. धातुप्रदीपः, तुदादि-162, पृ.117
50. हैमधातुपारायणम्, तुदादि - 12, पृ.206
51. 'खिद परिघाते' - वैयाकरणसिद्धान्तकौमुदी, तुदादि-1436, पृ.366
52. 'खिद परिघाते' - सारस्वतव्याकरणम्, तुदादि, पृ.158

53. 'खिद परिघाते' - गणार्थकल्पद्रुमः, गणप्रदीपः, कातन्त्रधातुपाठः, तुदादि, पृ.17
54. क्षीरतरङ्गिणी, तुदादि - 144, पृ.255
55. तदेव
56. धातुरूपनन्दिनी, पृ.313
57. धातुपाठः, चुरादि - 1544, पृ.43
58. 'पीड अवगाहने' - माधवीया धातुवृत्तिः, चुरादि -11, पृ.540
59. सारस्वतव्याकरणम्, पृ.169
60. 'पीड अवगाहने' - धातुप्रदीपः, चुरादि- 11, पृ.132
61. 'पीड अवगाहने' - वैयाकरणसिद्धान्तकौमुदी, चुरादिप्रकरणम् - 1544, पृ.388
62. 'पीड अवगाहने' - गणार्थकल्पद्रुमः, गणप्रदीपः, कातन्त्रधातुपाठः, चुरादि, पृ.21
63. क्षीरतरङ्गिणी, चुरादि - 11, पृ.280
64. हैमधातुपारायणम्, चुरादि - 58, पृ.253
65. जनार्दनहेगडेमहोदयेन विरचितस्य 2013ईशवीयाब्दे नवदेहलीतः प्रकाशितस्य धातुरूपनन्दिनी इति ग्रन्थस्य 358 संख्यकपुटाङ्के तथा अवनीन्द्रकुमारविरचितस्य 2009तमे ईशवीयाब्दे नवदेहलीतः प्रकाशितस्य पाणिनीयधात्वनुक्रमकोश इति ग्रन्थस्य 157तमे पुटाङ्के पिड इति धातुः उभयपदित्वेन निरूपितः।
66. भर्तृहरिशतकत्रयम्, - नीतिशतकम्, श्लोकः - 5
67. क्षीरतरङ्गिणी, पृ.3

*

# किञ्चित् पारिभाषिकम्

काशिकावृत्तौ अष्टाध्यायीगतानां सूत्राणां शब्दाः यथा परिभाषिताः तथा सूत्र-तत्संख्योल्लेखपुरःसरम् अध्यायक्रमेणात्र संगृह्यन्ते।

| | |
|---|---|
| १. प्रकृत्या | स्वभावेन। |
| | का. बहुव्रीहौ प्रकृत्या पूर्वपदम् ६.२.१ |
| २. अपदेशः | व्याजः |
| | का.पदेऽपदेशे ६.२.७ |
| ३. निवातम् | वातस्याभावः<br>निरुद्धो वातोऽस्मिन् इति वा। |
| | का. निवाते वातत्राणे ६.२.८ |
| ४. आर्तवम् | ऋतौ भवम् |
| | का शारदेनार्तवे ४.२.९ |
| ५. उपज्ञम् (व्याकरणम्) | (१) पाणिनोपज्ञम् अकालकं व्याकरणम्।<br>(२) व्याड्युपज्ञं दुष्करणं (व्याकरणम्)।<br>(३) आपिशल्युपज्ञं गुरुलाघवम् (व्याकरणम्)। |
| | का.मात्रोपज्ञोपक्रमच्छाये नपुंसके ६.२.१४ |
| ६. हितम् | तद्धि हितं यदायत्यां प्रीतिं करोति। |
| | का. सुखप्रिययोर्हिते ६.२.१५ |
| | सुखप्रियौ प्रीत्यव्यभिचारौ का. प्रीतौ च ६.२.१६ |
| ७. सम्भावनम् | अस्तित्वाध्यवसायः सम्भावनम् |
| | का. आशङ्काबाधनेदीयस्सु सम्भावने ६.२.२१ |
| ८. सविधम्, सनीडम्, समर्यादम्, सवेशम्, सदेशम् | समीपवाचिनस्त्वेते समुदायाः।<br>का. सविधसनीडसमर्यादसवेशसदेशेषु सामीप्ये ६.२.२३ |
| ९. प्रत्येनाः | प्रतिगत एनसा प्रतिगतमेनो वा यस्य स प्रत्येनाः। |
| | का. आदिः प्रत्येनसि ६.२.२७ |
| १०. पूगाः | पूगाः गणाः। |
| | का. पूगेष्वन्यतरस्याम् ६.२.२८ |

# वेदान्तेषु क्रममुक्तिविमर्शः

**अर्घ्यदीप राय**

**सारांशः —** जीवन्मुक्ति-विदेहमुक्तिरित्येतयोरूर्ध्वं का नाम क्रममुक्तिरिति निरूपणीया। यः खलु ब्रह्मोपासकोऽस्मिन् देहे वर्त्तमाने सति पूर्णं ब्रह्मज्ञानं प्राप्य देहान्ते भगवत्प्रसादान्मुक्तो भवति, तस्य सद्योमुक्तिः; किन्तु यस्य तु न तथा, स देहपातानन्तरमस्मात् शरीरादुत्क्रान्तः सन् पुण्यवशात् ब्रह्मलोकान् प्राप्नोति चेत् न ततः पुनरस्मिन्संसारे पुनरावर्तते। तत्रैव स्थित्वा साधनद्वारा पूर्णं ब्रह्मज्ञानं प्राप्य मुक्तो भवति। सैव क्रममुक्तिः। किन्तु अस्मिन् सन्दर्भे साम्प्रदायिकानां मतभेदो नितरां दृश्यते एव। तत्रापि श्रुतिवाक्यानामर्थनिर्धारणे समन्वयाभाव एव कारणमिति मन्ये। अतो भगवता ब्रह्मसूत्रकारेण क्रममुक्तिविषये सिद्धान्तसमन्वयो यथा उपन्यस्तः तत्सर्वमिदानीम् अस्मिन् सन्दर्भे सविस्तरमालोच्यते।

**कूटशब्दाः—** उत्क्रान्तिः, अर्चिरादिदेवता, कार्यब्रह्म, परंब्रह्म, विदेहमुक्तिः, भेदाभेदः।

**मूलपाठः—** जीवस्य देहान्ते सति सप्तदशावयवविशिष्टसूक्ष्मशरीरं पञ्चभौतिकात् स्थूलदेहादुत्क्रामति। तत्र आदौ सूक्ष्मशरीराङ्गभूता वाङ् मनसि सम्पद्यते।[1] वागेन्द्रियस्यैव मनसि सम्पादनं बोध्यम्, न तु वाग्वृत्तेः, 'वक्त्युपरमे वागिन्द्रियस्य प्रमाणान्तरेणानुपलभ्यमानत्वात्'[2] इति। ततः वाचमनुचक्षुरादि-सर्वाण्यपीन्द्रियाणि मनसि सम्पद्यन्ते। तत्रापि श्रुतिः, 'तस्मादुपशान्तस्तेजाः पुनर्भवमिन्द्रियैर्मनसि सम्पद्यमानैः'[3] इति। अत्र सम्पत्तिस्तु न लयरूपा, अपि तु संयोगरूपा ज्ञेया, यतोऽनुपादानभूते मनसि वाचो लयो न सम्भवति। अपि च 'अविदुषा देहान्तरप्रतिपत्तौ वागाद्यनुवृत्तेरपेक्षितत्वात्, विदुषो वागादीनां लयस्य परमात्मनि वक्ष्यमाणत्वाच्च'[4] अत्र सम्पत्तिशब्दस्य न लयरूपोऽर्थो विवक्षित इति। ततः वागिन्द्रियसंयुक्तं मनः प्राणे सम्पद्यते। एवं सर्वाणि इन्द्रियाणि प्राणे एव संयुज्यन्ते। प्राणश्च स्वाध्यक्षभूते जीवात्मनि संयुज्यते। ननु 'प्राणस्तेजसि'[5] इत्यादिना प्राणानां तेजसि एव विलय इत्युक्तत्वात् श्रुतिविरोध एवेति चेत्, उच्यते, तन्न। तत्र तु जीवविशिष्टप्राणानां

तेजसि लयस्य विवक्षितत्वात्। अतः आदौ जीवात्मनि संयुक्ताः सन्तः ततः प्राणास्तेजसि समवलीयन्ते इति स्वीकार्यम्[6], अन्यथा, '**तमुत्क्रान्तं प्राणोऽनूत्क्रामति**'[7] इति श्रुतेर्विरोधापत्तिः स्यात्। अपि च '**एवमेवेममात्मानमन्तकाले सर्वे प्राणा अभिसमायान्ति**'[8] इत्यादि श्रुतिवाक्यादपि प्राणस्य जीवे एव लयः स्पष्टतया प्रतीयते। उक्तञ्च श्रीमच्छङ्कराचार्येण, '**एवमेवेममात्मानं भोक्तारमन्तकाले मरणकाले सर्वे प्राणा वागादयोऽभिसमायन्ति**'[9] इति। अतो विशीर्णे देहे जीवस्योत्क्रान्तिः येन क्रमेण अभिसम्पद्यते तदेवं ज्ञातव्यम्, म्रियमाणस्य वाङ्मनसि आदौ उपसंहीयते ततः मनः प्राणे सम्पद्यते ततः प्राणाः स्वाध्यक्षभूते जीवात्मनि अवलीयन्ते, जीवस्तेजसि पुनस्तेजो देवतायां प्रशाम्यति इति। एतावता उक्तमुत्क्रान्तिप्रकारं सर्वेषां विदुषामविदुषामेव समानमिति द्वैताद्वैतसिद्धान्तः।

ननु '**यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि श्रिता। अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते**'[10], इत्यादिषु कठश्रुतिषु विदुषोऽत्रैव अमृतत्वप्राप्तिश्रवणाद् अविदुष एव उत्क्रान्त्यादि स्यादिति चेत्, उच्यते, मैवम्। यतः श्रुतिष्वेव एवमप्युच्यते, '**अथ यत्रैतदस्माच्छरीरादुत्क्रामत्यथैतैरेव रश्मिभिरूर्ध्वमाक्रमते, स ओमिति वा होद्वा मीयते स यावत् क्षिप्येन्मनस्तावदादित्यं गच्छत्येतद्वै खलु लोकद्वारं विदुषां प्रपदनं निरोधोऽविदुषाम्**'[11] इति अपि च '**तस्य हैतस्य हृदयाग्रं प्रद्योतते तेन प्रद्योतेनैष आत्मा निष्क्रामति चक्षुषो वा मूद्र्ध्नो वा अन्येभ्यो वा शरीरदेशेभ्यः**'[12] इति पुनरपि '**शतञ्चैका च हृदयस्य नाड्यस्तासां मूर्द्धानामाभिनिःसृतैका। तयोर्द्धमायान्नमृतत्वमेति विष्वङ् उत्क्रमणे भवन्ति ...**[13] इति। अतो मृत्युकाले यदा जीवात्मा अस्मात् शरीरात् निर्गच्छति तदा अब्रह्मज्ञ-वैदिककर्माचारिणो यथोक्तं सूर्यरश्म्यादिमार्गमनुसृत्य ऊर्ध्वं स्वर्गादिलोकं प्राप्नुवन्ति, एवञ्च ब्रह्मज्ञपुरुषाः ओङ्कारमनुध्यायन्तः ततो ऊर्ध्वं गत्वा अचिरमेवादित्यमाप्नुवन्ति। आदित्य एव ब्रह्मज्ञपुरुषस्य ब्रह्मलोकप्राप्तिविषये द्वारभूतः, पुनरब्रह्मज्ञपुरुषस्य ब्रह्मलोकमार्गे प्रतिबन्धक-कपाटस्वरूप इति। अपि च एकोत्तरशतनाड्यः सन्ति हृदयदेशे यास्वेका ऊर्ध्वं मूर्द्धानमभिगच्छति। तेन पथा ब्रह्मविद् ऊर्ध्वं गच्छन् अमृतत्वमाप्नोति। इतराः तु संसाराभिमुखिनाड्यः यासु सञ्चरन्तोऽब्रह्मज्ञा जीवा अस्मिन्संसारे एव पुनरावर्त्तन्ते। तत्रापि मूर्द्धन्– उत्क्रान्तिः विदुषामेव, इतरेषां तु चक्षुरादिभ्य इति विशेषः। तेन 'शतञ्चैका ...' इति छान्दोग्यश्रुतिभिः इतरेषां समन्वयः स्यात्। अतः 'अत्र ब्रह्म समश्नुते'- इत्यादिश्रुतिषु यथा उक्तं, यत् जीवो यदा पूर्णतया निष्कामो भवति तदा मर्त्योऽपि अमृतो भवति, अस्मिन् देहे जीवन्नेवामृतत्त्वमाप्नोति,

अथ, ब्रह्मसाक्षात्कारजनितमानन्दमस्मिन्देहे एवानुभवति इति[14] तेन ब्रह्मज्ञपुरुषस्य उत्क्रान्ति-निषेधस्तु नाभिव्यज्यते, तत्रैव अनन्तरश्रुतिषु ब्रह्मज्ञपुरुषस्यापि उत्क्रान्तेरुपदेशश्रवणत्वात्, 'शतञ्चैका'[15] इत्यादिछान्दोग्यश्रुतेः पुनरुल्लेखत्वाच्च। अतोऽस्मिन् देहे ब्रह्मावाप्तिः यदुक्तं तत्र तस्य ब्रह्मोपासकस्य उपासनाकाले एव देहेन्द्रियसम्बन्धनाशराहित्येऽपि पूर्वोत्तरयोरघयोर्लोपे सति ध्रुवस्मृत्याख्यब्रह्मानुभूतिरेव लक्षिता, ध्रुवायाः स्मृतेर्बृहत्त्वात्। उक्तञ्च भगवता ब्रह्मसूत्रकारेण, '**समाना चासृत्युपक्रमादमृतत्वञ्चानुपोष्य**'[16] इति। अत्र 'अनुपोष्य' इति 'उष दाहे' इति धातोः रूपम्। अतोऽस्य 'अदग्ध्वा देहसम्बन्धः' इत्येवार्थः। तस्मात्, लिङ्गशरीरस्य दाहात्प्राक् न परममोक्षोपपत्तिरिति बोध्यम्। तत्रापि श्रुतिः,'**तस्य तावदेव चिरं यावन्न विमोक्षेऽथ सम्पत्स्य**'[17] इति। पुनः देशविशेषं प्राप्यैव लिङ्गशरीरस्य लयः श्रुतिषु उपदिष्टः, '**इमाः षोडश कलाः पुरुषायणाः पुरुषं प्राप्यास्तं गच्छन्ति**'[18] इत्यादिना। उक्तञ्च मुण्डकोपनिषदि, '**वेदान्तविज्ञानसुनिश्चितार्थाः संन्यासयोगाद्यतयः शुद्धसत्त्वाः। ते ब्रह्मलोकेषु परान्तकाले परामृताः परिमुच्यन्ति सर्वे**'[19] इति। अतः ये खलु संन्यासिनः शुद्धसत्त्वाः, वेदान्तविज्ञानं येष्वधिगतम्, ते मुमुक्षवो देहपरित्यागकाले ब्रह्मलोकान् समेत्य, अमृतत्वं प्राप्य मुच्यन्ते इति। किन्तु, अस्य मन्त्रस्य भाष्ये श्रीमच्छङ्कराचार्येण एवमुक्तम्,... बहुत्वात् ब्रह्मैव लोको ब्रह्मलोक एकोऽप्यनेकवत् दृश्यते प्राप्यते च। अतः बहुवचनं ब्रह्मलोकेष्वतो ब्रह्मणीत्यर्थः। ...परिमुच्यन्ते परिसमन्तान्मुच्यन्ते सर्वे न देशान्तरं गन्तव्यमपेक्षन्ते ... ...। देशान्तरपरिच्छिन्ना हि गतिः संसारविषयैव। परिच्छिन्नसाधनसाध्यत्वात्। ब्रह्म तु समस्तत्वान्न देशपरिच्छेदेन गन्तव्यम् ...'[20] इति। अत्र वेदान्तविज्ञानप्राप्तेन विदुषा कथमेकोऽपि ब्रह्मलोकोऽनेकवत् दृश्यते इत्येतच्चिन्त्यम्। एकस्मिन्विषये बहुत्वदर्शनं तु आध्यासिको भ्रम एव। पुनर्यदि विदुषैव बहुत्वं दृश्यते प्राप्यते अपि, कथं तर्हि ब्रह्मणो बहुत्वाङ्गीकारे अनुपपत्तिरिति अद्वैतवादिभिः वक्तव्यम्। श्रुतेः स्वाभिमतं क्लेशकल्पितं व्याख्यानं तु न युक्तमिति मन्ये। अतो विदुषामपि उत्क्रान्त्यादि समानमेव इति सिद्धान्तः।

किञ्च, यद्यपि '**यो दक्षिणे प्रमीयते पितृणामेव महिमानं गत्वा चन्द्रमसः सायुज्यं गच्छति**'[21] इत्यादिना श्रुतिवचनेन दक्षिणायनमृतस्य चन्द्रमण्डलप्राप्तिरेव श्रूयते, किन्तु दक्षिणायने मृतस्यापि विदुषः न पुनरावृत्तिः इति भगवतो ब्रह्मसूत्रकारस्याभिमतम्, '**अतश्चायनेऽपि दक्षिणे**'[22] इति सूत्रितात्। नन्वत्र '**शुक्लकृष्णे गती ह्येते जगतः शाश्वते मते। एकया यात्यनावृत्तिमन्ययावर्तते पुनः**'[23] इति गीतोक्तवचनेन विरोध इति चेत्, उच्यते, तन्न। शास्त्रवचनमिदं तु अविद्वद्विषयमिति ज्ञेयम्, न तु विद्वद्विषयम्।

विदुषां तु उत्तरपूर्वयोः शुभाशुभयोः ब्रह्मज्ञानेन विनाशसम्भवात्, पुनः देहपाते सति प्रारब्धकर्मणामपि अभावान्नास्ति पुनरागमनाशङ्का, अतो न मार्गविशेषे फलविशेषोऽपि शक्यः। ननु कथं तर्हि भीष्मस्य उत्तरायणप्रतीक्षा इति चेत्, उच्यते, 'धर्मप्रवर्तनार्थं स्वच्छन्दमरणशक्तिज्ञापनार्थं च'[24] इति। अपि च, गीतावचनेषु ब्रह्मनिष्ठान् प्रति देवयानाख्यसृतिः, पुनः कर्मनिष्ठान् प्रति पितृयानाख्यसृतिः यत्र दृश्येते तत्रापि गतिद्वयस्यावबोधनमेव इष्टम्, न तु विदुषां कृते कालविशेषावधारणम्। उक्तञ्च श्रीनिवासाचार्येण, 'यतश्चैते स्मार्त्ते स्मृतिविषयभूते ज्ञानाङ्गत्व-कर्माङ्गत्वाभ्यां स्मरणार्हे 'नैते सृती पार्थ! जानन्योगी मुह्यति कश्चनेत्युपसंहारात्।'[25] अपि च कालशब्देनात्र स्मृतौ न समयविशेषः बोध्यः, कालाभिमानिदेवतायुक्तो मार्ग एवात्र कालशब्दस्यार्थः, अग्निधूमयोः कालत्वासम्भवात्।[26]

श्रुतौ तु एवमपि उक्तं यद् ब्रह्मज्ञपुरुषाणां देहान्ते शवकर्माभावेऽपि ते अर्चिराभिमानिनीं देवतामेव प्रतिपद्यन्ते। अतः अर्चिर्देवताया अहरभिमानिनीं देवतां ततः शुक्लपक्षदेवतां ततः उत्तरायणदेवतां ततः संवत्सरदेवतां ततः आदित्यं प्राप्नुवन्ति। अस्मिन् पथि गच्छन्तो न पुनरिह संसारे आवर्तन्ते। उक्तञ्च बृहदारण्यकेऽपि, 'ते य एवमेतद् विदुर्ये चामी अरण्ये श्रद्धां सत्यमुपासते ... ... परावतो वसन्ति तेषां न पुनरावृत्तिः।'[27]

ननु अर्चिरादिना ब्रह्मप्राप्तिः यत् श्रुतिषु विधीयते किं सा कार्यब्रह्मविषयिका उत परब्रह्मविषयिका इति जिज्ञासा नितरामापतेत्। तत्र बादरिमुनिना एवमुक्तम्, यद् अर्चिरादिदेवताः उपासकान् कार्यभूतहिरण्यगर्भमेव प्रापयन्ति, यतः कार्यब्रह्म एव देशविशेषवत्त्वेन अवगम्यते, न तु परब्रह्म। पुनः 'पुरुषोऽमानव एत्य ब्रह्मलोकान् गमयति' इत्यादौ ब्रह्मलोकपदे बहुवचनदर्शनादपि एतदेव ज्ञायते यत् अर्चिरादिदेवताः कार्यब्रह्म एव गमयन्ति इति। स्यादेतत्, कथं तर्हि 'नावर्त्तन्ते', 'अमृतत्वमेति' इत्यादिना अपुनरावृत्तिश्रवणं संगच्छेत इति चेत्, उच्यते बादरिमुनिना, न हि हिरण्यगर्भप्राप्तावपि अपुनरावृत्तिः अनुपपन्ना, यतः महाप्रलये हिरण्यगर्भस्यापि लये सति तदध्यक्षेण हिरण्यगर्भेण सह तल्लोकवासिनः सर्वे परब्रह्मभावमाप्नुवन्ति। अतः महाप्रलयात् प्राक् पुनरावृत्तिस्मृतिः, पुनः महाप्रलयान्ते अपुनरावृत्तिश्रुतिरुपपद्यते। तत्रापि 'ब्रह्मणा सह ते सर्वे सम्प्राप्ते प्रतिसञ्चारे। परस्यान्ते कृतात्मानः प्रविशन्ति परं पदम्'[28] इति स्मृतिः प्रसिद्धा।

आचार्यजैमिनिः तु तद्विपरीतमेव मन्यते। अर्चिरादिदेवता विद्वत्पुरुषान् परब्रह्म एव प्रापयन्ति इति तस्य मतम्। यतो ब्रह्मशब्देनात्र ('य एनान् ब्रह्म गमयति') परब्रह्मैव अभिधीयते 'तस्यैव शक्यत्वेन तत्रैव वृत्तित्वादन्यथा गौणत्वप्रसङ्गः, 'यत्परः शब्दः स

शब्दार्थः' इति न्यायात्'[29] इति; अतो ब्रह्मशब्दस्यात्र कार्यब्रह्मपरत्वे अभिधानं चेत् गौणत्वमेव स्वीकार्यम्, अन्यथा तु 'ब्रह्माणं गमयति' इत्येव स्यात्। अत उक्तं भगवता ब्रह्मसूत्रकारेण, 'परं जैमिनिर्मुख्यत्वात्'[30], 'दर्शनाच्च'[31] इति। ननु 'ते ब्रह्मलोके तु परान्तकाले' इत्यादौ लोकशब्दे बहुवचनप्रयोगात् पुनः देशविशेषस्य उल्लेखात् अत्र कार्यब्रह्म एव विशेषितमिति चेत्, उच्यते, लोकप्रदेशबाहुल्यविवक्षया अत्र बहुवचनस्य प्रयोगो न दोषाय, 'ये लोका मम विमलाः सकृद्विभान्ति ब्रह्माद्यैः'[32] इत्यादिश्रीभगवद्वचनात्। पुनः देशविशेषवर्त्तित्वेनापि परब्रह्मणः कार्यब्रह्मत्वं नाशङ्कितव्यम्, 'योऽस्याध्यक्षः परमे व्योमन् तिष्ठति तद्विष्णोः परमं पदम्'[33] इत्यादिश्रुत्या सर्वगतस्यापि परब्रह्मणः देशविशेषवर्त्तित्वावगमात्। ननु 'प्रजापतेः सभायां वेश्म प्रपद्ये'[34] इति श्रुत्या कार्यब्रह्मविषयकसङ्कल्पप्राप्तिरेव अवगम्यते इति चेत्, उच्यते, मैवम्, इयं श्रुतिरपि परब्रह्मविषयिका एवेति ज्ञेया, 'आकाशो वै नाम नामरूपयोर्निर्वहिता ते यदन्तरा तद्ब्रह्म तदमृतं स आत्मा'[35] इत्यादिना परब्रह्मण एव अधिकारात्, अपि च 'अश्व इव रोमाणि विधूय पापं चन्द्र इव राहोर्मुखात् प्रमुच्य धूत्वा शरीरमकृतं कृतात्मा ब्रह्मलोकमभिसम्भवामि'[36] इत्यादिना सम्भाव्यमानस्य ब्रह्मलोकस्य अकृतत्वस्य सर्वबन्धविमुक्तत्वस्यापि अवगमात् इति। स्यादेतत्, ननु कथं तर्हि 'तं वैद्युतान् पुरुषो मानस एत्य ब्रह्मलोकान् गमयति'[37] इत्यादौ ब्रह्मलोकानित्यत्र बहुवचनव्यपदेश इति चेत्, उच्यते, यथा 'निषादस्थपतिः' इत्यत्र 'निषादानां स्थपतिः' इति षष्ठीसमासस्वीकारे पूर्वपदे तत्सम्बन्धिलक्षणापत्त्या 'निषाद एव स्थपतिः' इति कर्मधारय एव स्वीकार्यः, तथैव, 'ब्रह्मैव लोकः' इति इहापि कर्मधारये स्वीकृते सति न विरोधापत्तिः। पुनः एकवचनार्थे निश्चितेऽपि बहुवचनस्य प्रयोगो न दुर्लभः, यथा अदितिः पाशान् प्रमुक्ते'ति अत्र पाशस्य एकत्वेऽपि बहुवचनप्रयोगदर्शनात् इति।[38]

अद्वैतवादिन एवं मन्यन्ते यत्, निर्गुणब्रह्मविदो गतिः नोपपद्यते, निर्गुणब्रह्मणः सर्वगतत्वात् नित्यप्राप्तत्वात्, प्राप्तस्य पुनः प्राप्त्ययोगात्। अतः क्रममुक्तिस्तु सगुणब्रह्मविद एव भवति। ब्रह्मलोकेषु ब्राह्मी-ऐश्वर्योपभोगान्ते कल्पक्षये सद्योमुक्तिः लभ्यते इत्यतः सा क्रममुक्तिः इत्युच्यते। किन्तु यदि कोऽपि सगुणब्रह्मोपासको ब्रह्मलोकेषु स्थितोऽपि भोगवितृष्णः सन् निर्गुणब्रह्मविद्यानुशीलनद्वारा निर्गुणब्रह्मज्ञानमाप्तुं समर्थो भवेत्, तर्हि कल्पान्तात् प्रागपि तस्य सद्यो मुक्तिः भवितुमर्हति। अपि च न केवलं मानवाः, देवा अपि महेन्द्रलोकतः सत्यलोकपर्यन्तनिवासिनः यदि ब्राह्मी-ऐश्वर्यभोग-वितृष्णाः सन्तः शमादिसाधनचतुष्टयमनुसृत्य निर्गुणब्रह्मविद्यां प्राप्नुवन्ति, तर्हि तत्रैव तेषामपि सद्यो मुक्तिः भवेत्। किन्तु सगुणब्रह्मोपासनायां

किञ्चिद्वैलक्षण्यमस्ति। तदेतत्, उपासनायाः सम्यक्तया परिपाकेऽपि सर्वाङ्गयुक्तत्वेऽपि सिद्धसाधकेन सायुज्यमुक्तिः एवं लभ्यते। अथ पुनःकल्पान्ते हिरण्यगर्भेण उपदिष्टः सन् निर्गुणब्रह्मविद्याप्राप्त्यन्ते चरममुक्तिं प्राप्नोति। सायुज्यमुक्तिप्राप्तस्य तु न पुनरावृत्तिः। किन्तु सगुणब्रह्मोपासकस्य उपासनायाः सर्वाङ्गयुक्तत्वाभावे सालोक्य-समीप्यादिमुक्तिरेव भवति, अतः तेषां पुनरावृत्तिरपि भवत्येव। सगुणब्रह्मविदः पञ्चविधो मुक्तिप्रकारः, तद्यथा सालोक्य-सामीप्य-सारूप्य-सार्ष्टि-सायुज्येति भेदात्। तत्र इष्टदेवतया सह एकस्मिन्नेव लोके निवासः सालोक्यमुक्तिः। समानविग्रहवत्ता तन्नाम इष्टदेवतासदृश-चतुर्भुजादिरूपता सारूप्यमुक्तिः। इष्टदेवतायाः पार्षदरूपेण तस्य समीपेऽवस्थानं सामीप्यमुक्तिः। सार्ष्टिस्तु आराध्यदेवतायाः समानैश्वर्यवत्त्वम्। सायुज्यं नाम सयुग्भावं समानदेहेन्द्रियाभिमानत्वम् इति।[39] सायुज्यमुक्तिरेव सगुणब्रह्मविदः सर्वोच्चगतिः। तत्प्राप्तस्य न पुनर्बाधाशङ्का, अतः क्रममुक्तिरपि तस्यैव भवति, न इतरेषाम्।

अपि च अद्वैतमते संसारिजीवस्यापि स्वरूपतो गतिर्नोपपद्येत। तत्रापि लिङ्गशरीरस्य गमनमेव गति-पदवाच्यम्। यतः अद्वैतमते जीवात्माऽपि स्वरूपतः सर्वगतः, तस्य विभुपरिमाणत्वात्, अत एव अपरिच्छिन्नोऽपि। न हि अपरिच्छिन्नस्य गतिरुपपद्यते। ननु यदि एवमुच्येत, संसारी पुरुषः परमात्माभास एव, अतः परिच्छिन्नः अपि; तत्रापि विकल्पद्वयमुपपद्यते, आभासस्य अवस्तुभूतत्वं वस्तुभूतत्वं वा इष्टम् इति। तत्राद्ये जीवात्मनः अधिकारित्वासम्भवात्, शशशृङ्गवत्। '**द्वितीये तु असम्भवात्। यतः जीवस्य अणुपरिमाणत्वं मध्यमपरिमाणत्वं वा अद्वैतमते नाङ्गीक्रियेते, अतः गत्युपपत्त्यर्थम् औपाधिकमणुत्वं तु स्वीकार्यमेव स्यात्। तथात्वे च लिङ्गशरीरस्यैव गतिर्न स्वरूपस्येति**'[40] गतिश्रुतीनां बाध एव स्यात्।

किन्तु जीवात्मनः अर्चिरादिगतिः श्रौतमानसिद्धा, न तु कस्यापि स्वकपोलकल्पिता। अतः अद्वैतमतमिदं न समीचीनं मन्ये। अपि च श्रुतौ न केवलं सगुणब्रह्मोपासकस्य गतिरुक्ता, किन्तु निर्गुणब्रह्मोपासकस्यापि,[41] अतः सगुणनिर्गुणब्रह्मोपासनाभेदेन अर्चिरादिगतिनिरूपणं न युक्तम् इति द्वैताद्वैतसिद्धान्तः। उक्तञ्च भगवता ब्रह्मसूत्रकारेण 'उपपन्नस्तल्लक्षणार्थोपलब्धेर्लोकवत्', 'अनियमः सर्वासामविरोधः शब्दानुमानाभ्याम्'[42] इति। अस्यार्थः, स्थूलशरीरत्यागकाले सर्वकर्मक्षयेऽपि सूक्ष्मशरीरस्य लयेऽपि देवयानपन्था उपपद्यते एव, यतः विदुषोऽपि 'स तत्र पर्येति जक्षत् क्रीडन् रममाणः' इत्यादिषु श्रुतिषु देहादिसम्बन्धलक्षणार्थ उपलभ्यते। स्थूलसूक्ष्मशरीरापगमेऽपि विद्याप्रभावेनैव गत्युपयोगिशरीरं तस्य तदानीमेवोत्पद्यते। किन्तु, अत्र श्रीमच्छङ्कराचार्येण एवं भाष्यं कृतम्, '**सगुणासु**

**विद्यासु गतिरर्थवती, न निर्गुणायां परमात्मविद्यायाम्**'[43] इत्यादि। किन्तु तन्मतं न सूत्रकारसम्मतमिति मन्ये।

ननु 'तेषामिह न पुनरावृत्तिः' इति श्रुतौ 'इह' इति विशेषण-प्रयोगात् अस्मिन्कल्पे एव अपुनरावृत्तिरुक्ता, न तु कल्पान्तरे इति चेत्, उच्यते, तन्न, असम्भवात्। उक्तनिर्देशस्य सर्वकल्पव्याप्तत्वात्, यथेह कल्पे अनावृत्तिः तथैव कल्पान्तरेष्वपि बोध्या। तत्रापि मीमांसक-विचारमुपस्थापयन्ति आचार्याः, यथा, 'राजसूये ब्रह्मणो गृह्ये महिष्या' इत्यादिना द्वादश-हवींषि विहितानि कर्त्तव्यानि। तत्र 'श्वोभूते निर्व्वपेत्' इति निर्दिष्टम्। तन्निर्देशानुसारम् एकस्मिन् कृते पुनः अनन्तरदिवसेऽपि तेनैव विधिमूलेन अनन्तरस्यापि प्राप्तिर्भवेत्, **'श्वोभूत-वदनुवादात्'** इति मीमांसासूत्रात्, तथैव अत्र प्रकृतप्रस्तावे 'इह' शब्दस्य सर्वकल्पव्यापकत्वात् कल्पान्तरेऽपि अनावृत्तिः बोध्या।

आचार्यवल्लभप्रणीते शुद्धाद्वैतवादे ज्ञानकर्मसमुच्चयादेव मोक्षप्राप्तिरित्यभिप्रेयते। तन्मते औपनिषदज्ञानस्यापि कर्म्मोपयोगित्वं यथा अस्ति तथा उपासनाया अपि ज्ञानरूपत्वं प्रत्यक्षम्।[44] अतः तन्मते मुमुक्षवो द्विधा विभज्यन्ते, ज्ञानिनः भक्ताश्चेति। तयोर्मुक्तिप्रकारोऽपि द्विविधः सद्योमुक्तिः क्रममुक्तिश्चेति। तत्र ज्ञानिनां मध्ये ये 'त्वमेवाहम् अहमेव त्वम्' इति अहंग्रहात्मकव्यतिहारध्यानेषु सिद्धा भवन्ति ते हि परमेश्वरानुग्रहात् प्राकृतसत्त्वादिगुणत्रयातीता भूत्वा निर्गुणब्रह्मतत्त्वमारोहन्ति, ते प्रारब्धक्षये निर्गुणब्रह्मणि प्रविशन्ति। तेषां लिङ्गशरीरं न उत्क्रामति। सैव ज्ञानिनः सद्योमुक्तिः। अस्यां मुक्तौ निर्गुण-अक्षरब्रह्मणि प्रवेशरूपं सायुज्यं लभ्यते, किन्तु तथा अपि जीवस्य मधुपिष्टस्वर्णरेणुवत् पृथगस्तित्वं तु तदानीमपि भवत्येव।[45] पुनः ये खलु निर्गुणब्रह्मतत्त्वोपासका अस्मिन् जन्मनि सर्व्वाणि प्रारब्धकर्माणि न अभुञ्जत, तेषां शिष्टकर्माणि ब्रह्मलोकेषु पूर्णतया नश्यन्ति। ततः मुच्यन्ते, अतः तेषां क्रममुक्तिः। ते हि आतिवाहिकादिना वाहितेन देवयानादिना ब्रह्मलोकानेत्य प्रारब्धक्षयात् तत्रैव अक्षरनिर्गुणब्रह्मणि प्रविशन्ति। ब्रह्मलोकात्तु तेषां न पुनरावृत्तिर्भवति।

भक्तानां मध्ये ये पुष्टिमार्गीयसिद्धसाधकाः, तेषां न उत्क्रान्ति-गत्यागतिरस्ति। श्रीभगवतोऽत्यन्तानुग्रहभाजनानां तेषां लिङ्गशरीरं हृदयगुहायां प्रकटिते पुरुषोत्तमे विलीयते। तस्मिन्नेव क्षणे तदात्मकदिव्यदेहं प्राप्य पुरुषोत्तमेन सह लीलात्मकं दिव्यभोगं च प्राप्नुवन्ति। उक्तञ्च अणुभाष्ये, 'अथ पुष्टिलीलाप्रवेशानन्तरममृत उक्तरूपशरीरवान् भवति, ततोत्र अस्मिन्नेव शरीरे ब्रह्म सम्यगश्नुते। भगवता क्रियमाणलीलारसमनुभवतीत्यर्थः'।[46] कृत्स्नवैकुण्ठलोकः तेषां हृदयगुहायामेव प्रकटितो भवति। तेषामपि सद्योमुक्तिः इति विशेषः। किन्तु ये खलु मर्यादामार्गीयसिद्धभक्ताः तेषां क्रममुक्तिः। प्रारब्धक्षये स्थूलशरीरात् उत्क्रान्ताः

ते देवयानेन वैकुण्ठाख्यं लोकमभिगच्छन्ति।[47] तत्र साक्षात्प्रकटितेन पुरुषोत्तमेन सह तेषां साक्षात्कारोऽतः तस्मिन्नेव विलयोऽपि भवति। अनन्तरं श्रीभगवता स्वकीयात् स्वरूपात् निष्कासिताः सन्तः ते पुरुषोत्तमात्मकं दिव्यं देहं प्राप्नुवन्ति, ततः पुरुषोत्तमेन सह लीलात्मकं भोगमपि प्राप्नुवन्ति।[48]

आचार्यभास्करप्रणीते औपाधिकभेदाभेदवादेऽपि क्रममुक्तिविषये एवमुक्तं यत्, ये खलु परब्रह्मोपासकाः ते सद्योमुक्तिं लभन्ते, किन्तु ये हिरण्यगर्भोपासकास्ते उपासना-प्रभावेनैव ब्रह्मलोकमेत्य तत्र ज्ञानोत्कर्षानन्तरं हिरण्यगर्भेण सह कल्पान्ते मुच्यन्ते, सा क्रममुक्तिः। ब्रह्मलोकेषु विदुषो ज्ञानोत्कर्षं यद्भवति तत्तु 'छायातपयोरिव ब्रह्मलोके'[49] इत्यादिना श्रुतिवचनेनैवावगम्यते इति।

अथेदानीं अर्चिरादिगतपुरुषैः किं प्राप्यते इति विचार्यते। तत्र भगवता ब्रह्मसूत्रकारेण एतन्मन्यते यत्, 'नाम ब्रह्मेत्युपासीत' इति श्रुत्युक्तोपासका ये खलु नामादिप्रतीकमुपासते तान् वर्जयित्वा आत्मानं परब्रह्मात्मकरूपेण ये उपासते अपि च ये पञ्चाग्निविद्यावन्तः परब्रह्मोपासकाः ते उपासनानुसारेण परब्रह्म एव प्राप्नुवन्ति, 'अप्रतीकालम्बनान्नयतीति वादरायण उभयथा दोषात् तत्क्रतुश्च'[50] इति सौत्रप्रमाणात्। आचार्यबादरिः यदाह, कार्यब्रह्मोपासकानेव अर्चिरादिदेवता नयति, न तु निर्गुणपरब्रह्मोपासीनानेवेति, न तत् युक्तं मन्ये, 'अस्माच्छरीरात् समुत्थाय परं ज्योतीरूपं सम्पद्य स्वेन रूपेणाभिनिष्पद्यते'[51] इति श्रुतिविरोधात्। पुनः आचार्यजैमिनिना यदुच्यते, परंब्रह्मोपासीनानेव अर्चिरादिदेवता नयति, न तु कार्यब्रह्मोपासकान्, तदपि न युक्तम्, 'तद्य इत्थं विदुर्ये चेमेऽरण्ये श्रद्धां तप इत्युपासते तेऽर्चिषमभिसम्भवन्ति'[52] इति श्रुतिविरोधात्। अतः उक्तं वेदान्तकौस्तुभकारैः, 'न तु कार्यं ब्रह्मोपासीनान्नयति, न वा परं ब्रह्मोपासीनानेव नयतीति नियमः। कुतः? उभयथा दोषात्।'[53] अतः उभयविधान् ब्रह्मोपासकान् नयति इति सिद्धान्तमाह भगवान् ब्रह्मसूत्रकारः 'तत्क्रतुश्च' इत्यादिना। अस्यार्थः, यस्य यथा क्रतुः तं तथैव नयति, 'यथा क्रतुरस्मिँल्लोके पुरुषो भवति तथेतः प्रेत्य भवती'[54]ति श्रुतेः, अपि 'तं यथा यथोपासते तदेव भवती'[55]त्यादिश्रुतेश्च। यस्तु परब्रह्मक्रतुः स परं ब्रह्म प्रतिपद्यते।[56]

ननु प्रतीकालम्बनोपासनायामपि ब्रह्म एव उपासीतम्, अतः प्रतीकोपासकानामपि अर्चिरादिगतिः तु स्यादेव इति चेत्, उच्यते, तन्न। श्रुतौ तु प्रतीकोपासकानां कृते न अर्चिरादिगतिः विहिता, अपि च तेषामुपासनानुरूपा गतिरेव इति, तद्यथा, 'यावन्नाम्ना गतं तत्रास्य यथाकामचारो भवति'[57] इति श्रुतिः। तेषु प्रतीकेषु प्रकाशितस्य ब्रह्मणः यादृशी शक्तिर्भवति, तदुपासकाः तान् सर्व्वान् प्राप्य तदनुगुणं कामाचारा भवन्ति। तेषां

ध्येयत्वेन प्रतीकानामेव प्राधान्यात् न परब्रह्मोपासकत्वं, अतो न अर्चिरादिगतिरपीति। अतः 'नामादिप्राणपर्यन्तस्य प्रतीकोपासनस्य गतिनिरपेक्षं परिमितं च फलं दर्शयति'[58] इति। अपि च, 'वाग् वाव नाम्नो भूयसी' इत्यादिना श्रुत्या प्रतीकोपासनायाः फलविशेषोऽपि प्रदर्शितः। अतोऽद्वैतमतम् आचार्यमाधवमुकुन्देन एवं निराकृतम्, 'ये तु दुराग्रहमाश्रित्य सगुणनिर्गुणभेदं वदन्तो निर्गुणब्रह्मविदो गत्यनुपपत्तिं सगुणब्रह्मविदश्च गत्या कार्यब्रह्मप्राप्तिमभ्युपगच्छन्ति, ते उपेक्षणीयाः, बादरिपक्षान्तःपातित्वात् सूत्रकारपक्षविरोधात्, श्रुतिहीनत्वाच्च। न हि ब्रह्मभेदे कार्यब्रह्मप्राप्तौ च श्रुतिरुपलभ्यते क्वचित्'[59] इति।

**उपसंहारः-** द्वैताद्वैतसिद्धान्ते मोक्षस्तु न निर्गुणब्रह्मप्राप्तिलक्षणम्, अपि तु भगवद्भावापत्तिः स्वस्वरूपानन्दावाप्तिश्च इति। अतः ब्रह्मप्राप्तिरूपा मुक्तिः या अद्वैतवादिभिरुपपद्यते सा तु न सिद्धान्तसम्मता। अतः कार्यब्रह्मोपासक-परंब्रह्मोपासक-अविशेषेण सर्वेषां ब्रह्मोपासकानां उत्क्रान्तिगतिरुपपद्यते। अद्वैतमते ब्रह्मणो विभुस्वभावत्वात् तत्प्राप्त्यर्थं देशविशेषगमनं न अपेक्षते। अतः विदुषो गतिस्तत्र निराकृता। किन्तु द्वैताद्वैत-सिद्धान्ते यतः मोक्षे निर्गुणब्रह्मभावप्राप्तेः प्रसङ्ग एव नास्ति, अतः ब्रह्मणः सर्वव्यापित्वेऽपि गत्यागतेरनुपपत्तिप्रसङ्गोऽपि नास्ति। जीवात्मना ब्रह्मणः अंशांशि-सम्बन्धो भेदाभेदः सम्बन्धो वा। सोऽपि स्वाभाविकः। अद्वैतमते तु जीवो ब्रह्मस्वरूपः सन्नपि विस्मृतस्वरूपः। स्वकण्ठस्थविस्मृतमणिहारस्य पुनः प्राप्तिवत् जीवस्य मोक्षः। अतः तन्मते मोक्षे ब्रह्मप्राप्तिरुपपद्यते एव। किन्तु तथा सति एतदङ्गीकर्त्तव्यं यत्, जीवस्य बद्धावस्था न अनादिः। जीवात्मा एकदा मुक्त एव आसीत्, ततः बद्धोऽभवत्। अन्यथा एतद् विस्मृतितत्त्वं नोपपद्यते, यतः पूर्वज्ञातविषयस्य एव विस्मरणं सम्भवेत्, न तु अज्ञातस्य, पुनः अनादिविस्मृतस्य ज्ञातत्वं कथं स्वीकुर्यात्? अतः अद्वैतमतानुसारेण बन्धनमोक्षयोः क्रमपर्यायः स्वीकर्त्तव्यः। अस्यार्थः मुक्त एव बध्यते, पुनः बद्ध एव मुच्यते इति। द्वैताद्वैतमते तु जीवस्य ब्रह्मभावो न विस्मृतः अपि तु आवृत एव। मोक्षे तु तदावरणनाशः, अतः स्वस्वरूपावाप्तिः भगवद्भावापत्तिश्चेति। भगवद्भावस्य सर्व्वव्यापकत्वाप्रसङ्गात् देशान्तरगमनेन तत्प्राप्तौ अनुपपत्तिर्नास्ति, इति शिवम्।।

*

## सन्दर्भाः


1. छान्दोग्योपनिषत्, 6.8.
2. अध्यासः (परपक्षः) गिरिवज्रम्, पृ.890
3. प्रश्नोपनिषत्, 3.9
4. ब्रह्मसूत्रम्, वेदान्त-वेदान्तकौस्तुभः, 4.2.1

5. छान्दोग्योपनिषत्, 6.8.6
6. 'प्राणो जीवेन संयुज्यते। ... जीवसंयुक्तस्य प्राणस्य तेजसि सम्पत्तिरिति फलितार्थः।'
ब्रहासूत्रम्, वेदान्तपारिजातसौरभ-भाष्यम्, 4.2.4
7. बृहदारण्यकोपनिषत्, 4.4.2
8. बृहदारण्यकोपनिषत्, 4.3.38
9. तदेव, शाङ्करभाष्यम्।
10. कठोपनिषत्, 2.3.14
11. छान्दोग्योपनिषत्, 8.6.5
12. बृहदारण्यकोपनिषत्, 4.4.2
13. छान्दोग्योपनिषत्, 8.6.6
14. कठोपनिषत्, 2.3.14-15
15. तदेव, 2.3.16
16. ब्रह्मसूत्रम्, 4.2.7
17. छान्दोग्योपनिषत्, 6.14.2
18. प्रश्नोपनिषत्, 6.5
19. मुण्डकोपनिषत्, 3.2.6
20. तदेव, शाङ्करभाष्यम्,
21. महानारायणोपनिषत्, 25.1
22. ब्रह्मसूत्रम्, 4.2.19
23 श्रीमद्भगवद्गीता, 8.26
24. ब्रह्मसूत्रम्, वेदान्त-वेदान्तकौस्तुभः, 4.2.19
25. ब्रह्मसूत्रम्, वेदान्त-वेदान्तकौस्तुभः, 4.2.20
26. तदेव
27. बृहदारण्यकोपनिषत्, 6.2.15)
28. कूर्मपुराणम्, पूर्वार्धम्, 12.269
29. अध्यास (परपक्ष) गिरिवज्रम्, पृ.905
30. ब्रह्मसूत्रम्, 4.3.11
31. तदेव, 4.3.12
32. महाभारतम्, द्रोणपर्व।
33. वेदान्तकौस्तुभविधृता श्रुतिः, ब्रह्मसूत्रम्, 4.3.11
34. छान्दोग्योपनिषत्, 8.14.1
35. तदेव

36. छान्दोग्योपनिषत्, 8.13.1
37. बृहदारण्यकोपनिषत्, 6.2.15
38. द्रष्टव्यम् : अध्यास (परपक्ष) गिरिवज्रम्, पृ.907
39. शाङ्करभाष्यम्, छान्दोग्योपनिषत्, 2.20.2), बृहदारण्यकोपनिषत्, 1.3.22, 1.5.23
40. अध्यास (परपक्ष)गिरिवज्रम्, पृ.908
41. 'नापि सगुणविद्यायामेव श्रुता अपि तु निर्गुणायाम्, तथा च श्रुतिमुखेनैव सिद्धा विदुषां गतिरिति।' अध्यास (परपक्ष)गिरिवज्रम्, पृ.909
42. ब्रह्मसूत्रम्, 3.3.30-31
43. ब्रह्मसूत्रम्, शाङ्करभाष्यम्, 3.3.31
44. 'उपासनाया ... ज्ञानरूपत्वात्',- ब्रह्मसूत्रम्, अणुभाष्यम्, 1.1.1
45. 'जीवस्य सर्व्वात्मना ब्रह्मभेद... नास्ति' - ब्रह्मसूत्रम्, अणुभाष्यम्,भाष्यप्रकाशः। 'मुक्तिदशायामपि साम्यमात्रबोधनाच्च, जीवब्रह्मैकस्यापि तादात्म्यरूपत्वम् एव न तु सर्वात्मना अभेदरूपत्वम्, अभेदस्य तादात्म्यात्मकत्वात्' तदेव, पृ.1361-1363
46. ब्रह्मसूत्रम्, अणुभाष्यम्, 4.2.1
47. ब्रह्मसूत्रम्, अणुभाष्यम्, 4.3.7
48. ब्रह्मसूत्रम्, अणुभाष्यम्, 4.4.1
49. कठोपनिषत्, 2.3.5
50. ब्रह्मसूत्रम्, 4.3.14
51. छान्दोग्योपनिषत्, 8.3.4
52. छान्दोग्योपनिषत्, 5.10.1
53. ब्रह्मसूत्रम्, वेदान्त-वेदान्तकौस्तुभः, 4.3.14
54. छान्दोग्योपनिषत्, 3.14.1
55. वेदान्तकौस्तुभविधृता श्रुतिः, ब्रह्मसूत्रम्, 4.3.14
56. 'परब्रह्मात्मकतया प्रकृतिवियुक्तप्रत्यगात्मक्रतुस्तादृशस्वस्वरूपप्राप्तिपूर्वकपरमात्मानं प्रतिपद्यते' ब्रह्मसूत्रम्, वेदान्तकौस्तुभ-भाष्यम्, 4.3.14
57. छान्दोग्योपनिषत्, 7.1.5
58. अध्यास(परपक्ष)गिरिवज्रम्, पृ.911
59. अध्यास(परपक्ष)गिरिवज्रम्, पृ.912
60. 'अनादिमायां परियुक्तरूपां' - वेदान्तकामधेनुः, 2

*

# किञ्चित् पारिभाषिकम्

काशिकावृत्तौ अष्टाध्यायीगतानां सूत्राणां शब्दाः यथा परिभाषिताः तथा सूत्र-तत्संख्योल्लेखपुरःसरम् अध्यायक्रमेणात्र संगृह्यन्ते।

११. कर्मधारय — निष्ठेत्ययमपि श्रेण्यादिसमासे विधिरिति प्रवृद्धशब्द इह पठ्यते।

का. महान् व्रीह्य... ६.२.३८

१२. क्षुल्लः — क्षुधं लातीति क्षुल्लः
तस्मादज्ञातादिषु प्रागिवात्केऽन्तोदात्तः क्षुल्लकशब्दः।

का. क्षुल्लकश्च वैश्वदेवे ६.२.३९

१३. गोसादः — गोः सादः गोसादः। गां सादयतीति वा गोसादः।

का. गौः सादसादिसारथिषु ६.२.४१

१४. अश्लीलम् — अश्लीलशब्दो नञ्समासत्वादाद्युदात्तः। श्रीर्यस्यास्ति तत् श्लीलम्। सिध्मादेराकृतिगणत्वाल्लच्। कपिलकादित्वाच्च लत्वम्। अश्लीलदृढरूपा इति हि संस्थानमात्रेण शोभना निःश्रीका लावण्यविरहितोच्यते।

१५. ओषधिः — ओषो धीयतेऽस्यामिति 'कर्मण्यधिकरणे चे'ति कि-प्रत्ययः।

का. कुरुगार्हपत... ६.२.४२

१६. अचिरोपसम्पत्तिः — अचिरोपसम्पत्तिरचिरोपश्लेषोऽभिनवत्वम्।

का. प्रथमोऽचिरोपसम्पत्तौ ६.२.५६

१७. हारी — हारीति देयं यः स्वीकरोति सोऽभिधीयते।

१८. धर्म्यम् — धर्म्यमित्याचारनियतं देयमुच्यते।
धर्मो ह्यनुवृत्त आचारस्तस्मादनपेतं तेन वा प्राप्यमिति।

का. सप्तमीहारिणौ धर्म्येऽहरणे ६.२.६५

१९. युक्तः — युक्त इति समाहितः, कर्तव्ये तत्परो यः स उच्यते।

का. युक्ते च ६.२.६६

२०. मैरेयः — मद्यविशेषो मैरेयः।

का. अङ्गानि मैरेये ६.२.७०

२१. भक्तम् — भक्तमन्नम्।
भिक्षाकंसः, श्राणाकंसः, भाजीकंसः भिक्षादयोऽन्नवचनाः।

का. भक्ताख्यास्तदर्थेषु ६.२.७०

# शङ्करवेदान्तदेशिकसिद्धान्तानुसारम् 'ईशा वास्यम्' इति मन्त्रतात्पर्यविश्लेषणं तत्साम्यवैषम्यसमीक्षणञ्च

**चन्दन मुखर्जी**

**कुञ्चिकाशब्दाः**

अद्वैतवेदान्तः, विशिष्टाद्वैतवेदान्तः, ईशः, परमात्मा, नारायणः, एकेश्वरवादः, प्रवाहेश्वरमतम्, अनेकेश्वरवादः, त्रिविधैषणात्यागश्चेति।

**शोधसंक्षिप्तिः**

'ईशा वास्यमि'ति प्रथममन्त्रस्य शङ्कराचार्यैरभिप्रेतमद्वैतपरकमर्थं प्रतिपाद्य वेदान्तदेशिकैरिष्टस्य विशिष्टाद्वैतार्थस्य प्रतिपादनं यथामति क्रियतेऽस्मिन् शोधलेखे। ततः उभयभाष्योक्ततत्त्वार्थसमीक्षणमित्येवं लेखस्यास्य मुख्या रीतिः। उभयोर्भाष्ययोर्बहुत्र सामञ्जस्यं पार्थक्यञ्च परिदृश्यते। बहुषु विषयेषु मतैक्यं मतानैक्यञ्च दृश्यते। नवीनतायाः प्रभावोऽपि स्पष्टः। सर्वादौ शाङ्करभाष्ये 'ईशा वास्यमिदं सर्वम्' इति मन्त्रक्रमो दृश्यते। पक्षान्तरे वेदान्तदेशिकभाष्ये 'ईशावास्यमिदं सर्वम्' इति क्रमो मन्त्रे परिलक्ष्यते। शङ्कराचार्येण 'ईशा वास्यम्' इति मन्त्रांशस्य व्याख्यानम् ईशा वास्यं चेति पदद्वयस्य कार्यकारणतत्त्वमाध्यमेन व्याख्यानं कृतम्। वेदान्तदेशिकस्य भाष्यमवलोकयामश्चेदीशा वास्यमिति पदस्य द्विविधा व्युत्पत्तिर्दृश्यते। निरुपाधिकमेव ब्रह्म जगदाधारमिति शङ्कराचार्यस्य मतम्। किन्तु वेदान्तदेशिकाचार्यो भगवान् विष्णुरेव जगदाधार इति विशिष्टं तत्त्वं प्रतिपादयितुं प्रचेष्टते। ईशशब्दस्य रुद्रवाचकत्वखण्डनपुरःसरं मीमांसकन्यायान् आश्रित्य एकेश्वरवादप्रवाहेश्वरवादखण्डनपूर्वकं भगवन्नारायणे एव मतिर्दृश्यते वेदान्तदेशिकाचार्याणाम्।

**1. उपोद्घातः**

सर्वासु उपनिषत्सु प्रायो लघुकाया इयम् ईशावास्योपनिषत्। यद्यपि लघुकाया तथापि अस्याः माहात्म्यं गुरुत्वञ्च सर्वैः सुविदितमेव। काण्वमाध्यन्दिनशाखाभेदेन द्विधा

विभक्ता शुक्लयजुर्वेदान्तर्गता ईयम् ईशावास्योपनिषत्। काण्वशाखीयाम् ईशावास्योपनिषदम् आधारीकृत्य भगवत्पूज्यपादैः शङ्कराचार्यैः अद्वैतसिद्धान्तपरकं भाष्यं विरचितम्। रामानुजभागिनेयैः वेदान्तदेशिकाचार्यैः अपि तामेव शाखामधिकृत्य विशिष्टाद्वैतपरकं भाष्यं कृतम्। अधुना 'ईशा वास्यमि'ति प्रकृतोपनिषत्स्थितस्यादिमस्य मन्त्रस्य सूक्ष्मवैशिष्ट्य-प्रदर्शनपुरःसरं प्रमेय-प्रमाणादिविचारपूर्वकमुभयभाष्योक्तविशिष्टस्थलं विवेच्यते। तस्मादी-शावास्योपनिषदः शङ्कराचार्यवेदान्तदेशिककृतयोः द्वैतविशिष्टाद्वैतपरयोः प्रथममन्त्रभाष्ययोः समीक्षात्मकमध्ययनं विधीयते।

## 2. उभयभाष्यानुसारं मन्त्रविनियोगः

ईशावास्योपनिषदि 'ईशा वास्यमिदं सर्वम्'[1] इत्यारभ्य 'अग्ने नय सुपथा'[2] इत्यन्तम् अष्टादश मन्त्राः वर्तन्ते। शाङ्करभाष्यदिशा एते मन्त्राः निर्विशेषात्म-स्वरूपप्रतिपादनपराः दृश्यन्ते। किन्तु वेदान्तदेशिकस्य भाष्यदिशा एते मन्त्राः अशेषकल्याणगुणविशिष्टविष्णुतत्त्वप्रतिपादने रताः इति पार्थक्यं सामान्यतया अवगम्यते। शाङ्करभाष्यस्यापाततो विचारे ज्ञायते यत् 'ईशा वास्यम्'[3] इत्यारभ्य 'स पर्यगात्'[4] 'इत्यन्तं यावदष्टौ मन्त्राः ब्रह्मस्वरूपम्, आत्मज्ञप्रशंसनम्, आत्मयाथात्म्यवर्णनम्, अभेददर्शनम्, आत्मैकत्वविद्याफलञ्च इत्यादि ज्ञाननिष्ठरूपं निवृत्तिलक्षणं धर्मं प्रतिपादयन्ति। 'अन्धं तमः प्रविशन्ति'[5] इत्यारभ्य 'अग्ने नय सुपथा'[6] इत्यन्तं यावदवशिष्टाः दश मन्त्राः विद्याविद्ययोः फलं, विद्याविद्ययोः समुच्चय-तत्फलं, व्याकृताव्याकृतयोः फलं, देवयानगतिप्रार्थनं चेत्यादि व्याकृताव्याकृतयोः समुच्चयफलम्, उपासककृतं कर्मनिष्ठरूपप्रवृत्तिधर्मं प्रतिपादयन्ति। पुनः वेदान्तदेशिकस्य भाष्यावलम्बनेन वक्तुं शक्यते यत् प्रथमाः अष्टौ मन्त्राः चिदचिच्चिदचित्तत्त्वत्रयप्रतिपादने अशेषविद्याङ्गकर्मानुष्ठाने ईश्वरानन्तशक्तिकीर्त्तने अतुल्यब्रह्मानुसन्धानैहिकफलत्वे विद्यात्मके परतत्त्वे विष्णुमाहात्म्यादिविचारे च प्रवृत्ताः। अन्तिमाः दश मन्त्राः भक्तियोगमुक्तिं तत्राप्त्युपायं च प्रतिपादयन्ति।

## 3.1. प्रथमो मन्त्रः

'ईशावास्यमिदम्' इत्येवम् आरब्धा अष्टादशमन्त्रात्मिका इयम् ईशावास्योपनिषत्। ईशा वास्यञ्चेति शब्दद्वयमाश्रित्य उपनिषदो नामकरणं जातम् ईशावास्योपनिषत् इति। केचन केवलम् ईशाशब्दमाश्रित्य अपि ईशोपनिषदिति नाम्ना व्यवहरन्ति। कैश्चन ईशा वास्यमिति पदद्वयम् आश्रित्य एव ईशावास्योपनिषत् इति अभिधीयते। मन्त्रः तावत् -

**‘ईशा वास्यमिदं सर्वं यत्किञ्च जगत्यां जगत्।**

**तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद्धनम्॥’** (मन्त्रः 1) इति।

### 3.1.1. अन्वयः

जगत्यां यत्किञ्च जगत् इदं सर्वम् ईशा वास्यम्। त्यक्तेन तेन भुञ्जीथाः कस्यस्वित् धनं मा गृधः।

### 3.1.2. शाङ्करभाष्याभिप्रायः

### 3.1.2.1. ब्रह्मस्वरूपवर्णनम्

अस्मिन् जगति यत् किञ्च नामरूपाभ्यां व्याकृतं चराचरमुच्चावचं मिथ्याभूतं विश्वप्रपञ्चात्मकं स्थावरजङ्गमादिलक्षणं जगद्वर्तते इदं सर्वमीशा परमेश्वरेण परमात्मनाहमेवेदं सर्वमित्यादिरूपेणेश्वरभावनया वास्यमाच्छादनीयमिति शङ्कराचार्योक्तभाष्यार्थः। ईश ऐश्वर्ये इति धातोः कर्तर्यर्थे क्विपि प्रत्यये कृदन्तं रूपम् ‘ईश्’ इति सिध्यति, तेनेशा परमात्मनेत्यर्थः। अत्राक्षेपो भवितुमर्हति यत् कर्तर्यर्थे क्विब्विधानेन त्रैकालिकबाधरहितस्याविक्रियात्मकस्य परमात्मनो विक्रियात्मकत्वमुपपद्येत तेनाद्वैतसिद्धान्तो व्याहन्येत। समाधीयते यत् मायोपहितेनेश्वरेणेशन-कर्तृत्वसम्भवान्नाद्वैतसिद्धान्तक्षतिः। ‘इन्द्रो मायाभिः’ इत्यादिना, ‘तदैक्षत बहु स्याम्’ इत्यादिना, ‘अनेन जीवेनात्मनानुप्रविश्य’[१] इत्यादिना च मायोपहितस्य चैतन्यस्येशनकर्तृत्वं तु श्रूयते एव। मायोपहितचैतन्यकृतेक्षणमौपचारिकमेव। पारमार्थिकदशायां तस्य बाधः। सर्वं जगदिदमनेनात्मनैवाच्छादितम्। वस्त्राच्छादितं द्रव्यं यथास्माभिः प्रत्यक्षप्रमाणेन न गृह्यते, तथा जगदिदमीश्वरभावनात्मकवस्त्राञ्चलेनाच्छादितं वर्तते। यथा क्लेदादिजन्यौपाधिकमेव प्रकृतचन्दनादीनां दौर्गन्ध्यमुपलभ्यते, ततो घर्षणकर्मणा स्वपारमार्थिकस्वरूपेण सुरभिणाच्छाद्यते। तद्वदत्र कर्तृत्वभोक्तृत्वाद्यनर्थलक्षणं स्वात्मन्यध्यस्तं नामरूपकर्मजातं द्वैतभूतमिदमखिलं जगत् परमार्थभावनया सत्यात्मभावनया च त्यक्तव्यम्। इत्थमीश्वरार्पणबुद्धियुक्तस्यात्मयाथात्म्य-सम्पन्नस्यात्मभावनायुक्तस्य प्रमातुर्लोकवित्तपुत्ररूपसर्वविधैषणात्यागलक्षणे सन्न्यास एवाधिकारः, न त्वग्निहोत्रादिष्वनित्यकर्मसु। एवं कथमपि त्यक्तत्रिविधैषणेन धनविषयिण्याकाङ्क्षा न कार्या। अत्र भाष्यकारेण भुञ्जीथाः शब्दस्य प्रयोगः कृतः। तेन पालनार्थकस्य भोगार्थकस्य वा भुज् धातोः प्रयोगेण द्विविधोऽर्थो दृश्यते। आत्मेवेदं सर्वमित्यात्मभावनया सर्वविधत्यागपूर्वकमात्मानं परिपालय। किञ्च कामनाविहीनेन निरासक्ततया जगतो भोगः कर्तव्यो वेत्यर्थात्त्यागेनैव भोग इति विशेषार्थः। कस्यस्विदिति द्विरर्थबलेन स्वस्य परस्य कस्यचिद्धनस्याप्याकाङ्क्षा न स्यादित्येकोऽर्थः।

पुनः कस्यस्विद्वेदं धनमर्थाद्धनमिदं न कस्यापि यद् गृध्येतेत्यर्थः। एवं ब्रह्मभिन्नमनित्यं सर्वमित्यात्मभावनयात्मभिन्नस्य सर्वस्यापि लोभो निराकृत इत्यादिरूपेण ब्रह्मस्वरूपनिरूपणपूर्वकं त्यागमार्गः साधकेनाचरितव्य इति शाङ्करभाष्योक्ताभिप्रायः।

### 3.1.3. वेदान्तदेशिकभाष्याभिप्रायः

#### 3.1.3.1. तत्त्वत्रयविचारः

रामानुजीये विशिष्टाद्वैतवेदान्तदर्शने तत्त्वत्रयमतीव प्रसिद्धं वर्तते। तत्त्वत्रयं हि चित् अचित् चिदचित् च। चित्तत्त्वं जीवः, अचित्तत्त्वं प्रकृतिः, चिदचिद्विशिष्टो नारायणः परमात्मा पुरुषोत्तमो वा। अचिद्विकारजातो जगत्प्रपञ्चः। तदखिलं जगत् परमपुरुषे नारायण एव सृष्टं स्थितं लीनञ्च। तस्य समस्तस्याखिलस्य जगतः परमपुरुषायत्तत्वप्रदर्शनार्थं वेदान्तदेशिकस्य भाष्यमुपन्यस्तम्।

नन्वत्रैवं भाष्योपक्रमस्य किन्तावत्प्रयोजनम्। आपाततो दर्शनेन उपक्रमभागस्यास्य भाष्यस्य द्विधा प्रयोजनं भवितुमर्हति। प्रथमं ब्रह्मविद्याधिकारिज्ञापनं, द्वितीयञ्चेन्द्रियं मनः प्राणादिषु आत्मत्वभ्रमनिवारणम्। शिष्येभ्य आचार्यस्येदं ब्रह्मविद्याया अनुशासनम्। सर्वे इहज्ञानिनो मानवा जीवा अचिद्विकाराधिष्ठिताः। अर्थादचिद्विकारभूतं त्रिगुणात्मकं स्थावरजङ्गमरूपं प्रकृतिविकारं शरीरमधिष्ठाप्यैव जीवन्ति जीवाः। अतः स्वतन्त्रः तेषां देहेन्द्रियमनोबुद्धिप्राणादिष्वात्मत्वभ्रमः। स्वतन्त्र एवायं भ्रमः। सुयुक्तिभिः तेषां भ्रमाणां निराकरणायैव भाष्यस्य प्रवृत्तिः। इदमेव तत्त्वं प्रथममन्त्रस्य भाष्ये[10] अचिद्विकाराधिष्ठितस्येति पदेन निहितं वर्तते।

मन्त्रे प्रयुक्तेन इदं शब्देन जगदभिप्रेतम्। यत्किञ्चिच्चित्तत्त्वमचित्तत्त्वञ्च वर्तते तद्ग्राह्यम्। स्वरूपतो धर्मतो वान्यथा गच्छतीति जगदिति जगच्छब्दव्युत्पत्तिः। इदञ्च भोग्यभोक्तृरूपं जगत् कथं सिध्यतीति चेत् प्रत्यक्षानुमानागमैः प्रमाणैर्जगदिदं सिध्यति। तत्तत्प्रमाणैः सिद्धं जगदिदं चिदचिदात्मकम् ईश्वरव्यतिरिक्तम्। भोक्ता भोग्यं प्रेरिता चेति त्रिविधोपादानेन जगतः स्वरूपं ज्ञायते। ततो जगत्स्वरूपं विज्ञाय तत् केनाच्छादितं व्याप्तं वा तत् सर्वं किं वा तस्य याथात्म्यञ्च तदवगन्तुं शक्यते।

#### 3.1.3.2. ईशावास्यमिति द्विधा निरुक्तिः

ईशावास्यमिदं सर्वमित्यत्र तत्सर्वं जगद्रूपं चिदचिद्विशिष्टेन परमात्मना नाराणयेन व्याप्तम्। अत्र ईशावास्यमिदमिति पदे वेदान्तदेशिकेन द्विविधा व्युत्पत्तिः प्रदर्शितेति

तस्य विशेषत्वं स्फुटमेव। ईट् नाम ईशिता, तेन ईशा इत्यर्थः। तेन वास्यं, तेनावास्यञ्चेति द्विधा व्युत्पत्तिर्दृश्यते भाष्यार्थं परिशीलयामश्चेत्।

**( क ) ईशा वास्यम् ईशावास्यम् -** इति विग्रहमनुसरामश्चेत् सर्वज्ञाज्ञयोः ईश्वरजीवयोः अत्यन्तविलक्षणत्वप्रदर्शनपूर्वकं नियामकनियम्यभावो व्यापकव्याप्यभावश्चेति परिस्फुटो दृश्यते। 'ज्ञाज्ञौ द्वावजावीशानीशौ'[11] इति श्रुतिबलेन परमात्मा सर्वज्ञः सर्वेशानो नियामयिता जगद्व्यापकः सर्वनियामकश्च विष्णुः। जीवः तद्विलक्षणो नियम्यो जगद्व्याप्यश्च। तस्मिन् परमात्मनि सर्वज्ञे सर्वेशाने नियामयितरि जगद्व्यापके सर्वनियामके विष्णौ चराचरं जगदिदं व्याप्तमित्यर्थः स्पष्टः प्रतिभाति।

**( ख ) ईशा आवास्यम् ईशावास्यम् -** इति व्युत्पत्तिं पश्यामश्चेदत्रावास्यमिति पदस्य वासनीयमित्यर्थः आयाति। स्वस्मिन् स्वेन जगदावासनीयम्। 'सर्वत्रासौ समस्तञ्च'[12] इत्यनुसारं यतोऽसौ परमात्मा समस्तं जगद्व्याप्य वसति, ततः सः वासुदेव इति विद्वद्भिः पठ्यते। सृष्टिकाले पमात्मान्तर्यामिरूपेण सम्पूर्णे जगति निवसति। पुनः प्रलयकाले च सम्पूर्णं जगत् स्वात्मन्येव निवासयति। आभ्यन्तरव्याप्तिकारणात् परमात्मा जगति निवसति। बाह्यव्याप्तिकारणात् परमात्मा सर्वाधारे स्वस्मिन् जगन्निवासयति। परमात्मा हि वासुदेव-शब्देनाभिप्रेतः। परमात्मा वासुदेवो जगदाधारः। जगदिदं परमात्मन आधेयम्। एवं व्युत्पत्त्यानया परमात्मजगतोराधाराधेयभावः परिज्ञातः। तेन परमात्मना जगदिद-मावासनीय-मिति द्वितीयोऽर्थः।

जगत्यामस्मिन् जगति लोकान्तरे वा यत्किञ्चिद्वस्तु वर्तते तत्सर्वं परमात्मना व्याप्तमित्यर्थज्ञापनानन्तरं किञ्चिदपि वस्तुजातमतदात्मकं नास्तीति दृढतासम्पादनाय स्मृतिवाक्यं प्रमाणीक्रियते - 'इन्द्रियाणि मनो बुद्धिः'[13] इति। इन्द्रियाणि मनो बुद्धिः सत्त्वं तेजो बलं धृतिः क्षेत्रं क्षेत्रज्ञञ्च यत्किमपि वस्तुजातं तत् सर्वं वासुदेवात्मकम्। चित्तत्त्वमचित्तत्त्वञ्च ब्रह्मण्यद्वैते नारायणेऽपृथक्सिद्धविशेषणसम्बन्धेन वर्तते। चिदचिदोरपृथक्सिद्धविशेषण-सम्बन्धेन ब्रह्मण्यन्तर्भूतत्वाद्विशिष्टमेकमेव तत्त्वं चिदचिद्विशिष्टमद्वैततत्त्वं विशिष्टाद्वैतम्।

ईशावास्यमित्यत्रेशशब्दवाच्यः क इत्याक्षेप्तुराक्षेपः। किमीशशब्दवाच्यः रुद्रो वा, किं वा तद्भिन्नः कश्चिदित्याक्षेप उत्थित आचार्यैर्वेदान्तदेशिकैः प्रतिपक्षाक्षेपनिरसनपूर्वकं बह्वीभिर्युक्तिभिरीशशब्दवाच्यः परमेश्वरो विष्णुरेव न ततो भिन्नः कश्चिदिति स्वसिद्धान्तः प्रतिष्ठाप्यते।

### 3.1.3.3. ईशशब्दस्य रुद्रवाचकत्वे आक्षेपः

रुढिर्योगमपहरतीति न्यायप्रदर्शनपूर्वकमाक्षेप्तृभिरीशशब्दस्य रुद्रवाचकत्व आक्षेपः

क्रियते। सामान्यतया शब्दः स्वमर्थं द्विधा प्रकाशयति- योगमाध्यमेन रूढिमाध्यमेन च।

**योगः**

प्रकृतिप्रत्ययाभ्यां योऽर्थः समागतो भवति स योगार्थः। वस्तुतस्तु व्युत्पत्त्यर्थस्तु यौगिकार्थः। अवयवशक्तिरेव योगः। अनेन शब्दार्थस्य प्रतीतिर्विलम्बेन भवति। प्रकृतिप्रत्ययतया अवयवार्थस्वरूपविवेवचनेन अर्थबोधकत्वाद्योगो विलम्बितज्ञानहेतुः। यथा पाचक इत्युक्ते प्रकृतिप्रत्ययगतार्थो भवति पच् इति प्रकृतिः। प्रत्ययश्च कः। 'पच्' इति धातोरर्थः पाकक्रिया। क प्रत्ययस्य अर्थः कर्ता। पदे आहत्य पाकक्रियायाः कर्ता पाचक इति योगार्थः समुपलभ्यते। इदं पाचकपदमवयवशक्त्यैवार्थमवबोधयति। तस्मात् पाचकपदं यौगिकम्।

**रूढिः**

प्रकृतिप्रत्ययज्ञानं विना केवलं समुदायमात्रश्रवणेन झटिति योऽर्थोऽवबुध्यते स रूढ्यर्थः। समुदायशक्तिरेव रूढम्। यौगिकार्थापेक्षया रूढ्यर्थस्तु स्वल्पेन कालेनार्थमवगमयति। यथा पटपदम्। अत्र पटपदे पकारस्य टकारस्य च पृथगर्थो नास्त्येव। समुदायशक्त्या पटपदमेकमेवार्थं ज्ञापयति। समुदायशक्त्यार्थबोधकत्वात् पदमिदं रूढम्। अर्थस्तु रूढ्यर्थः।

एवं योगार्थो रूढ्यर्थेन बाधितो भवति। रूढिर्योगमपहरतीति न्यायं समाश्रित्य पूर्वपक्षिणः प्रकृतस्य ईशशब्दस्य रूद्रवाचकत्वमाक्षिपन्ति।[14] ईशशब्दो रुद्रवाचकः, नत्वीश्वरवाचकः। ईशशब्दस्य योगार्थस्त्वीश्वरः परन्त्वीशशब्दस्य रूढ्यर्थश्च कोशादिषूपलभ्यते। तस्माद्रूढिर्योगमपहरतीति न्यायबलेनेशशब्दोऽत्र रुद्रपर इति पूर्वपक्षिण आक्षेपः। द्विधायुक्तिः तैः प्रदर्श्यते -

(क) ईशावास्यमिति पदमेकमेव समस्तं पदं वर्तते। ईशेनावास्यमीशावास्यमिति। अत्र साक्षादीशपदं वर्तते, न तु तृतीयाविभक्त्यन्तम्। तेनेशावास्यमित्यस्याभिप्रायो भवति- इदं समस्तं जगद्रुद्रस्याधेयम्।

(ख) सर्वाद्युपपदभावात् - 'ईशः सर्वस्य जगतः'[15] इत्यादिना पद्मपुराणे ईशपदेनैकः श्लोकः श्रूयते। अत्र जगच्छब्द ईशपदस्योपपदं वर्तते। सर्वशब्दबलेनेशशब्दो यौगिकार्थमनुसृत्यान्यपरः सञ्जातः। अतः सर्वाद्युपपदत्वादत्रेशशब्देन रूढ्यर्थम् रुद्रं परित्यज्येश्वर एव बोध्यः। न तथा प्रकृते। सर्वाद्युपपदाभावात् निरुपपदत्वादत्रेशशब्दो रूढ्यर्थं रुद्रमवबोधयति। तस्मात् प्रकृते मन्त्र ईशशब्देन रुद्रो ग्राह्य इति पूर्वपक्षः।

### 3.1.3.4. ईशशब्दस्य रुद्रवाचकत्वनिरसनपूर्वकं विष्णुवाचकत्वप्रदर्शनम्

वेदान्तदेशिकाचार्येणानायासेन युक्त्या बुद्ध्या न्यायेन चेशशब्दस्य रुद्रवाचकत्वं निरस्य विष्णुपरकत्वं प्रदर्शयति।[16] अयोग्यरूढ्यर्थापेक्षया यौगिकोऽबाधितश्चार्थः स्वीकार्यः। यथा- 'सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्ते'[17] इति, 'सर्वाणि ह वा इमानि भूतानि प्राणमेवाभिसंविशन्ति'[18] चेति कारणप्रकरणे पठितछान्दोग्यश्रुतिस्थौ आकाशप्राणौ शब्दौ रूढ्यर्थं परित्यज्य यौगिकार्थेन परमात्मवाचिनौ भवेतां, तथेशावास्यमिति मन्त्रस्थित ईशशब्दः परमात्मवाचकः, न तु रुद्रवाचकः। 'एको ह वै नारायणः'[19] इत्यादिश्रुतिः परमात्मवाचकत्वं विष्णुवाचकत्वञ्च प्रतिपादयति।

यथा प्रसिद्धाकाशप्राणशब्दयोः सर्वजगत्कारणत्वयोग्यता न वर्तते। यथा वा तत्परित्यागेन यौगिकार्थाङ्गीकारेणाकाशप्राणयोः परमात्मत्वं प्रतिपादितं, तथात्रैवानपहतपाप्मादि धर्मत्वं निरूपाधिकत्वं सर्वकारणत्वं सर्वावास्यत्वं सर्वाधारत्वं कर्मस्वातन्त्र्यं पुरस्कृत्य तद्धर्माणां रूढ्यर्थे रुद्रेऽसम्भवादैश्वर्ये सर्वेश्वरे परमात्मनि विष्णावेवेशशब्दस्य यौगिकार्थः स्वीकरणीयः। अत ईशशब्देनात्र परमात्मा नारायणो ग्राह्य इति देशिकाचार्याभिमतम्।

पुनर्यथा छान्दोग्यशतपथब्राह्मणमन्त्रस्थितौ ह-वा-शब्दौ प्रसिद्धवत् निर्देशादा-काशप्राणयोः वाच्यार्थाधारेण जगत्कारणत्वं प्रतिपादयतः। न तथेशावास्यमित्यत्र रुद्रस्य प्रसिद्धवन्निर्देशो वर्तते येनेशशब्दवाच्यो रुद्रो वर्तेत।

### 3.1.3.5. एकेश्वरवादेन प्रवाहेश्वरमतनिराकरणम्

महता प्रयत्नेन युक्तिभिः प्रमाणैः तर्कैश्चेशशब्दस्य तर्कैश्चेशशब्दस्य रुद्रवाचकत्व-निरसनानन्तरं प्रवाहेश्वरवादिनां मतं निराकर्त्तुमाचार्यस्य प्रयासोऽधुना दृश्यते। प्रतिकल्पं सृष्टौ कश्चन सर्वनिर्वाहक ईश्वरो वर्तत एव पुनः प्रलयानन्तरमन्यस्मिन् कल्पेऽपि कश्चित् सर्वनियन्ता ईश्वरस्तु वर्तते। सृष्टिलययोर्भिन्नो भिन्न ईश्वर इति प्रवाहेश्वरवादः। परन्तु त्रैकालिकसर्वनिर्वाहकः परमेश्वर एक एवेति वेदान्तदेशिकाभिमतेन एकेश्वरवादेन प्रवाहेश्वरमतनिराकरणं तूपपन्नमेव।

### 3.1.3.6. एकेश्वरवादेन अनेकेश्वरवादनिरसनम्

प्रतिकल्पमीश्वराः नैव परिवर्तन्ते। अपि तु सृष्टिनिर्वहणाय स्थितिसम्पादनाय लयनिर्वहणाय भिन्नभिन्नकार्यसम्पादनाय चानेकैश्वर्यसमन्विता नैक ईश्वरा दृश्यन्ते। यथा सृष्टिकर्ता ब्रह्मा, पालनकर्ता नारायणः, संहारकर्ता रुद्रः चेति। तस्मात् सृष्टिस्थिति-संहारादिकार्यभेदेन ब्रह्मविष्णुरुद्रादयः समानैश्वर्यशालिनोऽनेके देवा इति अनेकेश्वरवादः।

अत्रापि त्रैकालिकसर्वनिर्वाहकः परमेश्वर एक एवेति आचार्योपदिष्टैकेश्वरमतेनैवानेकेश्वरवादः प्रत्यूढः।

### 3.1.3.7. ईशशब्दवाच्यः भगवान्नारायणः एव

तस्मादीशावास्यमित्यत्रेशशब्देन परमपुरुषो भगवान्नारायणः स्वीकार्योऽनन्तगुणसमन्वितत्वात् प्रसिद्धानन्याधीनैश्वर्यत्वात् उभयविभूतिनायकत्वात् अनन्यथासिद्धवाक्यनिर्धारितत्वात् सर्वभूतान्तरत्वात् अपहतपाप्मत्वात् सर्वान्तर्यामित्वाच्च।

(क) प्रसिद्धानन्याधीनैश्वर्यसमन्वितो जगत्स्वामी भगवान् नारायणः। स एव ईशशब्दवाच्यो भगवान् नारायणः पतीनां परमः पतिः, भुवनेशः, ईड्यः, ब्रह्मादिदेवसङ्घपुरुषोत्तमश्च।

(ख) 'योऽसावसौ पुरुषः'[20] इत्यनेन सर्वस्यान्तर्यामिरूपेण परामृष्टः परमः पुरुषो वैकुण्ठनिवासी एव। एवमुभयविभूतिनायकोऽन्तर्बहिश्चोभयथा व्याप्यो भगवान्नारायणः ईशशब्देन वाच्यः।

(ग) अनन्यथासिद्धवाक्यनिर्धारितो ब्रह्मेशानजनकः परमः पुरुषो नारायणः। 'एष सर्वभूतान्तरात्माऽपहतपाप्मा'[21] इत्यादिश्रुतिनिर्देशात् सकलदोषरहितो दिव्यगुणोपेतः सर्वभूतान्तरात्मा भगवद्विष्णुरेवेशशब्दवाच्यः। स एव ब्रह्मा शिव इन्द्रोऽक्षरः परमः स्वराट् विष्णुः प्राणः कालोऽग्निः चन्द्रमा च सकलविभूतिभूतः।

(घ) 'विश्वमेवेदं पुरुषः'[22] इत्यादिना समस्तं जगदिदं नारायणात्मकमिति प्रतिज्ञायते। परमात्मा परमः पुरुषो नारायणो विश्वशब्देन विशेषितः। स एव ईशशब्दवाच्यः।

ईशावास्यमिति पदस्य समस्तत्वस्वीकार एव रुद्रपर इति महान् पूर्वपक्ष एवागतः। तेऽश्रोत्रिया ईशेन आवास्यम् ईशावास्यमिति समस्तपदमङ्गीकुर्वन्ति। तेनेशशब्देन रुद्ररूपरूढ्यर्थप्रसङ्गः समागतः। यदि ईशावास्यमिति पदस्य ईशा वास्यम् आवास्यं वा इति विभाजनेन परिशीलयामस्तर्हि सा शङ्का नैव समागच्छति। ईशावास्यमिति पृथक्पदत्वेनैव सम्प्रदायपाठो वर्तते। तदनभिज्ञैरेवेशसत्त्वभ्रमेण कृतो दोषः। एवं समस्तपदत्वमङ्गीकृत्यापि दोषः परिहर्तुं शक्यः। एवं परमात्मना नारायणेनैव जगदिदं वास्य व्याप्तम्, आवस्यं धार्यं वेति वेदान्तदेशिकाचार्याणामभिप्रायः।[23]

### 3.1.3.8. शिष्याय आचार्यस्य वैराग्यभूषितवृत्त्युपदेशः

मन्त्रपूर्वार्धजगदिदं परमात्मना नारायणेनाधेयं व्याप्यं धार्यं चेत्यादिरूपेणात्मतत्त्व-

प्रतिपादनानन्तरं देहादिष्वात्मभ्रमजीवस्वातन्त्र्यादिभ्रमनिरसनानन्तरं मुमुक्षोर्ज्ञानपिपासोरीश्वर-पारतन्त्र्यबोधमुत्पादयितुं शिष्यं प्रत्याचार्योपदेशात्मको वैराग्यभूषितोऽयं द्वितीयो मन्त्रार्धः। जगदिदं भोग्यताभ्रमविषयकम्। अनादिकालतः कर्तृत्वभोक्तृत्वरूपकर्मप्रवाहेण प्राप्य परमात्म-स्वरूपादिविषयकज्ञानं तिरोभूयते। किञ्च जीवं स्वस्वरूपेभ्यो व्यवर्तयतीदं जगत्। एवं शरीरेन्द्रियादिभोग्यरूपेण स्थिता माया स्वस्यामेव भोग्यत्वभ्रममुत्पादयति। एवं जगदिदं भोग्यताभ्रमविषयकं वर्तते। जगदिदं दुःखमूलं, दुःखमिश्रं दुःखोदर्कम्, अस्थिरम्, अल्पं, देहात्मधीमूलं, दायप्राप्तविरोधि चेति सप्तदोषैर्दूषितं वर्तते। लौकिक ऐश्वर्ये दोषभूयस्त्वं दृश्यते। भोग्यताभ्रमविषयकत्वेन दोषभूयस्त्वेन च जगदिदं त्यक्तव्यम्। तथाविधं जगत् परित्यज्य निष्कामतया पारमार्थिकरूपेण भोगः करणीयः।[24]

### 3.1.3.9. अप्रतिषिद्धयोगधर्मोपयुक्तं भोक्तव्यम्

योगस्तावदप्राप्तस्य प्राप्तिः, धनादिलाभ इत्यर्थः। स चाप्रतिषिद्धेन पथा यजन-याजन- अध्ययन-अध्यापनादिना शास्त्रविहितेन ग्राह्यमित्यर्थः। स योगः कदापि केनचिदपि प्रमाणेन प्रतिषिद्धो नैव स्यात्। तादृशेनाप्रतिषिद्धयोगेन भोगः करणीयः।

### 3.1.3.10. देहधारणमात्रौपयिकं भोक्तव्यम्

देहधारणमात्रं धनाद्युपार्जनम्। तेनैव भोगः करणीय इत्यर्थः। जीवनधारणार्थं न्यूनातिन्यूनतया यानि साधनान्यपेक्षन्ते तैरेव जीवनधारणं कर्तव्यम्। सरलतया जीवन-धारणार्थमावश्यकं सामान्यमेव भोग्यवर्गं संगृह्य जीवनं धारयेत्।

तेन त्यक्तेन भुञ्जीथा इत्यत्र प्रकृते त्यागप्रकरणे सर्वभोगत्यागे जीवनधारणमेवासम्भवमिति चेन्न तस्मात् केवलं देहमात्रधारणार्थमौपयिकं भोग्यजातं त्वर्थादेव सिद्धम्। पुनः प्रकरणस्यास्य विद्याङ्गत्वाद्विद्याविरुद्धं सत्त्वशुद्ध्यौपयिकमेव भोक्तव्यम्।

### 3.1.3.11. निरतिशयभोग्यं ब्रह्म

सर्वावास्यं निरतिशयभोग्यं च ब्रह्म कर्म। उपासनं प्रीतिस्वरूपम्। उपास्यञ्च परमभोग्यस्वरूपम्। प्रियतमब्रह्मानुभवपूर्वकमुपासनमत्र विवक्षितम्। अयं ब्रह्मभोगस्तूपासक-कालिकः एव, न तु मोक्षकालिकः। शास्त्रनिर्दिष्टमार्गेण परमात्मज्ञानसाधनेन पारमार्थरूपेण नारायणार्पणबुद्ध्या देहधारणार्थं भोगः करणीयः।

### 3.1.3.12. धनाकाङ्क्षा त्यक्तव्या

मित्रस्यामित्रस्य वा धनविषयिणी आकाङ्क्षा त्यक्तव्या मुमुक्षुणा। वित्तेन मनुष्यो न

कदापि तर्पणीयः। 'परमसुहृदि बान्धवे'[25] इत्यादि विष्णुपुराणवाक्यानुसारं यः परमसुहृदो बान्धवात्कलत्रात् तनयात्पितुर्मातुर्भृत्यवर्गाद्वार्थतृष्णाविषयकं शठं समाचरति, सः पुरुषाधमः कदापि भगवतो भक्तो भवितुं नार्हति। एवं योऽशुभबुद्धिसम्पन्नोऽसत्प्रवृत्तियुक्तः सततमनार्यसङ्गसमासक्तः सर्वदा पापपाशयुक्तः सः पुरुषरूपी पशुः सः कदापि वासुदेवस्य भक्तो न भवति- 'अशुभमतिरसत्प्रवृत्तिसक्तः'[26] इत्यादिना तत् प्रतिपादितम्। 'परमात्मनि यो रक्तः'[27] इत्यादिना धनपरित्यागोपदेशः परमात्मेतरविषयेषु वैराग्योपलक्षणार्थः।

### 3.1.4. उभयभाष्यार्थसमीक्षणम्

उभयोर्भाष्ययोर्बहुत्र सामञ्जस्यं पार्थक्यञ्च परिदृश्यते। बहुषु विषयेषु मतैक्यं मतानैक्यञ्च दृश्यते। नवीनतायाः प्रभावोऽपि स्पष्टः।

* सर्वादौ शाङ्करभाष्ये 'ईशा वास्यमिदं सर्वम्' इति मन्त्रक्रमो दृश्यते। पक्षान्तरे वेदान्तदेशिकभाष्ये 'ईशावास्यमिदं सर्वम्' इति क्रमो मन्त्रे परिलक्ष्यते।

* शङ्कराचार्येण 'ईशा वास्यम्' इति मन्त्रांशस्य व्याख्यानम् ईशा वास्यं चेति पदद्वयस्य कार्यकारणतत्त्वमाध्यमेन व्याख्यानं कृतम्। वेदान्तदेशिकस्य भाष्यमवलोकयामश्चेदीशा वास्यमिति पदस्य द्विविधा व्युत्पत्तिर्दृश्यते।

0 आदौ ईशा वास्यम् ईशावास्यमिति विग्रहमनुसरामश्चेत्सर्वज्ञाज्ञयोरीश्वरजीवयोः अत्यन्तविलक्षणत्वप्रदर्शनपूर्वकं नियामकनियम्यभावो व्यापकव्याप्यभावश्चेति परिस्फुटो दृश्यते।

0 ईशा आवास्यम् ईशावास्यमिति व्युत्पत्तिं पश्यामश्चेदत्र आवास्यमिति पदस्य वासनीयम् इत्यर्थ आयाति। अर्थात् स्वस्मिन् स्वेन जगत् आवासनीयम्। परमात्मा हि वासुदेवशब्देन अभिप्रेतः। परमात्मा वासुदेवो जगदाधारः। जगदिदं परमात्मन आधेयम्। एवं व्युत्पत्त्यानया परमात्मजगतोराधाराधेयभावः परिज्ञातः। तेन परमात्मना जगदिदमावासनीयमिति द्वितीयोऽर्थः।

* निरुपाधिकमेव ब्रह्म जगदाधारमिति शङ्कराचार्यस्य मतम्। किन्तु वेदान्तदेशिकाचार्यो भगवान् विष्णुरेव जगदाधार इति विशिष्टं तत्त्वं प्रतिपादयितुं प्रचेष्टते। ईशशब्दस्य रुद्रवाचकत्वखण्डनपुरःसरं नैकान् मीमांसकन्यायान् आश्रित्य एकेश्वरवादप्रवाहेश्वरवादखण्डनपूर्वकं भगवन्नारायणे एव मतिर्दृश्यते वेदान्तदेशिकाचार्याणाम्।

* सर्वविधत्यागपूर्वकमात्मानं परिपालय। कामनाविहीनतया निरासक्ततया जगतो

भोगःकर्तव्यः। केवलं देहधारणमात्रं भोगः करणीयः। धनाकाङ्क्षा न कदापि स्यात्। एवं धनत्यागपरामर्शेन परमात्मेतरेषु विषयेषु वैराग्योदयो विवक्षितः इति साम्यं स्थलमुभयोर्भाष्ययोः।

### 4. उपसंहारः

ईशावास्योपनिषदः प्रथमो मन्त्रोऽत्यन्तं तत्त्वबहुलः। केवलम् अस्यैव मन्त्रस्य तात्पर्यं माहात्म्यञ्च अवगम्यते चेत् वेदान्तपिपासूनां ज्ञानाकाङ्क्षा समाधीयेत। अद्वैतं विशिष्टाद्वैतं चोभयभाष्यदिशा प्रथममन्त्रस्य तात्पर्यमत्र सुविन्यस्तम्।

*

## सन्दर्भाः


1. ईशावास्योपनिषत् (मन्त्रः 1)
2. ईशावास्योपनिषत् (मन्त्रः 18)
3. ईशावास्योपनिषत् (मन्त्रः 1)
4. ईशावास्योपनिषत् (मन्त्रः 8)
5. ईशावास्योपनिषत् (मन्त्रः 9)
6. ईशावास्योपनिषत् (मन्त्रः 18)
7. बृहदारण्यकोपनिषत्, 2.5.19
8. छान्दोग्योपनिषत्, 6.2.9
9. छान्दोग्योपनिषत्, 6.3.1
10. तत्र प्रथममचिद्विकाराधिष्ठितस्य...' - (वेदान्तदेशिकभाष्यं, प्रथममन्त्रः)
11. श्वेताश्वतरोपनिषत्, 1.9
12. विष्णुपुराणम्, 1.2.12
13. विष्णुसहस्रनामस्तोत्रम्, 136
14. 'रुद्रः स्यात् सर्वाद्युपपदाभावाच्च' इति (ईशावास्योपनिषत् एकपञ्चाशद्भाष्यटीकोपेता - प्रथमो भागः, पृ. 333)
15. पद्मपुराणम्, 6.226.59

16. 'मैवम्, कारणविषयाकाशप्राणादिशब्दवत्।' इति (ईशावास्योपनिषत् एकपञ्चाशद्भाष्यटीकोपेता-प्रथमो भागः, पृ. 333)
17. छान्दोग्योपनिषत्, 2.1
18. छान्दोग्योपनिषत्, 1.1, 1.4-5
19. चतुर्वेदोपनिषत् (मन्त्रः 1)
20. ईशावास्योपनिषत् (मन्त्रः 16)
21. सुबालोपनिषत् (7/1)
22. नारायणोपनिषत् (मन्त्रः 2)
23. विश्वमेवेदं पुरुषः...' इति (ईशावास्योपनिषत् एकपञ्चाशद्भाष्यटीकोपेता - प्रथमो भागः पृ. 333)
24. 'अप्रतिषिद्धयोगधर्मोपयुक्तदेहधारणमात्रौपयिकं भोक्तव्यवर्गमित्यर्थप्रकरणाभ्यां सिद्ध्यति' इति। (ईशावास्योपनिषत् एकपञ्चाशद्भाष्यटीकोपेता - प्रथमो भागः, पृ. 333)
25. विष्णुपुराणम्, 3.7.30
26. विष्णुपुराणम्, 3.7.31
27. परिव्राडुपनिषत् (मन्त्रः 18)

*

# शब्दाद्वैतवादः

**सैकत मोहन्ता**

तत्त्वदर्शिना परमवैयाकरणेन भर्तृहरिणा सुगम्भीरव्याकरणशास्त्रस्य चरमलक्ष्यं प्रतिपिपादयिषया वाक्यपदीयम् इति सुमहान् ग्रन्थः व्यरचि। तत्र काण्डत्रयविभूषितस्य वाक्यपदीयस्य ब्रह्मकाण्डाभिधप्रथमकाण्डे शब्दतत्त्वं प्रकटीचकार। शब्द एवेदं सर्वमिति भर्तृहरिराद्धान्तः। सर्वं शब्देन भासते[1] इति तदुक्तिः। मोक्षं कामयमानानाम् इदं व्याकरणशास्त्रमपि साधकम्। इयं सा मोक्षमाणानामजिह्मा राजपद्धतिः[2] इति हरिकारिकादिशा व्याकरणं हि मुमुक्षूणां राजमार्गः। वैयाकरणानां शब्द एव परमतत्त्वम्। शब्द एव अर्थभावेन विवर्तते।

एवं शब्दस्य माहात्म्यं ज्ञात्वा शाब्दिकानां मनसि काचित् जिज्ञासा समुदेतीति तु निश्चप्रचम्। किं श्रूयमाणः शब्दः ब्रह्मस्वरूपः, उत ततः अन्यत् किञ्चत् इति जिज्ञासास्वरूपम्। परा, पश्यन्ती, मध्यमा, वैखरीति चतुर्धा वाक् प्रसिद्ध्यति। तत्र कतमा ब्रह्मस्वरूपा इति तु आशङ्का स्वाभाविकी एव। एतत्सर्वं मनसिकृत्य मया अस्मिन् शोधप्रबन्धे शब्दाद्वैतवाद इत्यभिधेये शब्दस्य सर्वात्मकता निरूपिता। कीदृशः शब्दः ब्रह्मस्वरूपः, तादृशस्य स्वीकारे पूर्वपक्षिणामाक्षेपः, तेषां समाधानम्, अन्ततः शब्द एव सर्वमिति प्रतिपदितम्।

**शब्दाद्वैतवादः**

शब्दप्रमाणका वयमिति वैयाकरणानामुद्घोषः। महाभाष्यकारेण पतञ्जलिना चत्वारि शृङ्गा त्रयो अस्य पादा इत्यादिश्रुतेः व्याख्यानावसरे द्वे शीर्षे इति पदस्य द्वौ शब्दात्मनौ नित्यः कार्यश्च इत्युक्तम्। आत्मशब्दस्तु प्रकृते स्वरूपवाची। तेन नित्यानित्यभेदेन द्विविधः शब्दः वृषभस्य मस्तकरूपः। द्विविधश्च शब्दः व्यङ्ग्यव्यञ्जकभेदात्। तत्र व्यङ्ग्यः शब्दः नित्यः। व्यञ्जकश्च शब्दः अनित्यः वैखरीरूपः। तस्यैव नित्यशब्दस्य स्फोट इत्यपरं नाम। एवञ्च जगन्निदानं स्फोटाख्यो निरवयवः नित्यः शब्दः ब्रह्म इति लब्धम्। तदुक्तं वाक्यपदीयकारेण भर्तृहरिणा–

**अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।**

**विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः।।**इति।।[3]

शब्दविषये वैयाकरणनैयायिकयोः मतभेदः कश्चित् वर्तते। नैयायिकानां मते घटमानय इत्यादिवाक्यस्य उच्चारणसमये ये कण्ठादिस्थानेषु वायुसंयोगेन उत्पद्यमानाः श्रवणेन्द्रियगोचराः घकारादयो वर्णाः सद्यो विनश्यन्ति च ते एव शब्दपदेन उच्यन्ते, न तु तदतिरिक्तः कश्चित्। कम्बुग्रीवादिमद्वस्तुनः वाचकः स एव शब्दः। अतः अनित्य एव शब्द इति नैयायिकसमयः। वैयाकरणानां मते तु नायं शब्दः, अपि तु शब्दस्य व्यञ्जको ध्वनिः। अनेन ध्वनिना व्यङ्ग्यो भवति शब्दः। स एव कम्बुग्रीवादिमद्वस्तुनो वाचकः। स च नित्यः। नोत्पद्यते न च विनश्यति। अयमेव स्फोट इत्युच्यते। इत्थं घटमानय इत्युच्चारितेन ध्वनिना अभिव्यक्तः य आन्तरः स्फोटः स एव अर्थं बोधयति।

एवं शब्दानित्यत्ववादिभिः नैयायिकैः आक्षिप्यते यः स्फोटात्मा नित्यः शब्दः उक्तः तदयुक्तम्, प्रमाणाभावात् इति। तत्र समाधानमुक्तं प्रत्यक्षमेवात्र प्रमाणम् इति। यथा गौरिति उच्यमाने समेषां प्रतीतिर्भवति एकं पदमिति। यद्यपि गौरित्यत्र अनेके वर्णाः सन्ति तथापि एकं पदमिति प्रतीतिस्तु सार्वजनीनः। सत्सु नैकेषु वर्णेषु एकप्रतीत्यवगमात् वर्णातिरिक्तः कश्चिदस्तीति प्रतिभाति। स एव वर्णातिरिक्तः ध्वनिव्यङ्ग्यः स्फोटः। असति बाधके गौरिति एकं पदम् इति इयं प्रतीतिः मिथ्या इति वक्तुं न शक्यते। अत एकं पदमिति प्रतीतेः अन्यथा वक्तुम् अशक्यत्वात् स्फोटः अङ्गीकार्य एव।

अत्र आक्षेपः क्रियते गौरिति एकं पदमिति या प्रतीतिः सा वर्णेभ्य एव भवतु इति चेदुच्यते वर्णेभ्यः एतादृशी प्रतीतिः वक्तुं न शक्यते, विकल्पासहत्वात् इति। तथाहि किं वर्णाः समस्ताः अर्थप्रत्ययं जनयन्ति उत व्यस्ताः वर्णाः इति विकल्पः। समस्ताः वर्णाः अर्थं प्रत्याययन्ति इति वक्तुं न शक्यते वर्णानां क्षणिकानां समूहासम्भवात्। वर्णाः क्षणिकाः। वर्णानां क्षणिकत्वात् समूहो भवितुं नार्हति। अतः समस्ताः वर्णाः अर्थप्रत्ययं जनयन्ति इत्ययुक्तम्। अस्तु। व्यस्ताः वर्णाः अर्थप्रत्ययं जनयन्तु इत्यपि वक्तुं न शक्यते, व्यस्तवर्णेभ्यः अर्थप्रत्ययासम्भवात्। एकैकस्मिन् वर्णे उच्चारिते तस्मात् तादृशार्थप्रतीतिः न सम्भवति। किं च वर्णानाम् अर्थवत्त्वे एकस्मिन् वर्णे उच्चारिते अर्थप्रतीतिसिद्धौ इतरवर्णोच्चारणं व्यर्थं स्यात्। अतः व्यस्ता वर्णाः अपि अर्थप्रत्यये असमर्थाः। न च व्याससमासाभ्यामन्यः प्रकारः समस्ति। तस्माद् वर्णानां वाचकत्वानुपपत्तौ यद्बलादर्थप्रतिपत्तिः स स्फोटः। वर्णातिरिक्तः वर्णाभिव्यङ्ग्यः अर्थप्रत्यायको नित्यः शब्दः स्फोट इति तद्विदो वदन्ति।

स्फोटशब्दस्य द्विधा व्युत्पत्तिः प्रोच्यते। स्फुट्यते व्यज्यते वर्णैरिति व्युत्पत्त्या

वर्णाभिव्यङ्ग्यः स्फोट इति लभ्यते। स्फुटति स्फुटीभवति अस्मादर्थ इति व्युत्पत्त्या अर्थप्रत्यायकः स्फोट इति लभ्यते। एवं वर्णाभिव्यङ्ग्यः अर्थप्रत्यायकः स्फोटो भवतीति व्युत्पत्या लभ्यते। तथा चोक्तं भगवता पतञ्जलिना महाभाष्ये– 'अथ गौरित्यत्र कः शब्दः, येनोच्चारितेन सास्ना–लाङ्गूल–ककुद–खुर–विषाणिनां सम्प्रत्ययो भवति, स शब्दः इति।' गौरिति उच्चारणक्रियया प्रकाशितेन येन सास्नादीनां बोधः भवति स शब्दः स्फोटाख्यः इत्यर्थः। भाष्योक्तं वचनं व्याख्यातं च कैयटेन वैयाकरणा वर्णव्यतिरिक्तस्य पदस्य वाचकत्वमिच्छन्ति। वर्णानां वाचकत्वे द्वितीयादिवर्णोच्चारणानर्थक्यप्रसङ्गादित्यादिना तद्व्यतिरिक्तः स्फोटो नादाभिव्यङ्ग्यो वाचको विस्तरेण वाक्यपदीये व्यवस्थापितः इत्यन्तेन प्रबन्धेन।

अत्र पूर्वपक्षिभिराक्षिप्यते स्फोटस्य अर्थप्रत्यायकत्वं न घटते, विकल्पासहत्वात् इति। तथाहि किम् अभिव्यक्तः स्फोटः अर्थं प्रत्याययति उत अनभिव्यक्तः इति विकल्पः। अनभिव्यक्तः स्फोटः अर्थं तु नैव प्रत्याययति, सर्वदा अर्थप्रत्ययलक्षणकार्योत्पादप्रसङ्गात्। स्फोटः नित्यत्वेन अभ्युपगतः। स्फोटस्य नित्यत्वे स्वीकृते यदि अनभिव्यक्तः स्फोटः अर्थं प्रत्याययेत् तर्हि सर्वदैव अर्थस्य प्रत्ययः स्यात्। किन्तु सर्वदा अर्थप्रत्ययासम्भवात् अनभिव्यक्तः स्फोटः अर्थं प्रत्याययति इति वक्तुमयुक्तम्। अस्तु, अभिव्यक्तः स्फोटः अर्थं प्रत्याययति इति पक्षः अङ्गीक्रयते इति चेदत्रापि विकल्पः प्रोच्यते। किं अभिव्यञ्जयन्तो वर्णाः प्रत्येकम् अभिव्यञ्जयन्ति उत सम्भूय इति विकल्पः। अभिव्यञ्जयन्तो वर्णाः प्रत्येकम् अभिव्यञ्जयन्ति इति वक्तुं न शक्यते, एकस्योच्चारितस्य वर्णस्य अर्थवत्त्वे इतरवर्णानाम् आनर्थक्यप्रसङ्गात्। सम्भूय वर्णाः अभिव्यञ्जयन्ति इत्यपि वक्तुं न शक्यते, उच्चारितानां वर्णानां समूहासम्भवात्। इत्थं वर्णानां वाचकत्वपक्षे ये दोषाः उक्ताः ते एव वर्णानाम् अभिव्यञ्जकत्वपक्षे सम्भाविताः। अत उक्तं भट्टाचार्यैर्मीमांसाश्लोकवार्तिके -

**यस्यानवयवः स्फोटो व्यज्यते वर्णबुद्धिभिः।**
**सोऽपि पर्यनुयोगेन नैकेनापि विमुच्यते॥** इति।।[4]

अत्र पूर्वपक्षिभिः अपरोऽपि आक्षेपः प्रदत्तः। तैरुक्तम्–सुप्तिङन्तं पदम् इति सूत्रेण यथा महर्षिपाणिनिना तथा ते विभक्त्यन्ताः पदम् इति सूत्रेण महर्षिगौतमेन वर्णसमूहस्य पदसंज्ञा विहिता। एवं प्रामाणिकाचार्यैः वर्णसमुदायस्य पदसंज्ञायाः विहितत्वात् वर्णेभ्यः व्यतिरिक्तं किञ्चिन्नास्तीति ज्ञायते। कथं विनाशिभिः वर्णैः समुदायः सम्भवति इति चेदुच्यते यद्यपि विनाशिभिर्वर्णैः समुदायो न भवति तथापि वृद्धव्यवहारादिना समुदायस्य संकेतग्रहपूर्वकम् एकार्थप्रत्यायकत्वदर्शनेन विनाशिभिरपि वर्णैरुत्तरोत्तरम् अनुग्रहो भवतीति अनुभवबलात् पदत्वम् आस्थेयम् इति एतावता समूहकल्पनया पदबुद्धिर्भविष्यतीति। ननु विभक्त्यन्तस्य

वर्णसमुदायस्य पदत्वे सर इत्येतस्मिन् पदे यावन्तो वर्णाः सन्ति तावन्त एव रस इत्यत्रापि। एवं वनं नवं, नदी दीना, रामो मारो, राजा जारा इत्यादिष्वपि। एतेषु स्थलेषु समानवर्णानां सत्त्वात् अर्थभेदप्रतीतिर्न स्यात् इति चेन्न क्रमभेदेन भेदसम्भवात्। यद्यपि सर रस इत्यादिषु समानाः वर्णाः सन्ति तथापि तेषां क्रमभेदात् भिन्नार्थप्रतीतिः सम्भवत्येव। अतः विभक्त्यन्तसमुदायस्य पदत्वे न कश्चित् दोषः। तदुक्तं तौताचार्यैः–

**यावन्तो यादृशा ये च यदर्थप्रतिपत्तये।**
**वर्णाः प्रज्ञातसामर्थ्यास्ते तथैवावबोधकाः॥** इति।।[5]

तस्मात् वर्णानां वाचकत्वे अथ च वर्णानाम् अभिव्यञ्जकत्वे ये दोषाः ते समानाः इति उभयोः मतयोः दोषस्य सत्त्वे परस्परं दोषारोपणं नोचितम्। इत्थं च वर्णानां वाचकत्वोपपत्तौ अतिरिक्तस्फोटकल्पना न कर्तव्या इति पूर्वपक्षिणामाशयः।

अत्र वैयाकरणैः समाहितं विभक्त्यन्तवर्णसमुदायस्य पदत्वं न सम्भवति, विकल्पानुपपत्तेः। तथाहि किं वर्णमात्रं पदप्रत्ययावलम्बनं वर्णसमूहो वा इति विकल्पः। वर्णमात्रस्य पदप्रत्ययः न सम्भवति। यतो हि यथा पुष्पेषु विना सूत्रं मालाप्रत्ययो न भवति, तथा परस्परविलक्षणवर्णमालायां विना निमित्तम् एकं पदमिति प्रत्ययो न सम्भवति। अतः वर्णमात्रस्य पदप्रत्ययो न भवति। अस्तु, वर्णसमुदायस्य पदप्रत्ययो भवतु इति चेदुच्यते उच्चारितप्रध्वस्तानां वर्णानां समूहाभावात् पदप्रत्ययो न सम्भवति। अपि च, समूहव्यपदेशः तत्रैव भवति यत्र पदार्थाः एकस्मिन् प्रदेशे सहावस्थिततया बहवः अनुभूयन्ते। यथा एकस्मिन् प्रदेशे सहावस्थिततया अनुभूयमानेषु धवखदिरपलाशादिषु गजनरतुरगादिषु वा समूहव्यपदेशो भवति। किन्तु वर्णाः तथा सहावस्थिततया नानुभूयन्ते, वर्णानाम् उत्पन्नप्रध्वस्तत्वात्। अभिव्यक्तिपक्षेऽपि क्रमेणैवाभिव्यक्तः, समूहासम्भवात्। अतः वर्णसमूहो नैवोपपद्यते।

अपि च, वर्णेषु काल्पनिकः समूहः न सम्भवति, परस्पराश्रयप्रसङ्गात्। एकार्थप्रत्यायकत्वसिद्धौ तदुपाधिना वर्णेषु पदत्वप्रतीतिः, पदत्वसिद्धौ च एकार्थप्रत्यायकत्वसिद्धिरिति परस्पराश्रयत्वं भवति। अतः काल्पनिकः समूहोऽपि तु वक्तुमशक्यम्। वैयाकरणानां तु वर्णव्यतिरिक्तस्य वर्णाभिव्यक्तस्य एकार्थप्रत्यायकत्वं पदत्वं च भवति। अभिव्यक्तौ च वर्णानां क्रमः नापेक्षितः। अतः वैयाकरणनये वर्णसमूहो नापेक्षते एव।

अपि च, पूर्वपक्षिभिर्यदुक्तं वर्णानां वाचकत्वपक्षे अभिव्यक्तिपक्षे च समानः दोषः तत् वैयाकरणैः खण्ड्यते। तैरुक्तम् अभिव्यक्तिपक्षे यो विकल्पः प्रदत्त सः अयुक्तः, वैषम्यसम्भवात् इति। तथाहि वर्णैरभिव्यक्तः स्फोटः अर्थं बोधयति। अभिव्यक्तिप्रकारस्तु

इत्थम् अभिव्यञ्जकः प्रथमो ध्वनिः स्फोटम् अस्फुटम् अभिव्यनक्ति। उत्तरोत्तराभिव्यञ्जकक्रमेण स्फुटं स्फुटतरं स्फुटतमं च अभिव्यनक्ति। यथा घटमित्यत्र घ्–अ–ट्–अ–म् इत्येते वर्णाः क्रमेण स्फोटम् अस्फुटम्, ततः स्फुटं स्फुटतरं स्फुटतमं च अभिव्यञ्जयन्ति। यथा स्वाध्यायः सकृत्पठ्यमानो नावधार्यते, अभ्यासेन तु स्फुटावसायः। यथा वा रजतत्वं प्रथमप्रतीतौ स्फुटं न चकास्ति, चरमे चेतसि यथावदभिव्यज्यते। अत्र प्रत्येकं वर्णस्य स्फोटव्यञ्जकत्वमिति कारणात् वर्णानां समूहस्य कल्पना न कार्या इति वैयाकरणराद्धान्तः। एवं स्फोटः अङ्गीकार्य एव इति सिद्धम्। तदुक्तं वाक्यपदीये -

**नादैराहितबीजायामन्त्येन ध्वनिना सह।**
**आवृत्तिपरिपाकायां बुद्धौ शब्दोऽवधार्यते॥** इति।।[6]

इदानीं समेषां शब्दानाम् अर्थः परमार्थसंविल्लक्षणसत्ता जातिरेव इति जातिसमुद्देशे प्रतिपादितम्। परमार्थभूता या संवित् निर्विकल्पं केनापि विशेषणेन रहितं तद्रूपा या अखिलपदार्थानुगता सत्ता सैव घटपटादिसम्बन्धिभेदेन घटत्वपटत्वादिजातिरूपा घटादिशब्दानामर्थः इत्यर्थः। यदि सत्ता एव सर्वेषां शब्दानामर्थः तर्हि सर्वेषां शब्दानां पर्यायता स्यात्। पर्याये सति युगपत् त्रिचतुरपदानां प्रयोगो न सम्भवति। तदुक्तम् –

**पर्यायाणां प्रयोगो हि यौगपद्येन नेष्यते।**
**पर्यायेणैव ते यस्माद्वदन्त्यर्थं न संहताः॥** इति।।

अत्र समाधानम् उच्यते यथा नीललोहितपीताद्युपरञ्जकद्रव्यभेदेन स्फटिकमणौ भेदो दृश्यते तथा सम्बन्धिभेदात् सत्तायाः अपि भेदे प्रतिपत्तिः सिद्ध्यति। तेन गोरूपसम्बन्धिभेदात् गोसत्तायाः भेदसिद्धौ गौरिति व्यवहारः उपपद्यते। तथा चाप्तवाक्यम् -

**स्फटिकं विमलं द्रव्यं यथा युक्तं पृथक्पृथक्।**
**नीललोहितपीताद्यास्तद्वर्णमुपलभ्यते॥** इति।।

तथा हरिणाप्युक्तम् -

**सम्बन्धिभेदात्सत्तैव विद्यमाना गवादिषु।**
**जातिरित्युच्यते तस्यां सर्वे शब्दा व्यवस्थिताः॥** इति।।
**तां प्रातिपदिकार्थं च धात्वर्थं च प्रचक्षते।**
**सा नित्या सा महानात्मा तामाहुस्त्वतलादयः॥** इति।।[7]

आश्रयभूतैः सम्बन्धिभिर्भिद्यमाना कल्पितभेदा गवाश्वादिषु सत्तैव महासामान्यमेव जातिः। गोत्वादिकम् अपरं सामान्यं परमार्थतस्ततो भिन्नं न भवति। गोसत्ता एव गोत्वम्,

अश्वसत्ता एव अश्वत्वमित्यादि बोध्यम्। इत्थं गवादिभेदभिन्नायां सत्तायां जातौ सर्वे गोशब्दादयो वाचकत्वेन व्यवस्थिताः। प्रातिपदिकार्थश्च सत्ता इति प्रसिद्धम्। भाववचनो धातुरिति पक्षे क्रियावचनो धातुरिति पक्षे वा उभयत्र धात्वर्थः सत्ता एव। इमामेव सत्तां तस्य भावस्त्वतलौ इति सूत्रेण विहितौ त्वतलौ प्रत्ययौ वदतः। इयमेव सत्ता देशतः कालतः वस्तुतश्च परिच्छेदराहित्यात् महानात्मा इति व्यपदिश्यते। पाणिनिमते जातिः व्यक्तिश्च पदार्थौ स्वीकृतौ। यतो हि जातिं पदार्थं स्वीकृत्य जात्याख्यायामेकस्मिन् बहुवचनमन्यतरस्याम् इति सूत्रं तथा व्यक्तिं पदार्थं मत्वा सरूपाणामेकशेष एकविभक्तौ इति सूत्रं व्यरचयत्। उभयोः पदार्थत्वस्वीकारे न कश्चित् विरोधः। तस्मात् सत्यं परं ब्रह्म तत्त्वं सर्वशब्दार्थ इति स्थितम्। तदुक्तं हरिणा -

**तस्माच्छक्तिविभागेन सत्यः शब्दः सदात्मकः।**
**एकोऽर्थः शब्दवाच्यत्वे बहुरूपः प्रकाशते॥** इति।।[8]

एवं स्फोटः वाचकः, वाच्या च सर्वपदार्थानुगता सत्ता। अनयोः वाच्यवचकयोर्नास्ति भेदः। तदुक्तं वाक्यपदीये -

**वाच्या सा सर्वशब्दानां शब्दाच्च न पृथक्ततः।**
**अपृथक्त्वेऽपि सम्बन्धस्तयोर्जीवात्मनोरिव॥** इति।।[9]

सर्वशब्दानुगता या सत्ता सा स्फोटाख्यात् शब्दात् न पृथक्। यथा जीवात्मनोः अभेदः सम्बन्धः तथा तयोः स्फोटसत्तयोरपि न भेदः। तत्तदुपाधिभेदात् भेदः परिलक्ष्यते। एवं शब्दार्थयोरभेदात् नित्यत्वात् एकत्वाच्च शब्दाद्वैतवादः सिद्धः। तदुक्तं– शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति इति। एवं शब्दशास्त्रस्य निःश्रेयससाधकत्वमप्युक्तम् –

**तद्द्वारमपवर्गस्य वाङ्मलानां चिकित्सितम्।**
**पवित्रं सर्वविद्यानामधिविद्यं प्रचक्षते॥** इति।।
**इदमाद्यं पदस्थानं सिद्धिसोपानपर्वणाम्।**
**इयं सा मोक्षमाणानामजिह्मा राजपद्धतिः॥**[10]

## सन्दर्भाः


1. वाक्यपदीयम्, 1.123
2. वाक्यपदीयम्, 1.16
3. वाक्यपदीयम्, 1.1
4. मीमांसाश्लोकवार्तिकम्, 91
5. मीमांसाश्लोकवातिकम्, 69
6. वाक्यपदीयम्, 1.84
7. वाक्यपदीयम्, 333–34(जातिसमुद्देशः)
8. वाक्यपदीयम्, 3.87(सम्बन्धसमुद्देशः)
9. वाक्यपदीयम्, 3.16 (द्रव्यसमुद्देशः)
10. वाक्यपदीयम्, 1.14–15


*

# फार्म - ४

## नियमः ८ द्रष्टव्यः

| | | | |
|---|---|---|---|
| 1. | प्रकाशनस्थानम् | : | आरा (विहारः) |
| 2. | प्रकाशनस्य अवधिः | : | अर्धवार्षिकम् |
| 3. | मुद्रकस्य नाम | : | प्रो. गोपबन्धु मिश्रः |
| | किमसौ भारतस्य नागरिकः? | : | एवम् |
| | सङ्केतः | : | संस्कृतप्रसारपरिषद्, आरा |
| 4. | प्रकाशकस्य नाम | : | प्रो. गोपबन्धु मिश्रः |
| | किमसौ भारतस्य नागरिकः? | : | एवम् |
| | सङ्केतः | : | संस्कृतप्रसारपरिषद्, मौलाबाग आरा (विहारः) |
| 5. | सम्पादकस्य नाम | : | प्रो. गोपबन्धु मिश्रः |
| | किमसौ भारतस्य नागरिकः? | : | एवम् |
| | सङ्केतः | : | संस्कृतप्रसारपरिषद्, मौलाबाग आरा (विहारः) |
| 6. | तेषां जनानां नामानि सङ्केताश्च ये समाचारपत्रस्य स्वामिनः स्युः तथा च ये समस्तव्ययस्य एकप्रतिशतात् अधिकस्य अंशग्राहकाः स्युः | : | संस्कृतप्रसारपरिषद्, मौलाबाग आरा (विहारः) |

अहं गोपबन्धु मिश्रः एतद्द्वारा उद्घोषयामि यत् मम अधिकतमस्य बोधस्य विश्वासस्य च अनुसारेण उपरि प्रदत्तं विवरणं सत्यम् अस्ति।

**ह. गोपबन्धु मिश्रः**
सम्पादकः

**आरण्यकम्** (XXXII/1) **मार्च 2024**
**अर्धवार्षिकी सन्दर्भिता संस्कृतशोधपत्रिका** **( UGC Carelisted )**

## संस्कृतप्रसारपरिषद्, आरा

### प्रकाशनम्

1. मेघदूतम् (सभूमिका-हिन्दीपद्यानुवादसहितम्) - स्व. पण्डित कमलाकान्त उपाध्यायः
15 रूप्यकाणि
2. भोजपुरी नीतिसतक (भर्तृहरि 'नीतिशतक'स्य भोजपुरी-पद्यानुवादः)
-श्री देवकुमार मिश्रः 'अलमस्त'
15 रूप्यकाणि
3. पण्डित दीनदयाल उपाध्याय के 'एकात्ममानवदर्शन' की मीमांसा -श्री नर्मदेश्वर ओझा
15 रूप्यकाणि
4. माण्डूक्योपनिषद्-'नलिन-भाष्य' - पं. जगदीश्वर प्रसाद मिश्र 'नलिन'
35 रूप्यकाणि
5. भरतचरितम् (महाकाव्यम्) - स्व. भवानीदत्त शर्मा
51 रूप्यकाणि
6. राष्ट्रियता : सांस्कृतिक अवधारणा - श्री नर्मदेश्वर ओझा
51 रूप्यकाणि
7. संस्कृतनिबन्धसञ्चयनम् - पं. व्रजभूषण मिश्र 'आक्रान्तः'
41 रूप्यकाणि
8. ईशावास्योपनिषद् एवं केनोपनिषद्-'नलिन-भाष्य'
- श्री जगदीश्वर प्रसाद मिश्र 'नलिन'
51 रूप्यकाणि
9. आध्यात्मिकनिबन्धसंग्रह - श्री जगदीश्वर प्रसाद मिश्र 'नलिन'
51 रूप्यकाणि
10. उपेन्द्रविज्ञानदर्शनम् (वेदान्तग्रन्थः) - स्व. पं. उपेन्द्रनारायणदत्त शर्मा
41 रूप्यकाणि
11. भावनाविलासशतकम् - स्व. पं. उपेन्द्रनारायणदत्त शर्मा
21 रूप्यकाणि
12. हनुमच्चरितम् - स्व. पं. व्रजभूषणमिश्र 'आक्रान्तः'
51 रूप्यकाणि
13. उपनिषदों की भूमिका - पं. जगदीश्वर प्रसाद मिश्र 'नलिन'
51 रूप्यकाणि
14. महाभारतसारसंग्रहः (प्रकाश्यः) - स्व. पण्डित वचन मिश्रः
15. चरितरत्नत्रयी - स्व. पं. व्रजभूषणमिश्र 'आक्रान्तः'
51 रूप्यकाणि
16. जगन्नाथचरितम् - डॉ. बनमाली बिश्वालः
60 रूप्यकाणि
17. कृत्-प्रत्ययविश्लेषण - डॉ. गोपबन्धु मिश्रः
204 रूप्यकाणि
18. सोमश्रद्धार्णव - डॉ. गोपबन्धु मिश्रः
1000 रूप्यकाणि